भा० प्र०

॥श्रीगणेशाय नमः॥ ॐ नमः श्रीपरमहंसास्वादितचरणकमलचिन्मकरंदाय भक्तजनमानसनिवासाय श्री
रामचंद्राय॥ वागीशा यस्य वदने लक्ष्मीर्यस्य च वक्षसि॥ यस्यास्ते हृदये संवित्तं नृसिंहमहं भजे॥१॥ विश्वसर्ग
विसर्गादिनवलक्षणलक्षितं॥ श्रीकृष्णाख्यं परं धाम जगद्धाम नमामि तत्॥२॥ माधवोमाधवावीशौ सर्वसिद्धिवि
धायिनौ॥ वंदे परस्परात्मानौ परस्परनुतिप्रियौ॥३॥ संप्रदायानुरोधेन पौर्वापर्यानुसारतः॥ श्रीभागवतभावार्थ
दीपिकेयं प्रतन्यते॥४॥ क्वाहं मंदमतिः क्वेदं मथनं क्षीरवारिधेः॥ किं तत्र परमाणुर्वै यत्र मज्जति मंदरः॥५॥ मूकं करो
ति वाचालं पंगुं लंघयते गिरिं॥ यत्कृपा तमहं वंदे परमानंदमाधवं॥६॥ श्रीमद्भागवताभिधः सुरतरुस्तारांकुरः सज्जनिः स्कं
धैर्द्वादशभिस्ततः प्रविलसद्भक्त्यालवालोदयः॥ द्वात्रिंशत्त्रिशतं च यस्य विलसच्छाखाः सहस्राण्यलं पर्णान्यष्टदशोष्ट
दोतिसुलभो वर्वर्त्ति सर्वोपरि॥७॥ अथ नानापुराणशास्त्रप्रबंधैः चित्तप्रशांतिमलभमानस्तत्र तत्रापरितुष्यन्नारदोपदे
शतः श्रीमद्भगवद्गुणवर्णनप्रधानं श्रीभागवतशास्त्रं प्रारिप्सुर्वेदव्यासः तत्प्रतिपाद्यपरदेवतानुस्मरणलक्षणं मंग
लमाचरति॥ जन्माद्यस्येति॥ परं परमेश्वरं धीमहीति ध्यायतेर्लिङि छांदसं रूपं॥ ध्यायेमेत्यर्थः॥ बहुवचनं शिष्याभिप्रायं
तमेव स्वरूपतटस्थलक्षणाभ्यामुपलक्षयति॥ तत्र स्वरूपलक्षणं सत्यमिति॥ सत्यत्वे हेतुः॥ यत्र यस्मिन्त्रयाणां मा
यागुणानां तमोरजस्सत्वानां सर्गोभूतेंद्रियदेवतारूपः॥ अमृषा सत्यः॥ यत्सत्यतया मिथ्यासर्गोपि सत्यवत्प्रतीयते॥ तं परं स
त्यमित्यर्थः॥ अत्र दृष्टांतः॥ तेजोवारिमृदां यथा विनिमयो व्यत्ययः॥ अन्यस्मिन्नन्यावभासः स यथाधिष्ठानसत्तया सद्व
त्प्रतीयत इत्यर्थः॥ तत्र तेजसि वारिबुद्धिः॥ मरीचितोये प्रसिद्धा॥ मृदि काचादौ च वारिबुद्धिरित्यादि यथायथमुह्यं॥ यद्वा तस्यै १

२

वपमार्थसत्यत्वप्रतिपादनायतदितरस्यमिथ्यात्वमुक्तं यत्रमृषैवायंत्रिसर्गोनवस्तुतःसन्निति यत्रेत्यनेनप्रती
तमुपाधिसंबंधंवारयति स्वेनैवधाम्नामहसानिरस्तंकुहकंकपटंयस्मिन्तत् तटस्थलक्षणमाह जन्मादीति
अस्यविश्वस्यजन्मस्थितिभंगंयतोभवतितंधीमहीति तत्रहेतुः अन्वयादितरतश्चार्थेषुकार्येषुपरमेश्वर
स्यसद्रूपेणान्वयादकार्येभ्यश्चखपुष्पादिभ्यस्तद्व्यतिरेकात् यद्वाअन्वयशब्देनानुवृत्तिः इतरशब्देनव्या^

जन्माद्यस्ययतोन्वयादितरतश्चार्थेष्वभिज्ञःस्वराट्तेनेब्रह्महृदायआदिकवयेमुह्यंतियत्सूरयः।।
तेजोवारिमृदांयथाविनिमयोयत्रत्रिसर्गोमृषाधाम्नास्वेनसदानिरस्तकुहकंसत्यंपरंधीमहि।।१।।

वृत्तिः अनुवृत्तत्वा[illegible]त्सद्रूपंब्रह्मकारणंमृत्सुवर्णादिवद्व्यावृत्तत्वाद्विश्वंकार्यंघटकुंडलादि[illegible]वदित्यर्थः यद्वा
सावयवत्वादन्वयव्यतिरेकाभ्यांयदस्यजन्मादितद्यतोभवतीतिसंबंधः तथाचश्रुतिः।।यतोवाइमानिभूतानिजायंते
येनजातानिजीवंतियत्प्रयंत्यभिसंविशंतीत्याद्या स्मृतिश्च यतःसर्वाणिभूतानिभवंत्यादियुगागमे यस्मिंश्च
प्रलयंयांतिपुनरेवयुगक्षयेइत्याद्या तर्हिकिंप्रधानंजगत्कारणत्वात् ध्येयमभिप्रेतंनेत्याह अभिज्ञःयःतं सऐक्षतलो
कानसृजाइति सइमांलोकानसृजतेतिश्रुतेः ईक्षतेर्नाशब्दमितिन्यायाच्चात तर्हिजीवंस्यात्नेत्याह स्वराट् स्वेनैवराजतेयःतं

स्वतःसिद्धज्ञानमित्यर्थः तर्हि किं ब्रह्मा हिरण्यगर्भः समवर्त्तताग्रे भूतस्य जातः पतिरेक आसीदित्यादिश्रुतेः नेत्याह ते
न इत्यादिकवये ब्रह्मणेऽपि ब्रह्म वेदं तेने । प्रकाशितवान् यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै तं ह देवमा
त्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्य इति श्रुतेः ननु ब्रह्मणोऽन्यतो वेदाध्ययनमप्रसिद्धं सत्यं तत्तु हृदा मन
सैव तेने अनेन बुद्धिवृत्तिप्रवर्त्तकत्वेन गायत्र्यर्थो दर्शितः वक्ष्यति हि प्रचोदिता येन पुरा सरस्वती वितन्वताऽज
स्य सतीं स्मृतिं हृदि स्वलक्षणा प्रादुरभूत्किलास्यतः स मे ऋषीणामृषभः प्रसीदतामिति ननु ब्रह्मा स्वयमेव सुप्तप्र
तिबुद्धन्यायेन वेदमुपलभतां नेत्याह मुह्यन्ति यद्यस्मिन्ब्रह्मणि सूरयोऽपि मुह्यन्तीति तस्माद्ब्रह्मणोऽपि पराधीनज्ञानत्वात्स्वतःसि
द्धज्ञानः परमेश्वर एव जगत्कारणं अत एव सत्यः असतः सत्ताप्रदत्वाच्च परमार्थसत्यः सर्वज्ञत्वेन च निरस्तकुहकः तं
धीमहीति गायत्र्या प्रारम्भेण च गायत्र्याख्यं ब्रह्मविद्यारूपमेतत्पुराणमिति दर्शितं यथोक्तं मत्स्यपुराणे पुराणदानप्रस्ता
वि वे यत्राधिकृत्य गायत्रीं वर्ण्यते धर्मविस्तरः वृत्रासुरवधोपेतं तद्भागवतमिष्यते लिखित्वा तच्च यो दद्याद्धेमसिंहसमन्वि
तं प्रौष्ठपद्यां पौर्णमास्यां स याति परमं पदं अष्टादशसहस्राणि पुराणं तत्प्रकीर्त्तितम् पुराणान्तरे ग्रंथोऽष्टादशसा
हस्रो द्वादशस्कंधसंमितः हयग्रीवब्रह्मविद्या यत्र वृत्रवधस्तथा गायत्र्या च समारम्भः तद्वै भागवतं विदुः पद्मपुराणे
अंबरीषं प्रति गौतमवचनं अंबरीष शुकप्रोक्तं नित्यं भागवतं शृणु पठस्व स्वमुखेनापि यदीच्छसि भवक्षयमिति ॥
अत एव भागवतं नामान्यदित्यपि न शंकनीयम् ॥१॥

इदानीं श्रोतृप्रवर्त्तनाय श्रीभागवतस्य कांडत्रयविषयेभ्यः सर्वशास्त्रेभ्यः श्रैष्ठ्यं दर्शयति॥ धर्म इति॥ अत्र श्रीमति सुंदरे भा
गवते परमो धर्मो निरूप्यते परमत्वे हेतुः॥ प्रकर्षेण उज्झितं कैतवं फलाभिसंधिलक्षणं कपटं यस्मिन्सः॥ प्रशब्देन मोक्षाभि
संधिरपि निरस्तः॥ केवलमीश्वराराधनलक्षणो धर्मो निरूप्यत इति अधिकारितोपि धर्मस्य परमत्वमाह॥ निर्मत्सराणां परोत्क
र्षासहनं मत्सरः॥ तद्रहितानां सतां भूतानुकंपिनां एवं कर्मकांडविषयेभ्यः शास्त्रेभ्यः श्रैष्ठ्यमुक्तं॥ ज्ञानकांडविषयेभ्यो
ऽपि श्रैष्ठ्यमाह॥ वेद्यमिति॥ वास्तवं परमार्थभूतं वस्तु वेद्यं न तु वैशेषिकाणामिव द्रव्यगुणादिरूपं॥ यद्वा वास्तवशब्दे
न वस्तुनोंशः जीवः वस्तुनः शक्तिर्माया च वस्तुनः कार्यं जगच्च तत्सर्वं वस्त्वेव॥ न ततः पृथगिति वेद्यं अयत्नेनैव ज्ञातुं श

धर्मः प्रोज्झितकैतवोत्र परमो निर्मत्सराणां सतां वेद्यं वास्तवमत्र वस्तु शिवदं तापत्रयोन्मूलनं॥ श्रीमद्भागव
ते महामुनिकृते किं वा परैरीश्वरः सद्यो हृद्यवरुध्यतेत्र कृतिभिः शुश्रूषुभिस्तत्क्षणात्॥ २॥

क्यं॥ ततः किमत आह॥ शिवदं परमसुखदं किंच आध्यात्मिकादितापत्रयोन्मूलनं च॥ अनेन ज्ञानकांडविषयेभ्यः श्रैष्ठ्यं दर्शितं
कर्तृतोपि श्रैष्ठ्यमाह॥ महामुनिः श्रीनारायणः तेन प्रथमं संक्षेपतः कृते॥ देवताकांडविषयगतं श्रैष्ठ्यमाह॥ परैः शास्त्रैः तदुक्त
साधनैर्वा॥ ईश्वरो हृदि किं वा सद्यः एवावरुध्यते॥ स्थिरीक्रियते॥ वा शब्दः कटाक्षे किंतु विलंबेन॥ कथंचिदेव॥ अत्र श्रीभागवते शु
श्रूषुभिः श्रोतुमिच्छद्भिः तत्क्षणादवरुध्यते॥ ननु इदमेव तर्हि किमिति सर्वे न शृण्वंति॥ तत्राह॥ कृतिभिरिति॥ श्रवणेच्छा तु पु एव
ण्यैर्विना नोत्पद्यत इत्यर्थः॥ तस्मात्कांडत्रयार्थस्यापि यथावत्प्रतिपादनादिदमेव सर्वशास्त्रेभ्यः श्रेष्ठं॥ अतो नित्यमेवैतदे
व सेवितव्यमिति भावः॥ २॥

भा०प्र०

इदानींनकेवलंसर्वशास्त्रेभ्यःश्रेष्ठत्वादस्यश्रवणंविधीयते॥अपितुसर्वशास्त्रफलरूपमिदं॥अतःपरमादरेणसेव्यमित्याह
निगमेति॥निगमोवेदःसएवकल्पतरुःसर्वपुरुषार्थोपायत्वात्तस्यफलमिदंभागवतंनाम॥तत्तुवैकुंठगतंतेनब्रह्मणे
दत्तंतेननारदायनारदेनानीयमह्यंदत्तंमयाचशुकस्यमुखेनिहितं॥तच्चतन्मुखाद्भुविगलितं॥शिष्यप्रशिष्यादि
रूपपल्लवपरंपरयाशनैरखंडमेवावतीर्णं॥नतूच्चनिपातेनस्फुटितमित्यर्थः॥तच्चभविष्यदपिभूतवन्निर्दिष्टं॥अना
गताख्यानेनैवास्यशास्त्रस्यप्रवृत्तेः॥अतएवामृतरूपेणद्रवेणसंयुतं॥लोकेहिशुकमुखस्पृष्टंफलममृतमिवस्वादुभवतीतिप्रसि
द्धं॥अत्रशुकोमुनिःअमृतंपरमानंदःसएवद्रवोरसः॥रसोवैसः॥रसंह्येवायंलब्ध्वानंदीभवतीतिश्रुतेः॥अतःहेरसिकाःहेर
सज्ञाःतत्रापिभावुकाः॥हेरसविशेषभावनाचतुराः॥अहोभुविगलितमित्यलभ्यलाभोक्तिः॥इदंभागवतंनामफलंमुहुःपिब

निगमकल्पतरोर्गलितंफलंशुकमुखादमृतद्रवसंयुतं॥पिबतभागवतंरसमालयंमुहुरहोरसिकाभुविभावुकाः॥२॥

ततः॥ननुत्वगष्ट्यादिकंविहायफलाद्रसःपीयते॥कथंफलमेवपातव्यं॥तत्राह॥रसंरसरूपंअतस्त्वगष्ट्यादेर्हेयस्याभावात्फलमेवकृ
त्स्नंपिबत॥अत्रचरसतादात्म्यविवक्षयारसवत्त्वस्याविवक्षितत्वात्अगुणवचनेपिरसशब्दान्मतुपःशस्यभावेतेनविनैवरसंफ
लमितिसामानाधिकरण्यं॥तत्रफलमित्युक्तेपानासंभवोहेयांशप्रसक्तिश्चभवेदितितन्निवृत्त्यर्थंरसमित्युक्तं॥रसमित्युक्तेपिग
लितस्यरसस्यपातुमशक्यत्वात्फलमित्युक्तमितिद्रष्टव्यं॥नचभागवतामृतपानंमोक्षेपित्याज्यमित्याह॥आलयंलयोमोक्षः॥अत्र
त्रिविधावाकारः॥लयमभिव्याप्य॥नहीदंस्वर्गादिसुखवन्मुक्तैरुपेक्ष्यते॥किंतुसेव्यतएव॥वक्ष्यतिहि॥आत्मारामाश्चमुनयोनि
र्ग्रंथाअप्युरुक्रमे॥कुर्वंत्यहैतुकींभक्तिमित्थंभूतगुणोहरिरिति॥३॥ ३

तदेवमनेन श्लोकत्रयेण विशिष्टदेवतानुस्मरणपूर्वकं प्रारिप्सितस्य शास्त्रस्य विषयप्रयोजनसंबंधाधिकारिणां वैशिष्ट्येन सुखसेव्य
त्वेन च श्रोतृजनानभिमुखीकृत्य शास्त्रमारभते ॥ नैमिष इति ॥ ब्रह्मणा विसृष्टस्य मनोमयचक्रस्य नेमिः शीर्यते कुंठीभवति यत्र तन्ने
मिशं ॥ नेमिशमेव नैमिशं ॥ तथा च वायवीये ॥ एतन्मनोमयं चक्रं मया सृष्टं विसृज्यते ॥ यत्रास्य शीर्यते नेमिः स देशस्तपसः शुभः ॥
इत्युक्त्वा सूर्यसंकाशं चक्रं सृष्ट्वा मनोमयं ॥ प्रणिपत्य महादेवं विससर्ज पितामहः ॥ तेपि हृष्टतरा विप्राः प्रणम्य जगतां प्रभुं ॥ प्रययुस्त
स्य चक्रस्य यत्र नेमिर्व्यशीर्यत ॥ तद्वनं तेन विख्यातं नैमिशं मुनिपूजितमिति ॥ नैमिष इति पाठे वराहपुराणोक्तं द्रष्टव्यं ॥ तथा हि ॥ गौरमु

नैमिषेऽनिमिषक्षेत्रे ऋषयः शौनकादयः ॥ सत्रं स्वर्गाय लोकाय सहस्रसममासत ॥४॥

खमृषिं प्रति भगवद्वाक्यं एवं कृत्वा ततो देवो मुनिं गौरमुखं तदा ॥ उवाच निमिषेणेदं निहतं दानवं बलं ॥ अरण्येस्मिंस्ततस्त्वेतन्नैमिषार
ण्यसंज्ञितं ॥ भविष्यति यथार्थं वै ब्राह्मणानां विशेषकमिति ॥ अनिमिषः श्रीविष्णुः अलुप्तदृष्टित्वात्तस्य क्षेत्रे ॥ तथा चात्रैव शौ
नकादिवचनं ॥ क्षेत्रेस्मिन्वैष्णवे वयमिति ॥ स्वर्गो गीयत इति स्वर्गो यो हरिः स एव लोको भक्तानां निवासस्थानं तस्मै ॥ तत्प्राप्त्य
इत्यर्थः ॥ सहस्रं समाः संवत्सराः अनुष्ठानकालो यस्य तत्सत्रं ॥ सत्रसंज्ञकं कर्मोद्दिश्य आसत उपविविशुः ॥ पद्म ॥ आसतत्य कु ५
र्वतेत्यर्थः ॥ आ[illegible]नति निर्वपति जपयंतीत्यादिवत्सत्रपयोच्चारणमात्रार्थत्वेनाऽऽसधात्वर्थस्याऽविवक्षितत्वात ॥४॥ ॥ ॥

प्रातःकाले हुताः हुता अग्नयो यैस्ते॥ अनेन नित्यनैमित्तिकहोमसाकल्यं दर्शितं॥ इदं वक्ष्यमाणमादरात्पप्रच्छुः॥५॥ विविदिषिता
नर्थान्प्रष्टुं सूतस्य सर्वशास्त्रज्ञानातिशयमाहुः॥ त्वयेति त्रिभिः॥ इतिहासो महाभारतादिः तत्सहितानि न केवलमधीतानि अपि
तु आख्यातानि च तत्र अपि यानि धर्मशास्त्राणि तान्यपि॥६॥ किंच यानीत्यादि विदां विदुषां मध्ये श्रेष्ठः व्यासः यानि वेद परावरे
गुणनिर्गुणे ब्रह्मणी विदंतीति तथान्यपि व्याख्यातानि॥७॥ वेत्थ जानासि सौम्य हे साधो॥ तेषामनुग्रहात्तत्त्वतो ज्ञाने हेतुमाह॥ ब्रू
न्या नि

ते एकदा तु मुनयः प्रातर्हुतहुताग्नयः॥ सत्कृतं सूतमासीनं पप्रच्छुरिदमादरात्॥५॥ ऋषय ऊचुः॥ त्वया खलु पुराणानि से
तिहासानि चानघ॥ आख्यातान्यप्यधीतानि धर्मशास्त्राणि यान्युत॥६॥ यानि वेदविदां श्रेष्ठो भगवान्बादरायणः॥ अन्ये च
मुनयः सूत परावरविदो विदुः॥७॥ वेत्थ त्वं सौम्य तत्सर्वं तत्त्वतस्तदनुग्रहात्॥ ब्रूयुः स्निग्धस्य शिष्यस्य गुरवो गुह्यम
प्युत॥८॥ तत्र तत्रांजसाऽऽयुष्मन्भवता यद्विनिश्चितं॥ पुंसामेकांततः श्रेयः तन्नः शंसितुमर्हसि॥९॥ प्रायेणा
ल्पाऽऽयुषः सभ्य कलावस्मिन्युगे जना॥ मंदाः सुमंदमतयो मंदभाग्या ह्युपद्रुताः॥१०॥

युरिति॥ स्निग्धस्य प्रेमवतः गुह्यं रहस्यमपि ब्रूयुरेव॥८॥ अंजसा आर्जवेन एकांततः श्रेयः अव्यभिचारि श्रेयःसाधनं॥९॥
अन्येपि वक्तृनाकेन वक्तृशास्त्रश्रवणादिभिः विनिश्चितं त्वं तु नेत्याहुः॥ प्रायेणेति हे सभ्य साधो अस्मिन्युगे कलौ अल्पायुषो ज
नाः तत्रापि मंदाः अलसाः॥ तत्रापि सुमंदमतयः॥ तत्रापि मंदभाग्याः विघ्नाकुलाः॥ तत्रापि उपद्रुताः रोगादिभिः॥१०॥ ४

न च बहुशास्त्रश्रवणेपि तावतैव फलसिद्धिरित्याह॥ भूरीणि कर्माण्यनुष्ठेयानि येषु तानि॥ समुद्धृत्य यथावदुद्धृत्य येन उद्धृतवचनेन आत्मा बुद्धिः संप्र
सीदति॥ सम्यगुपशाम्यति॥११॥ अष्टांतरं सूत जानासीति पंचभिः॥ भद्रं ते इत्यौत्सुक्येनाशीर्वादः। भगवान्निरतिशयैश्व[redacted]र्यादिगुणः। सात्वतां सत्त्वा
हेन सत्त्वमूर्तिर्भगवानुपास्यते याविधते येषां इति सत्वंतो भक्ताः स्वार्थे ऽण् राक्षसवायसा देवता। तस्य चाण्श्रवणमार्षं॥ तदेवं सात्वत इति भवति॥
तेषां पतिः पालकः। यस्यार्थे विशेषस्य चिकीर्षया॥ वसुदेवस्य भार्यायां देवक्यां तेः॥१२॥ अंग हे सूत नो वर्णयितुमर्हसि॥ सामान्यतस्तावत् यस्याव
तारो भूतानां क्षेमाय पालनाय भवाय समृद्धये॥१३॥ तत्र नामकमनुवर्णयंस्तस्य यशःश्रवणौत्सुक्यमाविष्कुर्वंति आपन्न इति त्रिभिः॥ संसृ

भूरीणि भूरिकर्माणि श्रोतव्यानि विनागशः॥ अतः साधोऽत्र यत्सारं समुद्धृत्य मनीषया॥११॥ ब्रूहि नः श्रद्दधानानां येनात्मा संप्रसी
दति॥ सूत जानासि भद्रं ते भगवान्सात्वतांपतिः॥ देवक्यां वसुदेवस्य जातो यस्य चिकीर्षया॥१२॥ तन्नः शुश्रूषमाणानामर्हस्यंगा
नुवर्णितुं॥ यस्यावतारो भूतानां क्षेमाय च भवाय च॥१३॥ आपन्नः संसृतिं घोरां यन्नाम विवशो गृणन्॥ ततः सद्यो विमुच्ये
त यद्बिभेति स्वयं भयं॥१४॥ यत्पादसंश्रयाः सूत मुनयः प्रशमायनाः॥ सद्यः पुनंत्युपस्पृष्टाः स्वर्धुन्यापोनुसेवया॥१५॥ को
वा भगवतस्तस्य पुण्यश्लोकेड्यकर्मणः॥ शुद्धिकामो न शृणुयाद्यशः कलिमलापहं॥१६॥ तस्य कर्माण्युदाराणि परिगीतानि
सूरिभिः॥ ब्रूहि नः श्रद्दधानानां लीलया दधतः कलाः॥१७॥

तिमापन्नः प्राप्तः॥ विवशोपि ततः संसृतेः॥ अत्र हेतुः। यद्यतो नाम्नः भयमपि स्वयं बिभेति॥१४॥ किंच यस्य पादः संश्रयो येषां अत एव प्रशामायनं व
र्त्म आश्रयो वा येषां ते मुनयः उपस्पृष्टाः संनिधिमात्रेण सेविताः सद्यः पुनंति स्वर्धुनी गंगा तस्या आपस्तु तत्पादान्निःसृताः नन्तु तत्रैव तिष्ठंति॥ अतस्त
त्संबंधेन पुनंत्योपि अनुसेवया पुनंति न तु सद्य इति मुनीनामुत्कर्षोक्तिः॥१५॥ पुण्यश्लोकैरीड्यानि स्तव्यानि कर्माणि यस्य तस्य यशः कलिमलाप
हं संसारदुःखोपशमनं॥१६॥ अष्टांतरं तस्यैति महांतीति विकासस्याद्दीनि सूरिभिर्नारदादिभिः कालांशस्य रुद्रादिमूर्तीः॥१७॥ ॥ ॥श्री॥

भा॰ प्र॰
५

अथेति प्रश्नांतरे। अवतारकथाः स्थित्यर्थमेव। तत्तदवसरे ये मत्स्याद्यवताराः तदाश्रयाः कथाः स्वैरं लीलाः कुर्वतः श्रीकृष्णावतारप्रयोजनप्रश्नेनैव त
अरितं यद्यशः प्रश्नोपि जातएवेति ज्ञातव्यं॥१८॥ एवमत्योत्कंठेन पुनरपि तच्चरितान्येव श्रोतुमिच्छंतस्तत्रात्मनस्तत्स्पृहाभावमावेदयंति वयं त्विति। योग
यागादिषु तृप्ताः स्म उद्गच्छति॥ तमो यस्मात् स उत्तमस्तथाभूतः श्लोको यशो यस्य तस्य विक्रमे तु विशेषेण न तृप्यामः अलमिति न मन्यामहे। तत्र
हेतुः॥ यद्विक्रमं शृण्वतां यद्वान्येषां पुनाम वयं तु नेति तु शब्दस्यान्वयः॥ अयमर्थः॥ त्रेधा खलं बुद्धिर्भवति। उदरादिपूरणेन वा रसाज्ञानेन वा।
स्वादुविशेषाभावाद्वा। तत्र शृण्वतामित्यनेन श्रोत्रस्याकाशत्वात् न पूरणमित्युक्तं। रसज्ञानामित्यनेन न चाज्ञानं ततः पशुवत्तृप्तिर्निराकृता। स्व

अथाख्याहि हरेर्धीमन्नवतारकथाः शुभाः। लीला विदधतः स्वैरमीश्वरस्यात्ममायया॥१८॥ वयं तु न वितृप्याम उत्तमश्लोकविक्र
मे। यच्छृण्वतां रसज्ञानां स्वादु स्वादु पदे पदे॥१९॥ कृतवान्किल वीर्याणि सह रामेण केशवः। अतिमर्त्यानि भगवान्गूढः कपटमान
वः॥२०॥ कलिमागतमाज्ञाय क्षेत्रेस्मिन्वैष्णवे वयं। आसीना दीर्घसत्रेण कथायां सक्षणा हरेः॥२१॥ त्वं नः संदर्शितो धात्रा दु
स्तरं निस्तितीर्षतां। कलिं सत्वहरं पुंसां कर्णधार इवार्णवं॥२२॥ ब्रूहि योगेश्वरे कृष्णे ब्रह्मण्ये धर्मवर्मणि। स्वां काष्ठामधुनोपे
ते धर्मः कं शरणं गतः॥२३॥ इति श्रीभागवते महापुराणे पारमहंस्यां संहितायां प्रथमे नैमिषेयोपाख्याने प्रथमोध्यायः॥१॥ ॥

नत्तणवद्रसांतराभावेन तृप्तिं निराकरोति॥ पदे पदे प्रतिक्षणं स्वादुतोपि स्वादु॥१९॥ अतः कृष्णस्य चरित्राणि कथयेत्याशयेनाहुः॥ कृतवानिति॥ अ
तिमर्त्यानि मर्त्यानतिक्रांतानि गोवर्धनोद्धरणादीनि॥ मनुष्येष्वसंभावितानीत्यर्थः॥२०॥ ननु यजनाध्यापनादिस्वधर्मणं कुत एतच्छ्रवणएवकाग्राः स्था
त। अत आहुः॥ कलिमागतं ज्ञात्वा तत्क्रियात् विष्णुपदं गंतुं कामा दीर्घसत्रेण निमित्तेनासीना हरेः कथायां सक्षणाः लब्धावसराः॥ अस्मिंश्च समये त्व
द्दर्शनमीश्वरेणैव संपादितमिति अभिनंदंति॥ त्वमिति॥ कलिं निस्तर्तुमिच्छतां अर्णवं तितीर्षतां कर्णधारो नाविक इव॥२२॥ पुनः प्रश्नांतरं ब्रूही
ति धर्मस्य वर्मणि कवचवद्रक्षके स्वां काष्ठां मर्यादां स्वरूपमित्यर्थः॥ अस्य चोत्तरं॥ कृष्णे स्वधामोपगते धर्मज्ञानादिभिः सह इति अयं श्लोकः॥२३॥ प्रथमे ५
भावार्थदीपिकायां प्रथमोध्यायः॥

तदेवं प्रथमेऽध्याये षट् प्रश्ना मुनिभिः कृताः॥ द्वितीये सूत्तरं स्स्तुतः चतुर्णामाह तेष्वथ॥ विप्राणामिति एवं भूतैः सम्यक् प्रश्नैः सम्यक् हृष्टः रोमहर्षण
स्य पुत्रः उग्रश्रवाः॥ तेषां वचः अतिपूज्य सत्कृत्य प्रवक्तुमुपचक्रमे॥ उपक्रांतवान्॥१॥ प्रवचनस्योपक्रमे नामगुरुदेवतानमस्कार इति तं माह त्रि
भिः॥ यमिति॥ तत्र स्वगुरोः शुकस्यैश्वर्यं तच्चरितेनैव द्योतयन्नाह॥ यं प्रव्रजंतं संन्यस्य गच्छंतं॥ अनुपेतं मामुपनयस्वेत्युपनयनार्थमनुपसन्नं॥ य
द्वा केनाप्यनुपेत अननुगतमेकाकिनमित्यर्थः॥ तत्र हेतुः अपेतकृत्यं कृत्यमवश्यकर्ममार्गः अप्रवर्त्तमानं॥ नैष्ठिकत्वात् द्वैपायनो व्यासः विरहात्का
तरो भीतः पुत्र इति स्नुतेनाजुहाव आहूतवान्॥ दूराद्धाने प्लुते सत्यपि संधिरार्षः॥ तदा तन्मयतया शुकरूपतया तरवोऽभिनेदुः॥ प्रत्युत्तरमु

व्यास उवाच॥ इति संप्रश्नसंहृष्टो विप्राणां रौमहर्षणिः॥ प्रतिपूज्य वचस्तेषां प्रवक्तुमुपचक्रमे॥ सूत उवाच॥ यं प्रव्रजंतमनुपेतमपे
तकृत्यं द्वैपायनो विरहकातर आजुहाव॥ पुत्रेति तन्मयतया तरवोऽभिनेदुः तं सर्वभूतहृदयं मुनिमानतोऽस्मि॥२॥ यः स्वानुभावमखि
लश्रुतिसारमेकमध्यात्मदीपमतितितीर्षतां तमोंधं॥ संसारिणां करुणयाह पुराणगुह्यं तं व्याससूनुमुपयामि गुरुं मुनीनां॥३॥ ना
रायणं नमस्कृत्य नरं चैव नरोत्तमं॥ देवीं सरस्वतीं व्यासं ततो जयमुदीरयेत्॥४॥

कृतवंतः॥ पितुः स्नेहानुबंधपरिहाराय पुत्रोवृत्तरूपेणोत्तरं दत्तवानित्यर्थः॥ तं मुनिमानतोऽस्मि॥ तन्मयतोपपादनाय विशेषणं सर्वभूतानां हृत्मनः
अयते योगबलेन प्रविशतीति सर्वभूतहृदयः तं॥ कृपालुतां दर्शयन्नाह॥ य इति॥ अंधं गाढं तमः संसाराख्यं अतितरितुमिच्छतां पुराणानां मध्ये
गुह्यं गोप्यं॥ तत्र हेतुत्वेन चत्वारि विशेषणानि स्वः निजः असाधारण अनुभावः॥ प्रभावो यस्य तत्स्वानुभावं॥ अखिलश्रुतीनां सारं॥ एकमद्वि
तीयं॥ अनुपममित्यर्थः॥ आत्मानं कार्यकारणसंघातमधिकृत्य वर्त्तमानमात्मतत्वमध्यात्मं तस्य दीपं साक्षात्प्रकाशकं॥ उपयामि शरणं व्रजा
मि॥३॥ एवंविधं पुराणं श्रीभागवतं प्रवर्त्तयामास तं॥ एवं शास्त्यं गुरुं नमस्कृत्य देवं प्रणमति॥ जयत्यनेन संसारमिति जयो ग्रंथः॥ तमुदीरयेदिति॥ अ

भा० प्र० तेषां वचः प्रतिपूज्येति युक्तं तत्स्तुतिपूजनं करोति ॥ हे मुनयः साधु यथा भवति तथाहं पृष्टः ॥ यतो लोकानां मंगलमेतत् यत् यतः कृष्णविषयः सं
प्रश्नः कृतः ॥ सर्वशास्त्रार्थसारोद्धारप्रश्नस्यापि कृष्णपर्यवसानादेवमुक्तं ॥५॥ तत्र यत्प्रथमं पृष्टं सर्वशास्त्रसारमेकांतिकं श्रेयो ब्रूहीति तत्रोत्त
ल रं स वै पुंसामिति अयमर्थः ॥ धर्मो द्विविधः ॥ प्रवृत्तिलक्षणो निवृत्तिलक्षणश्च तत्र यः स्वर्गाद्यर्थः प्रवृत्तिलक्षणः सोऽपरः यतस्तु धर्माच्छ्रव
णादिलक्षणा भक्तिर्भवति स परो धर्मः ॥ स एवैकांतिकं श्रेय इति ॥ कथंभूता ॥ अहैतुकी ॥ हेतुः फलानुसंधानं तद्रहिता ॥ अप्रतिहता वि
घ्नैरनभिभूता ॥६॥ ननु तमेवमात्मानं वेदानुवचनेन ब्राह्मणा विविदिषंति ॥ यज्ञेन दानेन तपसाऽनाशकेनेत्यादिश्रुतिभ्यो धर्मस्य ज्ञा

मुनयः साधु पृष्टोऽहं भवद्भिर्लोकमंगलं ॥ यत्कृतः कृष्णसंप्रश्नो येनात्मा सुप्रसीदति ॥५॥ स वै पुंसां परो धर्मो यतो भक्तिरधोक्षजे ॥ अ
हैतुक्यप्रतिहता ययात्मा संप्रसीदति ॥६॥ वासुदेवे भगवति भक्तियोगः प्रयोजितः ॥ जनयत्याशु वैराग्यं ज्ञानं यत्तदहैतुकं ॥७॥
॥ धर्मः स्वनुष्ठितः पुंसां विष्वक्सेनकथासु यः ॥ नोत्पादयेद्यदि रतिं श्रम एव हि केवलं ॥८॥

नांगत्वं प्रसिद्धं ॥ तत्कुतो भक्तिहेतुत्वमुच्यते ॥ सत्यं तत्तु भक्तिद्वारेणेत्याह वासुदेव इति अहैतुकं शुष्कतर्काद्यगोचरं औपनिषदमित्यर्थः ॥७॥ व्य
तिरेकमाह धर्म इति यो धर्म इति प्रसिद्धः स यदि विष्वक्सेनस्य कथासु रतिं नोत्पादयेत् ॥ तर्हि स्वनुष्ठितोपि सन्नयं श्रमो ज्ञेयः ॥ ननु मोक्षार्थस्यापि
धर्मस्य श्रमत्वमस्त्येव ॥ अत आह ॥ केवलं विफलं श्रम इत्यर्थः ॥ नन्वस्ति तत्रापि स्वर्गादिफलमित्याशंक्यैवकारेण निराकरोति ॥ क्षयिष्णु
त्वान्न तत्फलमित्यर्थः ॥ नन्वक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवतीत्यादिश्रुतेः तत्फलस्य नक्षयिष्णुत्वमित्याशंक्य हिशब्देन साधयति
तो तद्यथेह कर्मजितो लोकः क्षीयते एवमेवामुत्र पुण्यजितो लोकः क्षीयत इति तर्कानुगृहीतया श्रुत्या क्षयिष्णुत्वप्रतिपादनात् ॥८॥ ॥ श्री ॥ ६

तदेवं हरिभक्तिद्वारा तदुदितवैराग्यात्मज्ञानपर्यंतः परो धर्म इत्युक्तं । अन्ये तु मन्यंते धर्मस्यार्थः फलं । तस्य च कामः फलं तस्य चेंद्रियप्रीतिः । तत्प्रीतेश्च पुनरपि धर्मार्थादिपरंपरेति । तथाहुः । धर्मादर्थश्च कामश्च स किमर्थं न सेव्यत इत्यादि । तन्निराकरोति । धर्मस्येति द्वाभ्यां । आपवर्ग्यस्य उक्तन्यायेन अपवर्गपर्यंतस्य । अर्थाय फलत्वाय अर्थो नोपकल्पते योग्यो न भवति । तथार्थस्यापि धर्मै॰ कांतधर्माव्यभिचारिणः कामो लाभाय फलत्वाय न हि स्मृतो मुनिभिः ॥ ९ ॥ कामस्य विषयभोगस्य च इंद्रियप्रीतिर्लाभः फलं न भव

धर्मस्य ह्यापवर्ग्यस्य नार्थोऽर्थायोपकल्पते । नार्थस्य धर्मैकांतस्य कामो लाभाय हि स्मृतः ॥ ९ ॥ कामस्य नेंद्रियप्रीतिर्लाभो जीवेत यावता ॥ जीवस्य तत्त्वजिज्ञासा नार्थो यश्चेह कर्मभिः ॥ १० ॥ वदंति तत्तत्त्वविदः तत्त्वं यज्ज्ञानमद्वयं ॥ ब्रह्मेति परमात्मेति भगवानिति शब्द्यते ॥ ११ ॥

ति । किं तु यावता जीवेत तावानेव कामस्य लाभः । जीवनपर्याप्त एव कामः सेव्य इत्यर्थः । जीवस्य जीवनस्य च पुनः कर्मानुष्ठानद्वारा कर्मभिर्य इह प्रसिद्धः सोऽर्थो न भवति किं तु तत्त्वजिज्ञासैवेति १० ननु च तत्त्वजिज्ञासा नाम धर्मजिज्ञासैव धर्म एव हि तत्त्वमिति केचित् तत्राह तत्त्वविदस्तु तदेव तत्त्वं वदंति किं तत् यज्ज्ञानं नाम अद्वयमिति क्षणिकविज्ञानपक्षं व्यावर्त्तयति न नु तत्त्वविदोऽपि विगीतवचना एव नैवं तस्यैव तत्त्वस्य नामांतरैरभिधानादित्याह औपनिषदैर्ब्रह्मेति हैरण्यगर्भैः परमा

च त्मेति सात्वतैर्भगवानिति अभिधीयते ॥ ११ ॥

भा० प्र० तच्चतत्वंसपरिकरयाभक्त्यैवप्राप्यतइत्याह । तच्छ्रद्दधानाइत्यन्वयः । ज्ञानवैराग्ययुक्तयेत्यत्रज्ञानंपरोक्षं । तच्चतत्वं । आत्मनिहृदेत्र
७ हृयेपश्यंति । किंतत् । आत्मानंपरमात्मानंश्रुतेनवेदांतादिश्रवणेनगृहीतयाभक्त्येति । भक्तेर्दार्ढ्यमुक्तं ।१२। धर्मस्यफ
लेनभक्तिः नार्थकामादिकमितीममर्थं ॥ उपपादितोपसंहरतिहेद्विजश्रेष्ठाःहरितोषणंहरेराराधनंसंसिद्धिःफल

तच्छ्रद्दधानामुनयोज्ञानवैराग्ययुक्तया ॥ पश्यंत्यात्मनिचात्मानंभक्त्याश्रुतगृहीतया ।१२। अतःपुंभिर्द्वि
जश्रेष्ठाःवर्णाश्रमविभागशः । स्वनुष्ठितस्यधर्मस्यसंसिद्धिर्हरितोषणं ॥१३॥ तस्मादेकेनमनसाभगवा
श्री२ न्सात्वतांपतिः । श्रोतव्यःकीर्तितव्यश्चध्येयःपूज्यश्चनित्यदा ।१४। यदनुध्यासिनायुक्ताःकर्मग्रंथिनिबंधनं
छिंदंतिकोविदास्तस्यकोनकुर्यात्कथारतिं ॥१५॥
दा

१३ यस्माच्चभक्तिहीनोधर्मःकेवलंश्रमएवेतिप्रपंचितं १४ इदानींभक्तेर्मुक्तिफलत्वंप्रपंचयति । यदिति । यस्यानुध्यानमनु
ध्यानंसैवासिःखड्गः तेनयुक्ताःविवेकिनःग्रंथिमहंकारंनिबध्नाति । यत्कर्मतच्छिंदंतितस्यकथायांरतिंकोनकुर्यात् ।१५। ए
वंतस्माद्भक्तिप्रधानएवधर्मोनुष्ठेयइत्याह तस्मादिति । एकेनएकाग्रेणमनसा । भक्तिरहितोधर्मःकेवलंश्रमः + श्री श्री ।

ननु सत्यमेवं क[र्म]निर्मलिनां हरिकथारतिः । तथापि तस्यां रुचिर्नोत्पद्यते किं कुर्यात् तत्राह ॥ शुश्रूषोरिति ॥ पुण्यतीर्थनिषेवणा-
द्धि निःपापस्य महत्सेवा स्यात्तया च तद्धर्मश्रद्धा ततः श्रवणेच्छा ततो रुचिः स्यादित्यर्थः ॥ १६ ॥ ततश्च एवं तामिति ॥ पुण्ये पुण्य-
दे श्रवणकीर्त्तने यस्य सः सतां सुहृत् हितकारी हृदि स्थितो ऽभद्राणि कामादिवासनाः तानि अंतस्थः हृदयस्थः सन् ॥ १७ ॥ त-
तश्च नष्टप्रायेष्विति । सर्वात्मना नाशस्य ज्ञानोत्तरकालत्वात् प्रायग्रहणं ॥ भागवतां भागवतशास्त्रस्य वा सेवया ॥ नैष्ठिकी नि-

शुश्रूषोः श्रद्दधानस्य वासुदेवकथारुचिः ॥ स्यान्महत्सेवया विप्राः पुण्यतीर्थनिषेवणात् ॥ १६ ॥ शृण्वतां स्वक-
थां कृष्णः पुण्यः श्रवणकीर्त्तनः ॥ हृद्यंतस्थो ह्यभद्राणि विधुनोति सुहृत्सतां ॥ १७ ॥ नष्टप्रायेष्वभद्रेषु नित्यं भा-
गवतसेव[या] ॥ भगवत्युत्तमश्लोके भक्तिर्भवति नैष्ठिकी ॥ १८ ॥ तदा रजस्तमोभावाः कामलोभादयश्च ये ॥ चेत
एतैरनाविद्धं स्थितं सत्वे प्रसीदति ॥ १९ ॥ एवं प्रसन्नमनसो भगवद्भक्तियोगतः ॥ भगवत्तत्वविज्ञानं मुक्तसंग-
स्य जायते ॥ २० ॥ भिद्यते हृदयग्रंथिश्छिद्यंते सर्वसंशयाः ॥ क्षीयंते चास्य कर्माणि दृष्ट एवात्मनीश्वरे ॥ २१ ॥

श्चला विक्षेपकाभावात् ॥ १८ ॥ रजस्तमश्च ये च तत्प्रभवाः भावाः कामादयः एतैरनाविद्धं अनभिभूतं प्रसीदति । उप-
शाम्यति ॥ १९ ॥ भगवद्भक्तियोगतः प्रसन्नमनसः अत एव मुक्तसंगस्य । २० । ज्ञानफलमाह ॥ भिद्यत इति । हृदयमेव ग्रं-
थिः चिज्जडग्रंथनरूपोऽहंकारः अत एव सर्वसंशयाः असंभावनादिरूपाः कर्माण्येवनारब्धफलानि आत्मनि स्वरू-
पत्वेनेश्वरे दृष्टे एवकारेण ज्ञानांतरमेवेति दर्शयति ॥ २१ ॥

अत्रसदाचारंदर्शयन्नुपसंहरति।अतइति॥आत्मनःप्रसादनींमनःशोधनींवासुदेवेभक्तिंकुर्वंतीतिनउनीयविशेषोद
र्शितः।२२।तदेवोपपादयितुंब्रह्मादीनांत्रयाणामेकात्मकत्वेपिवासुदेवस्याधिक्यमाह॥सत्वमिति।इहपद्यएकएवपरः
पुमान्॥अस्यविश्वस्यस्थित्यादयेस्थितिसृष्टिप्रलयार्थंसंज्ञाःकेवलनिनाधत्ते॥हरिविरिंचिहरइतिवक्तव्येसंधिरा
र्षः॥तत्रतेषांमध्येश्रेयांसिशुभफलानिसत्वतनोर्वासुदेवादेवस्युः।२३।उपाधिविशेषेणफलविशेषंसदृष्टा

अतोवैकवयोनित्यंभक्तिंपरमयामुदा॥वासुदेवेभगवतिकुर्वंत्यात्मप्रसादनीं॥२२॥सत्वंरजस्तमइतिप्रकृते कं
र्गुणास्तैर्युक्तः परः पुरुषएकइहास्यधत्ते॥स्थित्यादयेहरिविरिंचिहरेतिसंज्ञाःश्रेयांसितत्रखलुसत्वतनो
र्नृणांस्युः।२३॥पार्थिवाद्दारुणोधूमस्तस्मादग्निस्त्रयीमयः।तमसस्तुरजस्तस्मात्सत्वंयतब्रह्मदर्शनं।२४।

८

तमाह।पार्थिवात्त्वतःप्रवृत्तिप्रकाशरहितात्दारुणःकाष्ठात्सकाशात्धूमःप्रवृत्तिमानवत्रयीमयःवेदोक्तकर्म
प्रचुरःईषत्कर्मप्रत्यासत्तेःतस्मादपिअग्निस्त्रयीमयःसाक्षात्कर्मसाधन[illegible]त्वात्एवंतमसःसकाशाद्रजोब्रह्मदर्श
नंब्रह्मप्रकाशकं।तत्त्वाव्देनलयात्मकात्तमसःसकाशाद्रजःसोपाधिकज्ञानहेतुत्वेनकिंचितब्रह्मदर्शनंप्रत्यासन्निमा
त्रमुक्तं॥नतुसर्वथातत्प्रकाशकत्वं॥विक्षेपकत्वात्॥यत्सत्वंतत्साक्षात्ब्रह्मदर्शनंअतस्तद्गुणोपाधीनांब्रह्मादीना ८
मपियथोत्तरंवैशिष्ट्यमितिभावः।२४॥

वासुदेवभक्तौ पूर्वाचारं प्रमाणयति । भेजिर इति अथातो हेतोः ॥ अग्रे पुरा विशुद्धसत्वमूर्त्तिं भगवंतं अधोक्षजं भेजिरे अ
तो ये तान् मुनीन् अनुवर्त्तंते ते इह संसारे क्षेमाय मोक्षाय कल्पंते । २५ । नन्वन्यानपि केचिद्भजंतो दृश्यंते । सत्यं । मुमुक्षवस्तु वि
अन्यान्न भजंति । किंतु सकामा एवेत्याह ॥ मुमुक्षव इति द्वाभ्यां ॥ भूतपतीनिति पितृप्रजेशादीनां उपलक्षणं । अनसूयवः
देवतांतरानिंदकाः संतः । २६ ॥ रजस्तमसी प्रकृतिः स्वभावो येषां ते ॥ अत एव पितृभूतादिभिः समं शीलं येषां ते । श्रिया सह

भेजिरे मुनयोथाग्रे भगवंतमधोक्षजं । सत्वं विशुद्धं क्षेमाय कल्पंते ये नु तानिह ॥ २५ ॥ मुमुक्षवो घोररूपा
न्हित्वा भूतपतीनथ ॥ नारायणकलाः शांता भजंति ह्यनसूयवः ॥ २६ ॥ रजस्तमःप्रकृतयः समशीलाः भ
जंति वै । पितृभूतप्रजेशादीन् श्रियैश्वर्यप्रजेप्सवः ॥ २७ ॥ वासुदेवपरा वेदा वासुदेवपरा मखाः ॥ वासु
देवपरा योगा वासुदेवपराः क्रियाः ॥ २८ ॥

ऐश्वर्यं प्रजाश्च इच्छंतीति तथा ते ॥ २७ ॥ मोक्षप्रदत्वाद्वासुदेवो भजनीय इत्युक्तं ॥ सर्वशास्त्रतात्पर्यगोच [illegible] रत्वादपी-
त्याह । द्वाभ्यां ॥ वासुदेवः परः तात्पर्यगोचरो येषां ते ॥ ननु वेदाः मखपरा दृश्यंते इत्याशंक्य तेपि तदाराधनार्थत्वात्तत्प
रा एवेत्युक्तं ॥ योगाः योगशास्त्राणि तेषामप्यासनप्राणायामादिक्रियापरत्वमाशंक्य तासामपि तत्प्राप्त्युपायत्वात्तत्प
रत्वमुक्तं । २८ ॥

भा०प्र० ज्ञानं ज्ञानशास्त्रं । ननु तत् ज्ञानपरमेवेत्यत्राह । ज्ञानस्यापि तत्परत्वमुक्तं ॥ तपोऽत्र ज्ञानं ॥ धर्मो धर्मशास्त्रं दानव्रतादि-
९ विषयं । ननु तत्स्वर्गपरमित्याशंक्याह गम्यत इति गतिः स्वर्गादिफलं सापि तद्दत्तानंदांशरूपत्वात्तत्परैवेत्युक्तं ॥ यद्वा ॥ वेदाद्-
त्यनैनैव तन्मूलत्वात्सर्वाण्यपि वासुदेवपराणीत्युक्तं ॥ तत्र ननु तेषां मखयोगक्रियादीनां नानार्थपरत्वान्न तदेक-

वासुदेवपरं ज्ञानं वासुदेवपरं तपः ॥ वासुदेवपरो धर्मो वासुदेवपरा गतिः ॥२९॥ स एवेदं ससर्जाग्रे
भगवानात्ममायया । सदसद्रूपया चासौ गुणमय्याऽगुणो विभुः ॥३०॥

परत्वमित्याशंक्य मखादीनामपि तत्परत्वमित्युक्तमिति द्रष्टव्यं । २९ ॥ ननु जगत्सर्गप्रवेशनियमनादिलीलायुक्ते वस्तुनि
सर्वशास्त्रसमन्वयो दृश्यते ॥ कथं वासुदेवपरत्वं सर्वस्य तत्राह ॥ स एवेति चतुर्भिः ॥ एतैरेव श्लोकैस्तस्य कर्माण्युदाराणि
ब्रूहीति प्रश्नोत्तरं ॥ सदसद्रूपया कार्यकारणात्मिकया गुणमय्या च स्वान्वयः ॥ स्वतो निर्गुणोऽपि सन्निति शेषः ॥३०॥ ९

भगवतोलुगत्वकारणत्वमुक्तं। प्रवेशनियमनलक्षणां लीलामाह॥ तयेति। विलसितेषु कृतेषु गुणेषु आकाशादिषु अंतः
प्रविष्टः सगुणवानिव मदधीना एते गुणा इत्यभिमानवानिव न तु वस्तुतस्तथा॥ यतो विज्ञानेन चिच्छक्त्या विजृंभि
तोऽस्फूर्जितः॥३१॥ बहुरूपत्वलीलामाह। यथेति। स्वयोनिषु स्वाग्निखंडकेषु अवहितो निहितः। विश्वात्मा पुमान् पर
मेश्वरो भूतेषु प्राणिषु अंतर्यामिणोपि प्रतियोनि नानात्वेन नानात्वमिवेक्ष्यते। क्षेत्रज्ञरूपेण वा॥३२॥ भोगरूपां लीलामा

तया विलसितेष्वेषु गुणेषु गुणवानिव॥ अंतःप्रविष्ट आभाति विज्ञानेन विजृंभितः॥३१॥ यथा ह्यवहितो व
ह्निर्दारुष्वेकः स्वयोनिषु॥ नानेव भाति विश्वात्मा भूतेषु च तथा पुमान्॥३२॥ असौ गुणमयैर्भावैः भूतसूक्ष्मेंद्रि
यात्मभिः॥ स्वनिर्मितेषु निर्विष्टो भुंक्ते भूतेषु तद्गुणान्॥३३॥ भावयत्येष सत्त्वेन लोकान्वै लोकभावनः॥ लीला
वतारानुरतो देवतिर्यङ्नरादिषु॥३४॥ इति श्रीभागवते महापुराणे प्रथमस्कंधे द्वितीयोऽध्यायः २॥ ॥ ॥

ह। असौ हरिः भूतसूक्ष्माणि इंद्रियाणि च आत्मा मनश्चैतैः स्वयंनिर्मितेषु भूतेषु। तद्गुणान् तत्तदनुरूपान्विषयान् इ
च्छया भुंक्ते। भोजयतीति णिजर्थो वा ज्ञेयः। पालयतीति वा। तदात्मनेपदमार्षम् अनुजोनवत इति स्मरणात॥३३॥ इदानीं सूत ङा॥
नासीति प्रश्नोत्तरमाह। भावयति पालयति॥ एतत्तु सर्वावतारसाधारणं प्रयोजनं विशेषतः। कृष्णावतारस्य प्रयोजनं कुं
तीस्तुतौ वक्ष्यते॥ लोकभावनः लोककर्त्ता देवादिषु यल्लीलावतारास्तेष्वनुरतोऽनुरक्तः॥३४॥ इति प्रथमे टीकायां द्वितीयोऽध्या
यः। ।

भा०प्र० अवतारकथाप्रश्ने तृतीये तत्र तावत्त्रिधा॥ पुरुषाद्यवतारोक्त्या तच्चारित्रवर्णनैः॥१॥ यदुक्तं अथाख्याहि हरेर्धीमन अवतारकथाः शु
२० भा इति तदुत्तरत्वेनावतारान अनुक्रमिष्यन्प्रथमं पुरुषावतारमाह॥ जगृह इति पंचभिः॥ महदादिभिर्महदहंकारपंचतन्मात्रैरेकाद
शेंद्रियाणि पंचमहाभूतानीति षोडशकलाः अंशा यस्मिन् यद्यपि भगवद्विग्रहो नैव भूतस्तथापि विराड्जीवांतर्यामिणो भगवतो वि

सूत उवाच॥ जगृहे पौरुषं रूपं भगवान्महदादिभिः॥ संभूतं षोडशकलं आदौ लोकसिसृक्षया॥१॥
यस्यांभसि शयानस्य योगनिद्रां वितन्वतः॥ नाभिह्रदांबुजादासीत् ब्रह्मा विश्वसृजां पतिः॥२॥
यस्यावयवसंस्थानैः कल्पितो लोकविस्तरः॥ तद्वै भगवतो रूपं विशुद्धं सत्वमूर्जितं॥३॥ ॥

राड्रूपेणोपासनार्थमेवमुक्तमिति द्रष्टव्यं॥१॥ कोसौ भगवानित्यपेक्षायां तं विशिनष्टि॥ यस्यांभसि एकार्णवे शयानस्य विश्रांत
स्य तत्र च योगः समाधिः तद्रूपां निद्रां विस्तारयतः नाभिरेव ह्रदस्तस्मिन यदंबुजं तस्मात्सकाशात् ब्रह्मा आसीदस्मत्॥ पाद्मे कल्पे
स पौरुषं रूपं जगृहे॥२॥ कीदृशं रूपं तदाह॥ यस्येति॥ ननु कीदृशो विग्रहस्तस्य यो नसिद्धो तेस्म तदाह॥ तत्तस्य भगवतो रूपं तु विशुद्धं र २०
जस्ताद्यसंभिन्नं अत एवोर्जितं निरतिशयं सत्वं॥३॥

एतच्च योगिनां प्रत्यक्षमित्याह। पश्यंतीति। अदभ्रमनल्पं ज्ञानात्मकं चक्षुस्तेन सहस्रमपरिमितानि पादादीनि तैरद्भुतं सहस्रम्
मौल्यादयो यस्मिन्तत् सहस्राणि मौल्यादीनि तैरुल्लसत् शोभमानं ॥४॥ एतत्तु कूटस्थं। न त्वन्यावतारवदाविर्भावतिरोभाववदित्याह
एतदिति। आदिनारायणरूपं निधीयतेऽस्मिन्निति निधानं कार्यावसाने प्रवेशस्थानमित्यर्थः॥ बीजमुद्गमस्थानं। बीजत्वेऽपि नान्यव-
दतुल्यं॥ किंत्वव्ययं न केवलमवताराणामेव बीजं किंतु सर्वप्राणिनामपीत्याह॥ यस्यांशो ब्रह्मा तस्यांशो मरीच्यादिस्तेन ॥५॥ सनत्कु-

पश्यंत्यदो रूपमदभ्रचक्षुषा सहस्रपादोरुभुजाननाद्भुतं॥ सहस्रमूर्द्धश्रवणाक्षिनासिकं सहस्रमौल्यंबरकुंडलोल्ल-
सत्॥४॥ एतन्नानावताराणां निधानं बीजमव्ययं॥ यस्यांशांशेन सृज्यंते देवतिर्यङ्नरादयः॥५॥ स एव प्रथमं देवः
कौमारं सर्गमाश्रितः॥ चचार दुश्चरं ब्रह्मा ब्रह्मचर्यमखंडितं॥६॥ द्वितीयं तु भवायास्य रसातलगतां महीं॥
उद्धरिष्यन्नुपादत्त यज्ञेशः सौकरं वपुः॥७॥

माराद्यवतारं तच्चरितं चाह। स एवेति। कौमार आर्षः प्राजापत्यो मानव इत्यादीनि सर्गविशेषनामानि। यः पौरुषं रूपं जगृहे। स ए-
व देवः कौमाराख्यं सर्गमाश्रितः सन् ब्रह्मा ब्राह्मणो भूत्वा ब्रह्मचर्यं चचार॥६॥ प्रथममिति द्वितीयादिष्वपि निर्देशमात्रापेक्षया॥
अस्य विश्वस्य भवाय उद्भवाय॥ महीमुद्धरिष्यन्निति कर्मोक्तिः। एवं सर्वत्रावतारस्थले कर्मैवोक्तमित्यनुसंधेयं॥७॥

भा०प्र० नारदावतारमाह । तृतीयमिति । ऋषिसर्गमुपेत्य तत्र च देवर्षित्वमुपेत्येत्यर्थः ॥ सात्वतं वैष्णवं तंत्रं पंचरात्रागमं आचष्ट उक्तवान् । यत
११ स्तस्मान्निर्गतं कर्मबंधहेतुत्वं येभ्यः तानि निष्कर्माणि तेषां भावो नैष्कर्म्यं । कर्मणामेव मोचकत्वं यतो भवति तदाचष्ट इत्यर्थः ॥८॥ तु
र्येवतारे धर्मस्य कलाभार्यायामित्यर्थः ॥ अर्धो वा एष आत्मनो यत्पत्नीति श्रुतेः । तस्याः सर्गे ऋषी भूत्वेत्येकावतारतां दर्शयति
॥९॥ कपिलावतारमाह ॥ आसुरये तन्नाम्ने ब्राह्मणाय तत्वानां ग्रामस्य संघस्य विनिर्णयो यस्मिन् तत्सांख्यं ॥१०॥ दत्तात्रेया

तृतीयमृषिसर्गं वै देवर्षित्वमुपेत्य सः ॥ तंत्रं सात्वतमाचष्ट नैष्कर्म्यं कर्मणां यतः ॥८॥ तुर्ये धर्मकलासर्गे नरना
रायणावृषी भूत्वात्मोपशमोपेतमकरोद्दुश्चरं तपः ॥९॥ पंचमः कपिलो नाम सिद्धेशः कालविप्लुतं प्रोवाचा
सुरये सांख्यं तत्वग्रामविनिर्णयं ॥१०॥ षष्ठमत्रेरपत्यत्वं वृतः प्राप्तोऽनसूयया ॥ आन्वीक्षिकीमलर्काय प्र
ह्लादादिभ्य ऊचिवान् ॥११॥ ततः सप्तम आकूत्यां रुचेर्यज्ञोऽभ्यजायत ॥ स यामाद्यैः सुरगणैरपात्स्वायंभुवांतरं ॥
॥१२॥ अष्टमे मेरुदेव्यां तु नाभेर्जात उरुक्रमः ॥ दर्शयन्वर्त्म धीराणां सर्वाश्रमनमस्कृतं ॥१३॥ ॥ ॥ ॥

वतारमाह ॥ षष्ठमिति ॥ अत्रेरपत्यत्वं तेनैव वृतः सन् प्राप्तः ॥ अत्रेरपत्यमभिकांक्षत आह तुष्ट इति ॥ वक्ष्यमाणवाक्यं प्राप्तः
अनसूयया सत्या ह्यत्रापत्यमिषेणाहमेवापत्यत्वेन वृत इति दोषदृष्टिमकुर्वन्नित्यर्थः ॥ आन्वीक्षिकीमात्मविद्यां प्रह्लादा
दिभ्यश्च ॥११॥ यज्ञावतारमाह ॥ स यज्ञः यामाद्यैः । स्वस्यैव पुत्रा यामा नाम देवाः तदाद्यैः सह स्वायंभुवं मन्वंतरं पालितवान्
तदा स्वयमिंद्रोऽभूदित्यर्थः ॥१२॥ ऋषभावतारमाह ॥ सर्वाश्रमनमस्कृतं अत्याश्रमं पारमहंस्यं वर्त्म धीराणां दर्शयन् नाभे
राज्ञी धूपुत्रात ऋषभो जातः ॥१३॥

१२

पृथ्ववतारमाह। पार्थिवं वपुः राजदेहं पृथुरूपं पार्गांतरे पृथोरिदं पार्थिवं॥ औषधीरित्युपलक्षणं। इमां पृथिवीं सर्वाणि च वस्तूनि
दुग्धवान् दुग्ध अदुग्ध आगमन्नावस्यार्थः। हे विप्रास्तेन पृथ्वीदोहनेन सोयमवतारः उशत्तमः कमनीयतमः वशकांतावित्यस्मात्॥१४॥
२ मत्स्यावतारमाह। चाक्षुषमन्वंतरे यः उदधिसंप्लवः संप्लेषः। तस्मिन्न यद्यपि मन्वंतरावसाने प्रलयो नास्ति तथापि केनचित्कौतु
केन सत्यव्रताय माया प्रदर्शिता। यथा अष्टकांडे मार्कंडेयायेति दृष्ट्वा महीमय्यां नौकारूपायां महामित्यर्थः। अपात रक्षत रक्षत वा

ऋषिभिर्याचितो भेजे नवमं पार्थिवं वपुः। दुग्धेमामोषधीर्विप्रास्तेनायं स उशत्तमः॥१४॥ रूपं स जगृहे मात्स्यं चाक्षुषोदधिसंप्लवे॥
नाव्यारोप्य महीमय्यामपाद्वैवस्वतं मनुं॥१५॥ सुरासुराणामुदधिं मथ्नतां मंदराचलं। दध्रे कमठरूपेण पृष्ठ एकादशो विभुः॥
॥१६॥ धन्वंतरं द्वादशमं त्रयोदशममेव च। अपाययत्सुरानन्यान्मोहिन्या मोहयन् स्त्रिया॥१७॥ चतुर्दशं नारसिंहं बिभ्रद्दैत्ये
न्द्रमूर्जितं। ददार करजैर्वक्षस्येरकां कटकृद्यथा॥१८॥ पंचदशं वामनकं कृत्वागादध्वरं बलेः। पदत्रयं याचमानः प्रत्यादित्सुस्त्रि

त्र वैवस्वत इति नावनासंज्ञा॥१५॥ कूर्मावतारमाह॥ कमठः कूर्मः तद्रूपेण एकादशोवतारे विभुर्दध्रे दधार॥१६॥ धन्वंतर्यवतारमाह॥ धा
न्वंतरं धन्वंतरिरूपं॥ द्वादशमादिप्रयोगस्त्वार्षः। त्रयोदशमं च रूपं तच्चरितेन सह दर्शयति॥ अपाययदित्यत्र सुधामित्यध्याहारः॥ मो
हिन्याख्यया स्त्रीरूपेण अन्यान् असुरान् मोहयन्॥ धन्वंतरिरूपेणामृतमानीय मोहिन्या पाययदित्यर्थः॥१७॥ नृसिंहावतारमाह॥ ना
रसिंहं स्वरूपं बिभ्रत् एरकां निर्ग्रथितृणं॥१८॥ वामनावतारमाह॥ उष्टानां मदं वामयतीति वामनं कं रूपं। प्रत्यादित्सुः तस्मा
दाछिद्य गृहीतमिच्छुः॥१९॥

परशुरामावतारमाह। अवतार इति। त्रिभिः त्रिगुणं यथा भवति तथा सप्तकृत्वः सप्तवारान्। एकविंशतिवारानित्यर्थः॥२०॥
व्यासावतारमाह। अल्पमेधसः अल्पप्रज्ञान् पुंसो दृष्ट्वा तदनुग्रहार्थं शाखाश्चक्रे॥२१॥ रामावतारमाह। नरदेवत्वं राघवरूपे
ण प्राप्तः सन्। अतः परं अत्र शाद्दशो २२ रामकृष्णावतारमाह। विंशतितमे इति वक्तव्ये तकारलोपः छंदोनुरोधेन। रामकृ।

अवतारे षोडशमे पश्यन् ब्रह्मद्रुहो नृपान्। त्रिःसप्तकृत्वः कुपितो निःक्षत्रामकरोन्महीं॥२०॥ ततः सप्तदशे जातः
सत्यवत्यां पराशरात्। चक्रे वेदतरोः शाखा दृष्ट्वा पुंसोल्पमेधसः॥२१॥ नरदेवत्वमापन्नः सुरकार्यचिकीर्षया॥ स
त्रि मुद्रनिग्रहादीनि चक्रे वीर्याण्यतः परं॥२२॥ एकोनविंशे विंशतिमे वृष्णिषु प्राप्य जन्मनी॥ रामकृष्णाविति भुवो भग
वान् हरद्भरं॥२३॥ ततः कलौ संप्रवृत्ते संमोहाय सुरद्विषां॥ बुद्धो नाम्नाजिनसुतः कीकटेषु भविष्यति॥२४॥ अ
थासौ युगसंध्यायां दस्युप्रायेषु राजसु॥ जनिता विष्णुयशसो नाम्ना कल्किर्जगत्पतिः॥२५॥ अवतारा ह्यसंख्याता
हरेः सत्त्वनिधेर्द्विजाः। यथाविदासिनः कुल्याः सरसः स्युः सहस्रशः॥२६॥

कृष्णाविति एवं नामनी जन्मनी प्राप्य २३॥ अजिनस्य सुतः जिनसुत इति पाठे जिनः स एव कीकटेषु मध्येगयाप्रदेशे॥२४॥ क
ल्क्यवतारमाह॥ युगसंध्यायां कलेरंते विष्णुयशसो ब्राह्मणात् सकाशात् जनिष्यते॥२५॥ अनुक्तसर्वसंग्रहार्थमाह॥ अवतारा इ
ति। असंख्येयत्वे दृष्टांतः। यथेति। अविदासिनः उपक्षयशून्यात् दसु उपक्षय इत्यस्मात् सरसः सकाशात् कुल्याः क्षुद्रप्रवाहाः॥२६

विभूतीराहऋषयइतिः॥२७॥तत्रविशेषमाह।एतेचेति।पुंसःपरमेश्वरस्यकेचिदंशाःकेचित्कलाःविभूतयश्च।तत्रमत्स्यादीना
मवतारत्वेनसर्वज्ञत्वसर्वशक्तित्वेपियथोपयोगमेवज्ञानक्रियाशक्त्याविःकरणं।कुमारनारदादिष्वाधिकारिकेषुयथोपमंश योग
कलावेशः।पृथ्वादिषुशक्त्यावेशः।कृष्णस्तुभगवान्साक्षान्नारायणएवआविष्कृतसर्वशक्तित्वात्।सर्वेषांप्रयोजनमाह।इंद्रा
रयोदैत्यास्तैर्व्याकुलमुपद्रुतं।लोकंमृडयंति।सुखिनंकुर्वंति॥२८॥एतत्कीर्त्तनफलमाह।जन्मेति।गुह्यंअतिरहस्यं।जन्म

ऋषयोमनवोदेवामनुपुत्रामहौजसः।कलाःसर्वेहरेरेवसप्रजापतयस्तथा॥२७॥एतेचांशकलापुंसःकृष्णस्तुभगवान्
स्वयं॥इंद्रारिव्याकुलंलोकंमृडयंतियुगेयुगे॥२८॥जन्मगुह्यंभगवतोयएतत्प्रयतोनरः॥सायंप्रातर्गृणन्भक्त्या
दुःखग्रामाद्विमुच्यते॥२९॥एतद्रूपंभगवतोह्यरूपस्यचिदात्मनः॥मायागुणैर्विरचितंमहदादिभिरात्मनि॥३०॥

प्रयतःशुचिःसन्दुःखग्रामात्संसारात्॥२९॥विमुक्तइत्युक्तंतत्रकथंदेहद्वयसंबंधेसतितद्विमुक्तिरित्याशंक्यदेहसंबंधस्यभगवज्जन्मा
योस्माविद्याविलसितत्वादेतत्तत्त्ववर्णनजनितविद्ययातन्निवृत्तिरुपपद्यतइत्याशयेनाह।एतदितिपंचभिः॥अरूपस्यचिदेकरस
स्यात्मनोजीवस्य।एतत्स्थूलरूपंशरीरंभगवतोमाययातस्यागुणैर्महदादिरूपैर्विरचितं।क्व।आत्मनि।आत्मस्थानेशरीरंकृतमित्यर्थः
॥३०॥

प्र०भा०

कथमित्यपेक्षायां स्वरूपावरणेन तदध्यासत इति सदृष्टांतमाह॥ यथा नभसीति यथा वायुनाश्रितो मेघौघो नभसि आकारो अबुद्धिभिरज्ञैरारोपितः यथा वा पार्थिवो रेणुः तद्गतं धूसरत्वादि अनिले। एवं द्रष्टरि आत्मनि दृश्यत्वं दृश्यत्वादिधर्मकं शरीरं आरोपितमित्यर्थः॥३१॥ किंच। अतः परमिति अतः स्थूलाद्रूपात्परं अन्यदपि रूपमारोपितमित्यनुषंगः। कथंभूतं ततः परं अव्यक्तं सूक्ष्मं तत्र हेतुः अव्यूढगुणबृंहितं व्यूहः करचरणादिपरिणामः। तथा अपरिणताः अव्यूढाः ये गुणाः तैर्गुणैर्बृंहितं रचितं। आकारविशेषरहितत्वादव्यक्तमित्यर्थः॥ एतदेव कुतस्तत्राह॥ अदृष्टाश्रुतवस्तुत्वात् आकारविशेषवतो वस्तुनो भावात् यच्चाकारविशेषवद्वस्तु तदस्मदादिवद्दृश्यते श्रूयते वा इंद्रादिवत्। इदं तु न तथा॥ तर्हि तस्य सत्त्वे किं प्रमाणं तत्राह॥ स जीवः जीवोपाधिः जीवो जीवेन निर्मुक्तः जीवो जीवं विहायेत्यादौ जीवोपाधौ लिंगदेहे जीवशब्दप्रयोगात्। जीवोपाधितया कल्प्यत इत्यर्थः। ननु स्थूलमेव भोगायतनत्वात् जीवस्योपाधिरस्ति किमन्यक

यथा नभसि मेघौघो रेणुर्वा पार्थिवोऽनिले॥ एवं द्रष्टरि दृश्यत्वमारोपितमबुद्धिभिः॥३१॥ अतः परं यदव्यक्तमव्यूढगुणबृंहितं॥ अदृष्टाश्रुतवस्तुत्वात्स जीवो यत्पुनर्भवः॥३२॥ यत्रेमे सदसद्रूपे प्रतिषिद्धे स्वसंविदा॥ अविद्ययाऽऽत्मनि कृते इति तद्ब्रह्मदर्शनं॥३३॥ यद्येषोपरता देवी माया वैशारदी मतिः॥ संपन्न एवेति विदुर्महिम्नि स्वे महीयते॥३४॥ एवं जन्मानि कर्माणि ह्यकर्तुरजनस्य च॥ वर्णयंति स्म कवयो वेदगुह्यानि हृत्पते॥३५॥

ल्पनयेत्यत आह॥ यस्मात् सूक्ष्मात् पुनर्जन्म॥ उत्क्रांतिगत्यागतीनां तेन विना संभवादिति भावः॥३२॥ तदेवमुपाधिद्वयमुक्त्वा तदपवादेन जीवस्य ब्रह्मतामाह॥ यत्रेति। यत्र यदा इमे स्थूलसूक्ष्मे रूपे स्वसंविदा स्वरूपसम्यक्ज्ञानेन प्रतिषिद्धे भवतः॥ ज्ञानेन प्रतिषेधार्हत्वे तमेव हेतुमाह॥ अविद्ययात्मनि कृते कल्पिते इति हेतोः। तदा स तदा जीवो ब्रह्मैव भवतीत्यर्थः॥ कथंभूतं। दर्शनं ज्ञानैकस्वरूपं॥३३॥ तथापि भगवान्मायायाः संसृतिकारणभूताया विद्यमानत्वात् कथं ब्रह्मता तत्राह॥ यदीति। असंदेहे संदेहवचनं यदि वेदाः प्रमाणं स्युरितिवत्। वैशारदी विशारदः सर्वज्ञः ईश्वरः। तदीया देवी संसारचक्रेण क्रीडंती। एषा माया यद्युपरता भवति। किमित्युपरता भवेत् तत्राह॥ मतिः विद्या अयं भावः यावदेषाविद्यात्मना आवरणविक्षेपौ करोति तावन्नोपरमति। यदा तु सैव विद्यारूपेण परिणता तदा सदसद्रूपं जीवोपाधिं दग्ध्वा निरिंधनाग्निवत् स्वयमेवोपरमेदिति। तदा संपन्नः ब्रह्मरूपं प्राप्त इवेति विदुस्तत्त्वज्ञाः किमतः यद्येवं स्वे महिम्नि परमानंदस्वरूपे महीयते पूज्यते विराजत इत्यर्थः॥३४॥ यथा जीवस्य जन्मादि मायया एवमीश्वरस्यापि जन्मकर्मादि माययेत्याह॥ एवमिति

तर्हिजीवादीश्वरस्यकोविशेषः।स्वातंत्र्यमेवविशेषइत्याहसवाइति।षाड्वर्गिकंइंद्रियषड्वर्गविषयंजिघ्रतिदूरादेवगंधवद्गृह्णातिनतुसज्ज
तइत्यर्थः॥कुतःषड्गुणेशःषडिंद्रियनियंता॥३६॥ननुकिमीश्वरस्यसृष्ट्यादिकर्मभिर्निर्विषयभोगोवातत्राह।नचेति।धातुर्जगद्विधा
तुरीश्वरस्यऊतीःलीलाःकुमनीषःकुबुद्धिर्निपुणेनतर्कादिकौशलेननअवैतिनजानाति।मनसारूपाणिवचसानामानिसंतन्व

सवाइदंविश्वममोघलीलःसृजत्यवत्यत्तिनसज्जतेस्मिन्।भूतेषुचांतर्हितआत्मतंत्रःषाड्वर्गिकंजिघ्रतिषड्गुणे
शः॥३७॥नचास्यकश्चिन्निपुणेनधातुरवैतिजंतुःकुमनीषऊती॥नामानिरूपाणिमनोवचोभिः॥संतन्वतोनट
चर्यामिवाज्ञः॥३८॥सवेदधातुःपदवींपरस्यदुरंतवीर्यस्यरथांगपाणेः॥योमाययासंततयानुवृत्त्याभजेततत्पाद
सरोजगंधं॥३९॥अथेहधन्याभगवंतइत्थंयद्वासुदेवेऽखिललोकनाथे।कुर्वंतिसर्वात्मकमात्मभावंनयत्रभूयः
परिवर्तउग्रः॥४०॥

तःसम्यक्विस्तारयतःवचोभिरिववक्तृत्वंप्राप्यभिप्रायेणमनोवचोभिःसहेतिवा॥३७॥भक्तस्तुकथंचिज्जानातीत्याह।सवेदेति॥
या अमाययाअकौटिल्यभावेनसंततयानिरंतरया॥अनुवृत्त्याआनुकूल्येनभजेतः॥३८॥भक्तिमार्गेप्रवृत्तानृषीनभिनंदति।अ
थेतियतोभक्तएवभगवतत्वंजानातिअथअतःभवंतःसर्वज्ञाःभवतोधन्याःकृतार्थाःकुतःयद्यस्मात्इत्थंअस्मिन्वासुदेवेआत्म
भावंमनोवृत्तिंकुर्वंति।सर्वात्मकंऐकांतिकंयत्रयस्मिन्भावेसतिभूयःपरिवर्त्तोजन्ममरणावर्तोनभवति॥४०॥ ॥ ॥

त

सूतकिमेतछास्त्रमपूर्वंकथयसितत्राह॥इदमिति॥ब्रह्मसंमितंसर्ववेदतुल्यंउत्तमश्लोकस्यचरितंयस्मिन्तत॥ऋषिर्व्यासः॥४०॥
ततसंप्रदायप्रवृत्तिमाहतदिदमिसुतंशुकं॥४१॥प्रायेणमृत्युपर्यंतानाशकेनोपविष्टमितिपरमैर्भागपोक्ति॥४३॥हेविप्राःविप्रर्षेः

इदंभागवतंनामपुराणंब्रह्मसंमितं॥उत्तमश्लोकचरितंचकारभगवानृषिः निःश्रेयसायलोकस्यधन्यंस्वस्त्ययनं
महत्॥४०॥तदिदंग्राहयामाससुतमात्मवतांवरं॥सर्ववेदेतिहासानांसर्वसारंसमुद्धृतं॥४१॥सतुसंश्रावयामा
समहाराजंपरीक्षितं॥प्रायोपविष्टंगंगायांपरीतंपरमर्षिभिः॥४२॥कृष्णेस्वधामोपगतेधर्मज्ञानादिभिःसह॥
कलौनष्टदृशामेषपुराणार्कोधुनोदितः॥४३॥तत्रकीर्त्तयतोविप्राविप्रर्षेर्भूरितेजसः॥अहंचाधिगमंतत्रनि
विष्टस्तदनुग्रहात॥४४॥सोहंवःश्रावयिष्यामियथाधीतंयथामतिः॥इतिश्रीभागवतेमहापुराणेप्रथमस्कंधेतृतीयो

सकासात॥अधिगतंज्ञातवानस्मि॥तत्रकीर्त्तयतः॥तत्रनिविष्टइतिचान्वयभेदात्तत्रपदावृत्तिरदोषः॥यथाधीतंनतुस्वमतिविलसि
तं॥तत्रतुयथामतिस्वमत्यनुसारेणसंक्षेपतः॥कथितंविस्तरतःश्रावयिष्यामि॥४४॥इतिश्रीभागवतेमहापुराणेभावार्थदीपि १४
कायांप्रथमस्कंधेतृतीयोध्यायः॥३॥

तुर्ये भागवतारंभकारणत्वेन कथ्यते॥ व्यासस्यापरितोषस्तत्पःप्रवचनादिभिः॥१॥ इति एवं प्रसन्नतया श्रावयिष्यामीति ब्रुवाणं मु
नीनां बहूनां मध्ये एकेन वक्त्रा श्रेयो वृद्धः वृद्धेष्वपि बहुश्रुतः॥ कुलपतिर्गणमुख्यः तेष्वपि न श्रुतपूर्वो वक्तचः॥ ऋग्वेदी तेन वक्त्रं व्यंअत
एवंभूतत्वात् शौनको ब्रूते॥२॥ यत्र यां कथामाह॥२॥ कस्मिन् वा स्थाने केन हेतुनेति महाभारतादिधर्मशास्त्राणि कृतवतः
पुनरेतत्संहिताकरणे किंकारणमित्यर्थः॥ कुत इति सार्वविभक्तिकस्तसिः केन नर्त्तित इत्यर्थः॥ कृष्णो व्यासः ▪यदुक्तं सं

व्यास उवाच॥ इति ब्रुवाणं संस्तूय मुनीनां दीर्घसत्रिणाम्॥ वृद्धः कुलपतिः सूतं बह्वृचः शौनकोब्रवीत्॥१॥ शौनक उवाच
सूत सूत महाभाग वद नो वदतां वर॥ कथां भागवतीं पुण्यां यदाह भगवान् शुकः॥२॥ कस्मिन् युगे प्रवृत्तेयं स्थाने
वा केन हेतुना॥ कुतः संचोदितः कृष्णः कृतवान् संहितां मुनिः॥३॥ तस्य पुत्रो महायोगी समदृङ्निर्विकल्पकः॥ एकां
तमतिरुन्निद्रो गूढो मूढ इवेयते॥४॥

श्रावयामासेति तत्र शुकस्य व्याख्यानादिकं कथं घटितमिति पृष्टं तस्यासंगोदासीनतामाह॥ तस्येति समदृक्समं ब्रह्म पश्यति॥ अतो निर्विकल्पकः स्वार्थैकः निरस्तभेदः॥ किंच एकस्मिन्नेवं भूतः॥ समाप्तिर्यस्यास्तथाभूता मतिर्यस्य सः॥ यत उन्निद्रः मा
याशयनादुद्बुद्धः॥ या निशा सर्वभूतानां तस्यां जागर्त्ति संयमीति॥ अत एव गूढः अप्रकटः मूढ इव प्रतीयते॥४॥ ॥ ॥

ना० प्र० निर्विकल्पकत्वं प्रपंचयति। दृष्ट्वेति। आत्मजं पुत्रं। प्रव्रजंतमनुयांतमनुगछंतं ऋषिं व्यासं अनग्नमपि दृष्ट्वा जलेक्रीडंत्यो देव्यः अ
प्सरसः ह्रिया लज्जया वस्त्रपरिधानं कृतवत्यः॥ अनग्नमपीत्यनेनार्थात् सुतो नग्न इत्युक्तं। नग्नस्य पुरतो गछतः सुतस्य तु ह्रि
न या एणपरिदधुः॥ तच्चित्रं वीक्ष्य अयं स्त्री अयं पुमानिति भिदा ते दृशस्तवास्ति। विविक्ता पूता दृष्टिर्यस्य एवं भूतो सौ कथमालक्षि
तः ज्ञातः कुरवो जंगलाश्च देशविशेषास्तान् संप्राप्तः प्रथमं ततो गजसाह्वये। विचरन् गजेन सहित आह्वयो नाम यस्य त

दृष्ट्वानुयांतमृषिमात्मजमप्यनग्नं देव्यो ह्रिया परिदधुर्न सुतस्य चित्रं। तद्वीक्ष्य पृछति मुनौ जगदुस्तवास्ति स्त्रीपुंभिदा
न तु सुतस्य विविक्तदृष्टेः॥५॥ कथमालक्षितः पौरैः संप्राप्तः कुरुजांगलान्। उन्मत्तमूकजडवद्विचरन् गजसाह्वये॥६॥
कथं वा पांडवेयस्य राजर्षेर्मुनिना सह। संवादः समभूत्तात यत्रैषा सात्वती श्रुतिः॥७॥ स गोदोहनमात्रं हि गृहेषु गृ
हमेधिनां। अवेक्षते महाभागस्तीर्थीकुर्वंस्तदाश्रमं॥८॥ अभिमन्युसुतं सूत प्राहुर्भागवतोत्तमं। तस्य जन्म महाश्चर्यं क
र्माणि च गृणीहि नः॥९॥ स सम्राट् कस्य वा हेतोः पांडूनां मानवर्द्धनः। प्रायोपविष्टो गंगायामनादृत्याधिराट् श्रियं॥१०॥

स्मिन् हस्तिनापुरे हस्ती नाम राजा तेन निर्मितत्वात्॥६॥ एवं च तेन मुनिना सह यत्र संवादे एषा सात्वती भागवती श्रुतिः संहिता॥७॥ एतं
द्व्याख्यानं वक्तुकालावस्थानापेक्षं तस्य त्वेकत्रावस्थानं दुर्लभमित्याह स इति। गोदोहनमात्रकालं प्रतीक्षते। तदपि न स्वार्थं किंतु तेषामाश्र
मं गृहं तीर्थीकुर्वन् पवित्रीकुर्वन्। तस्मादेवं भूतोत्र वक्ता कथमित्याश्चर्यं॥८॥ श्रोतुरपि चरितमत्याश्चर्यमतः अतः कथयेत्याह। अभिमन्यु
सुतमिति पंचभिः। गृणीहि कथय॥९॥ सम्राट् चक्रवर्ती विवितर्कः कस्य वा हेतोः कस्मात्कारणात् अधिराट् श्रियं अधिराज्यश्रियं पर १५
मरत्व॥१०

ना

यस्य पादनिकेतं चरणपीठं ह्रस्पुटं धनान्यानीय शत्रवो नमंति श्रंग हे सूत युवा तरुण एव ऐषत् त्यक्तुं॥ असुभिः प्राणैः सह॥१०
विरक्तस्य किं धनादिभिरिति चेत्तत्राह॥ लोकस्य शिवाय सुखाय भवाय समृद्धये भूतये ऐश्वर्याय च ते जीवंनं त्वात्मार्थं एवं स ति
ति अत्र सो राजा निर्विण्णविरक्तोपि परेषामाश्रयं कलेवरं कुतो हेतोर्मुमोच न हि परोपजीवनं स्वयं त्यक्तुमुचितमित्यर्थः॥११॥

नमंति यत्पादनिकेतमात्मनः शिवाय हानीय धनानि शत्रवः॥ कथं स वीरः श्रियमंग दुस्त्यजां युवैषतोत्स्रष्टुमहो सहा
सुभिः॥१०॥ शिवाय लोकस्य भवाय भूतये य उत्तमश्लोकपरायणा जनाः॥ जीवंति नात्मार्थमसौ पराश्रयं मुमो
च निर्विद्य कुतः कलेवरं॥११॥ तत्सर्वं नः समाचक्ष्व पृष्टो यदिह किंचन॥ मन्ये त्वां विषये वाचां स्नातमन्यत्र छां
दसात्॥१२॥ सूत उवाच॥ द्वापरे समनुप्राप्ते तृतीये युगपर्यये॥ जातः पराशराद्योगी वासव्यां कलया हरेः॥१३॥

यत्किंचन पृष्टोसि तत्सर्वं नोस्मभ्यं समाचक्ष्व यद्यस्माद्वाचां विषये गिरां गोचरेर्थे स्नातं पारंगतं त्वां मन्ये। छांदसादन्यत्र वैदिक
व्यतिरेकेणात्रैवर्णिकत्वात्॥१२॥ कस्मिन्युग इत्यादिप्रश्नानां व्यासजन्मकथनपूर्वकमुत्तरमाह॥ द्वापरे समनुप्राप्ते॥ कदे
त्यपेक्षायामाह॥ तृतीये युगस्य पर्यये परिवर्ते॥ वासव्यामुपरिचरस्य॥ वसोर्वीर्याज्जातायां सत्यवत्यां योगी ज्ञानी व्यासो जातः॥१३॥

भा० प्र० जलमुपस्पृश्य जले स्नानादिकं कृत्वेत्यर्थः ।। आसीनो बभूवेति शेषः विविक्ते देश इत्यादि चित्तैकाग्र्यार्थमुक्तं अनेनैव बदरिकाश्र
मस्थानं सूचितं ।।१५।। तत्र च स ऋषिर्युगधर्मव्यतिकरादिकं वीक्ष्य सर्ववर्णाश्रमाणां च यद्धितं तद्दध्याविति त्रितयेनान्वयः परावर
ज्ञः अतीतानागतवित् । अव्यक्तं रंहो वेगो यस्य तेन । कालेन युगधर्माणां व्यतिकरं संकरं प्राप्तं वीक्ष्य तथा च भुवि युगे युगे ।।१६।। भौ

सकदाचित्सरस्वत्या उपस्पृश्य जलं शुचिः ।। विविक्त एक आसीन उदिते रविमंडले ।।१५।। परावरज्ञः स ऋषिः कालेनाव्य
क्तरंहसा ।। युगधर्मव्यतिकरं प्राप्तं भुवि युगे युगे ।।१६।। भौतिकानां च भावानां शक्तिह्रासं च तत्कृतं ।। अश्रद्दधानान्निः
सत्वान्दुर्मेधान्ह्रसितायुषः ।।१७।। दुर्भगांश्च जनान्वीक्ष्य मुनिर्दिव्येन चक्षुषा ।। सर्ववर्णाश्रमाणां यद्दध्यौ हितम
मोघदृक् ।।१८।। चातुर्होत्रं कर्म शुद्धं प्रजानां वीक्ष्य वैदिकं ।। व्यदधाद्यज्ञसंतत्यै वेदमेकं चतुर्विधं ।।१९।। ऋग्यजुःसा
माथर्वाख्या वेदाश्चत्वार उद्धृताः ।। इतिहासपुराणं च पंचमो वेद उच्यते ।।२०।। तत्रर्ग्वेदधरः पैलः सामगो जैमिनिः कविः
वैशंपायन एवैको निष्णातो यजुषामुत ।।२१।। अथर्वांगिरसामासीत्सुमंतुर्दारुणो मुनिः ।। इतिहासपुराणानां पिता मे रोमहर्षणः २२

तिकानां शरीरादीनां । तत्कृतं कालकृतं । निःसत्वान्धैर्यशून्यान् । दुर्मेधान्मंदमतीन् ।।१७।। तत्र चातुर्होत्रोपलक्षिताश्चत्वार ऋत्विज
श्चतुर्होतारः तैरनुष्ठेयं कर्म चातुर्होत्रं । शुद्धं शुद्धिकरं यज्ञसंतत्यै यज्ञानामविच्छेदाय ।।१९।। चातुर्विध्यमेवाह । ऋगिति उद्धृताः ।।
पृथक्कृताः ।।२०।।२१।। दारुणः अथर्वोक्ताभिचारादिप्रवृत्तेः ।।२२।। १६

एवेतिये

शाखाविभागमाह॥तएतइतिव्यासस्यशिष्यक्रवंत॥२३॥वेदविभागप्रयोजनमाह॥तंपूर्वमतिमेधाविभिर्धार्यंतेस्मतएव॥२४॥किंच
स्त्रीशूद्रेति॥द्विजबंधवः॥त्रैवर्णिकेष्वधमाः॥तेषां॥तेषां॥कर्मश्रेयसिश्रेयःसाधने॥एवंभवेत्॥अनेनैवप्रकारेणभवतीति॥

॥तएतऋषयोवेदंस्वंस्वंव्यस्यन्ननेकधा॥शिष्यैःप्रशिष्यैस्तच्छिष्यैर्वेदास्तेशाखिनोऽभवत्॥२३॥तएववेदादुर्मेधैर्धार्यंतेपु
रुषैर्यथा॥एवंचकारभगवान्व्यासःकृपणवत्सलः॥स्त्रीशूद्रद्विजबंधूनांत्रयीनश्रुतिगोचरा॥कर्मश्रेयसिमूढानांश्रेयएवं
भवेदिह॥२५॥इतिभारतमाख्यानंकृपयामुनिनाकृतं॥एवंप्रवृत्तस्यसदाभूतानांश्रेयसिद्विजाः॥२६॥सर्वात्मकेनापि
यदानातुष्यद्धृदयंततः॥नातिप्रसीदद्धृदयःसरस्वत्यास्तटेशुचौ॥वितर्कयन्विविक्तस्थइदंप्रोवाचधर्मवित्॥२७॥
धृतव्रतेनहिमयाछंदांसिगुरवोऽग्नयः॥मानितानिर्व्यलीकेनगृहीतंचानुशासनं॥२८॥भारतव्यपदेशेनह्याम्नायार्थश्च
दर्शितः॥दृश्यतेयत्रधर्मादिस्त्रीशूद्रादिभिरप्युत॥२९॥

अतएवतेषां॥कृपयाभारताख्यानंमुनिनाकृतं॥२५॥भूतानांश्रेयसिहितोसर्वात्मकेनापिकर्मणा॥२६॥नातिप्रसीदत्तद्धृदयं
यस्यसः॥चित्ताप्रसन्नोहेतुंवितर्कयन्इदमुवाच॥स्वागतंमानिताःपूजिताः॥ ॥२९॥ ॥श्रीविघ्नेशनमः॥ ॥

भा० प्र० देहे भवः दैह्यः आत्मा जीवः। वस्तुतो विभुः परिपूर्ण एव आत्मना स्वरूपेण असंपन्नः। तदा तस्य मम असद् इवाभाति। ब्रह्मवर्चसं वेद
अध्ययनाध्यापनोत्कर्षजं तेजः। तत्र साधवो ब्रह्मवर्चस्याः तेषु सत्तमः। अतिश्रेष्ठोऽपि। यद्वा केवलमसंपन्न इवाभाति अस्तु तद्ब्रह्मव
र्चस्वी ब्रह्मवर्चसवानपि असत्तम इवाभाति। पाठांतरे कमनीयतमोऽपीति ॥३१॥ असंपत्तौ हेतुं स्वयमेवाशंकते किंचेति। आ

अथापि बत मे दैह्यो ह्यात्मा चैवात्मना विभुः ॥ असंपन्न इवाभाति ब्रह्मवर्चस्य सत्तमः ॥३१॥ किं वा भागवता धर्मा न प्राये
ण निरूपिताः ॥ प्रियाः परमहंसानां त एव ह्यच्युतप्रियाः ॥३२॥ तस्यैवं खिलमात्मानं मन्यमानस्य खिद्यतः ॥ कृष्णस्य नारदो
ऽभ्यागादाश्रमं प्रागुदाहृतं ॥३३॥ तमभिज्ञाय सहसा प्रत्युत्थायागतं मुनिः ॥ पूजयामास विधिवन्नारदं सुरपूजितं ॥
॥३४॥ इति श्रीभागवते महापुराणे प्रथमस्कंधे नारदव्याससंगमो नाम चतुर्थोऽध्यायः ॥४॥ ॥ ॥ ॥ ॥

येन प्रायस्त्वेन ॥ हि यस्मात्त एव धर्माः अच्युतस्य प्रियाः ॥३२॥ खिलं न्यूनं ॥ खिद्यतः खेदं प्राप्नुवतः ॥ कृष्णस्य व्यासस्य ॥ प्रागुदाहृतं
सरस्वतीतीरस्थं ॥३३॥ तं नारदमागतमभिज्ञाय सहसा प्रत्युत्थाय विधिवत्पूजयामासेति ॥३४॥ इति श्रीभागवते भावार्थदीपिका १७
यां प्रथमस्कंधे नारदव्याससंगमं चतुर्थोऽध्यायः ॥४॥ ॥ ॥ ॥ ॥

पंचमे सर्वधर्मेभ्यो हरिकीर्त्तनगौरवं॥ व्याससचित्तप्रसादाय नारदेनोपदिश्यते॥१॥ उप समीपे आसीनं विप्रर्षिं व्यासं बृहच्छ्रवाः म
हायशाः स्मयन् ईषद्धसन्निवेत्यनेन सुखप्रसन्नतिर्द्योत्यते। यद्वाऽवेत्यनधिकारार्थे अहो महानपि मुह्यतीति स्मयमानः॥१॥ शारीरः
शरीराभिमानी आत्मा आत्मना तेन शरीरेण कच्चित्किं परितुष्यति। मानस आत्मा मनोभिमानी तेन मनसा परितुष्यति कच्चित्नो
वेति॥२॥ ते जिज्ञासितं ज्ञातुमिष्टं धर्मादि यत्तत्सर्वं सुसंपन्नं सम्यक् ज्ञातं॥ अपि शब्दादनुष्ठितं चेत्यर्थः॥ अपीति पाठे संशोधनं।

सूत उवाच॥ अथ तं सुखमासीनं उपासीनं बृहच्छ्रवाः॥ देवर्षिः प्राह विप्रर्षिं वीणापाणिः स्मयन्निव॥१॥ नारद उवाच॥ पारा
शर्य महाभाग भवतः कच्चिदात्मना॥ परितुष्यति शारीर आत्मा मानस एव वा॥२॥ जिज्ञासितं सुसंपन्नमपि ते महद
द्भुतं॥ कृतवान् भारतं यस्त्वं सर्वार्थपरिबृंहितं॥३॥ जिज्ञासितमधीतं च ब्रह्म यत्तत्सनातनं॥ तथापि शोचस्यात्मान
मकृतार्थ इव प्रभो॥४॥ व्यास उवाच॥ अस्त्येव मे सर्वमिदं त्वयोक्तं तथापि नात्मा परितुष्यते मे॥ तन्मूलमव्यक्तमगाध
बोधं पृच्छामहे त्वात्मभवात्मभूतं॥५॥

सुसंपन्नत्वे हेतुः महदद्भुतमित्यादि सर्वैरर्थैर्धर्मादिभिः परिबृंहितं परिपूर्णं॥३॥ किंच यत्सनातनं नित्यं परं ब्रह्म तच्च त्वया जिज्ञासितं वि
चारितं॥ अधीतं अधिगतं प्राप्तं चेत्यर्थः॥ अथापि शोचसि तत् किमर्थमिति शेषः॥४॥ आत्मा शारीरो मानसश्च। तन्मूलं तस्यापरितोष
स्य कारणं अव्यक्तं अस्फुटं। हे नारद त्वां पृच्छामः आत्मभवो ब्रह्मा तस्यात्मनो देहादुद्भुतं अत एव अगाधोऽतिगंभीरो बोधो यस्य तं त्वां॥५॥

भा० प्र० अगाधबोधतांप्रपंचयन्नाह।सवाइतिद्वाभ्यां।सर्वगुह्यज्ञानेहेतुः।यद्यस्मात्पुराणःपुरुषःउपासितस्त्वया।कथंभूतःपरावरेशःका
र्यकारणनियंता यतः।मनसैवसंकल्पमात्रेणगुणैःकृत्वाविश्वंसृजतीत्यादि।६।किंचत्वंत्रिलोकींपर्यटन्ऽअर्कइवसर्वदर्शी।यो
गबलेनचप्राणवायुरिवसर्वप्राणिनामंतश्चरःसन्आत्मसाक्षीबुद्धिवृत्तिद्रष्टा।अतःपरेब्रह्मणिधर्मतःयोगेननिष्णातस्यत

सवैभवान्वेदसमस्तगुह्यमुपासितोयत्पुरुषःपुराणः।परावरेशोमनसैवविश्वंसृजत्यवत्यत्तिगुणैरसंगः।६।त्वंपर्यट
न्नर्कइवत्रिलोकीमंतश्चरोवायुरिवात्मसाक्षी।परावरेब्रह्मणिधर्मतोव्रतैःस्नातस्यमेन्यूनमलंविचक्ष्व।७।श्रीना
रदउवाच।भवतानुदितप्रायंयशोभगवतोऽमलं।येनैवासौनतुष्येतमन्येतद्दर्शनंखिलं।८।यथाधर्मादयश्चा
र्थामुनिवर्यानुकीर्त्तिताः।नतथावासुदेवस्यमहिमाह्यनुवर्णितः।९।

दुक्तंयाज्ञवल्क्येनइज्याचारदमाहिंसादानस्वाध्यायकर्मणां।अयंतुपरमोधर्मोयद्योगेनात्मदर्शनमिति।अपरेचब्रह्मणिवेदाख्येव्र
तैःस्वाध्यायनियमैर्निष्णातस्यमे।अलंअत्यर्थंयत्न्यूनंतद्विचक्ष्ववितर्कय।७।अनुदितप्रायंअनुक्तप्रायंभगवद्यशोविमलंविनाये
नैवधर्मादिज्ञानेनासौभगवान्नतुष्येततदेवदर्शनंज्ञानंखिलंन्यूनंमन्ये।८।ननुभगवद्यशएवतत्रतत्रानुवर्णितंतत्राह।यथेति।। १०
व चशब्दाद्धर्मादिसाध्यास्तेनवासुदेवस्यमहिमानोक्तइत्यर्थः।।९।।

वासुदेवव्यतिरिक्ताऽन्यविषयज्ञानवदेवानिर्विषयंवाकस्चातुर्यंचखिलमेवेत्याहनेति।चित्रपदमपियद्वचोहरेर्यशोनप्रगृणीततद्वा
यसंतीर्थंकाकतुल्यानांकामिनांरतिस्थानंउशंतिमन्यंते॥कुतः मानसाः सत्वप्रधानेमनसिवर्त्तमानाहंसायतयः यत्रनिरमंति
क कर्हिचिदपिनितरांनरमंते॥उशिकक्षयाः उशिकंकमनीयंब्रह्मक्षयोयेषांते॥यथाप्रसिद्धाहंसाःसरसिचरतः।कमनीयपद्म
क्री खंडनिवासाःत्यक्तविचित्रान्नादियुक्तेप्युच्छिष्टगर्त्तेकाकक्रीडास्थानेननिरमंतइतिशेषः॥१०॥विनापितुपस्चातुर्यंनगवद्यशः

नयद्वचश्चित्रपदंहरेर्यशोजगत्पवित्रंप्रगृणीतकर्हिचित्॥तद्वायसंतीर्थमुशंतिमानसानयत्रहंसानिरमंत्युशिक्
क्षयाः॥१०॥तद्वाग्विसर्गोजनताघसंप्लवोयस्मिन्प्रतिश्लोकमबद्धवत्यपि॥नामान्यनंतस्ययशोंकितानियच्छृण्वंति
गायंतिगृणंतिसाधवः॥११॥

प्रधानंवचः।पवित्रमित्याह।तद्वाग्विसर्गइति।सचासौवाग्विसर्गः।वाचःप्रयोगः।जनानांसमूहोजनता।तस्याः अघंविप्लावयति
दि नाशयतीतितथा।यस्मिन्वाग्विसर्गेअबद्धवत्यपिअपशब्दादियुक्तेपिप्रतिश्लोकंअनंतस्ययशोंकितानिनामानिभवंति।तत्रहे
तुः यत्यानिनामानिसाधवोमहांतः।वक्तरिसतिश्रृण्वंति।श्रोतरिसतिगृणंति।अन्यदातुस्वयमेवगायंतिकीर्त्तयंतीति॥११॥

भा॰प्र॰ भक्तिहीनंकर्मबंधनमेवेतिकैमुतिकन्यायेनदर्शयतिनैष्कर्म्यंनिष्कर्मब्रह्मतदेकाकारत्वान्निष्कर्मतारूपंनैष्कर्म्यं।।अज्यतेऽनेनेत्यंजनमुपा
धिःतन्निवर्तकंनिरंजनं।।एवंभूतमपिज्ञानं।अच्युतेभावोभक्तिःतद्वर्जितंचेत्।अलमत्यर्थंनशोभ[illegible]तेसम्यगपरोक्षायनकल्पतइत्य
र्थः।तदाशश्वत्साधनकालेचअभद्रंदुःखरूपंयत्काम्यंकर्मयदप्यकारणमकाम्यंतच्चेतिचकारस्यान्वयः।तदपिकर्मईश्वरेनार्पितंचेत्
कुतःपुनःशोभतेबहिर्मुखत्वेनसत्वशोधकत्वाभावात्।।१२।।तदेवंभक्तिशून्यानिज्ञानवाक्कायकर्मकौशलानिव्यर्थान्येपपतः।।
अतोहरेश्चरितमेवानुवर्णयेत्याह।।अथोतःकारणात्।अमोघायथार्थादृष्टिर्यस्य।शुचिसुष्टुश्रवोयशोयस्य।सत्येरतःधृता

नैष्कर्म्यमप्यच्युतभाववर्जितंनशोभतेज्ञानमलंनिरंजनं।।कुतःपुनःशश्वदभद्रमीश्वरेनचार्पितंकर्मयदप्यकारणं।।१२।।
अथोमहाभागभवानमोघदृक्शुचिश्रवाःसत्यरतोधृतव्रतः।।उरुक्रमस्याखिलबंधमुक्तयेसमाधिनानुस्मरतद्विचेष्टि
तं।।१३।।ततोऽन्यथाकिंचनयद्विवक्षतःपृथग्दृशस्तत्कृतनामरूपभिः।।नकुत्रचित्क्वापिचदुःस्थितामतिर्लभेतवाताह
तनौरिवास्पदं।।१४।।

व्रतानि॰ नियेन।सभवानेवंमहानुभावस्त्वं।अतउरुक्रमस्यविविधंचेष्टितंलीलांसमाधिनाचित्तैकाग्र्येणअखिलस्यबंधमुक्तयेत्वमनुस्मरस्मृत्वा
कथां चवर्णयेत्यर्थः।एतच्चवा[illegible]तरमितिमध्यमपुरुषप्रयोगोनानुपपन्नः।।१३।।विपक्षेदोषांतरमाह।ततउरुक्रमविचेष्टितात्पृथग्दृशः।अत
एवान्यथाप्रकारांतरेणयत्किंचिदर्थांतरंविवक्षितः।तयाविवक्षयाकृतैःस्फुरितैःरूपैर्नामभिश्चवक्तव्यैरुपस्थितैःदुःखितानवस्थितासतीम
तिः।।कदाचित्क्वापिविषयेआस्पदंस्थानंनलभेत।वातेनाहताआघूर्णितानौरिवतदुक्तंगीतासु।व्यवसायात्मिकाबुद्धिरेकेहकुरुनंदन।बहुशा १७
खाह्यनंताश्चबुद्धयोऽव्यवसायिनामित्यादिना।।१४।।तदेवंहरियशोविनाभारतादिषुकृतंधर्मादिवर्णनमकिंचित्करमित्युक्तं।।१४।। ।। ।।

प्रस्तुतविरुद्धमेवजातमित्याह।जुगुप्सितमिति।जुगुप्सितंनिंद्यंकाम्यकर्मादिस्वभावतएवरक्तस्यतत्ररागिणःपुरुषस्यधर्मकृतेधर्मार्थमनुशा
सतस्तवमहानयंव्यतिक्रमःअन्यायः।कुतइत्यतआह।यस्यवाक्यतोयमेवमुख्योधर्मइतिस्थितःइतरःप्राकृतोजनःतस्यकाम्यकर्मादेः
श्रमेनतत्वज्ञेनक्रियमाणंनिवारणंस्वयमेववात्वयाक्रियमाणं।यद्वानकर्मणानप्रजयाधनेनत्यागेनैकेअमृतत्वमानशुरित्यादिश्रुत्याक्रिय
माणंनिवारणंअप्रामाण्यमेतदितिनमन्यतेकिंतुप्रवृत्तिमार्गेनधिकृतविषयंतदितिकल्पयति।तदुक्तंमतांतरोपन्यासेन्नरैः।तत्रैवंश्राश्यतेवक्तुं
यैर्लेपंवादयोनराः।गृहस्थत्वंनसत्तंतिकर्तुतेषांमयंविधिरिति।नैष्ठिकब्रह्मचर्यंवापरिव्राजकतापिवा।तैरवस्यंगृहीतव्यातेनादावेतदु

जुगुप्सितंधर्मकृतेनुशासतःस्वभावरक्तस्यमहान्व्यतिक्रमः।यद्वाक्यतोधर्मइतीतरस्थितोनमन्यतेतस्यनिवारणंजनः॥१५॥
रत्नत विचक्षणोस्यार्हतिवेदितुंविभोरनंतपारस्यनिवृत्तितःसुखं।प्रवर्त्तमानस्यगुणैरनात्मनस्ततोभवान्दर्शयचेष्टितंविभो॥१६॥
त्यक्त्वास्वधर्मंचरणांबुजंहरेर्भजन्नपक्वोथपतेत्ततोयदि।यत्रक्ववाभद्रमभूदमुष्यकिंकोवार्थआप्तोऽभजतांस्वधर्मतः॥१७॥ ॥

श्यतइत्यादि॥१५॥ननुयद्येवंप्रवृत्तिमार्गोनिषेत्स्यतेतर्हिनिवृत्तिमार्गेणसर्वक्रियात्यागेनैवपरमेश्वरसुखस्वरूपानुभूतेः।किंतद्यशःकथने
नापितत्राह।विचक्षणइति।विचक्षणोतिनिपुणः।कश्चिदेवनिवृत्तितःसर्वक्रियानिवृत्त्याअस्यविभोःसुखंनिर्विकल्पसुखात्मकं
स्वरूपंवेदितुंज्ञातुमर्हतिनपुनरपिविचक्षणःप्रवृत्तिस्वभावः।किंतुसहेतुः।नअंतःकालतःपारंचदेशतोयस्यतस्यविभोश्चे
ष्टितं।ततःकारणाद्भवानविभोअनात्मनोदेहाद्यभिमानिनअतएवगुणैःसत्वादिभिःप्रवर्तमानस्यजनस्यदर्शयभवानितित्वमित्य
र्थः।पाठांतरेहेभववानितिसंबोधनं॥१६॥एवंतावत्काम्यधर्मादेरनर्थहेतुत्वात्तंविहायहरेर्लीलेववर्णनीयेत्युक्तं।इदानींतुनित्यनैमित्तिक

भा०प्र०

नैमित्तिकस्यकर्मनिष्ठामप्यनादृत्यकेवलंहरिभक्तिरेवोपदेष्टव्येत्याशयेनाह।त्यक्त्वेति।ननुस्वधर्मत्यागेनभजन्भक्तिपरिपाकेनयदि
कृतार्थोभवेत्तदानकाचिच्चिंतापरंपुनरपक्कएवम्रियेत।ततोऽन्यस्यपतनात्तदास्वधर्मत्यागनिमित्तोऽनर्थःस्यादित्याशंक्याह।ततोभजनात्
कथंचित्भ्रष्टेपतन्म्रियेतवायदितदापिभक्तिरसिकस्यकर्मानधिकारान्नानर्थशंका।अंगीकृत्याप्याह।वाशब्दःकटाक्षे।यत्रक्कवा न
नीचयोनावपिअमुष्यभक्तिरसिकस्यअभद्रमभूत्किंनाभूदेवेत्यर्थः।भक्तिवासनासद्भावादितिभावः।अभजद्भिस्तुकेवलंस्वधर्म ज
तःकोवाअर्थआप्तः।अभजतामितिषष्ठीतुसंबंधमात्रविवक्षया॥१७॥ननुस्वधर्ममात्रादपिकर्मणापितृलोकइतिश्रुतेःपितृलोका
प्राप्तिःफलमस्त्येवतत्राह।तस्यैवेति।तस्यैवहेतोःतदर्थंयत्नंकुर्यात्।यदुपरिब्रह्मलोकपर्यंतंअधःस्थावरपर्यंतंचाभ्रमद्भिर्जीवैर्न

तस्यैवहेतोःप्रयतेतकोविदोनलभ्यतेयद्भ्रमतामुपर्यधः।तल्लभ्यतेदुःखवदन्यतःसुखंकालेनसर्वत्रगभीररंहसा॥१८॥
नवैजनोजातुकथंचनाव्रजेन्मुकुंदसेव्यन्यवदंगसंसृतिं।स्मरन्मुकुंदाङ्घ्र्युपगूहनंपुनर्विहातुमिच्छेन्नरसग्रहोयतः॥१९॥

लभ्यते।षष्ठीतुपूर्ववत्।ततुविषयसुखंअन्यतएवप्राचीनकर्मणासर्वत्रनरकादावपिलभ्यते।दुःखवत्।यथादुःखंप्रयत्नंविनापिलभ्यतेतद्वत्॥ ल
तदुक्तं।अप्रार्थितानिदुःखानियथैवायांतिदेहिनां।सुखान्यपितथामन्येदैन्यमत्रातिरिच्यतइति॥१८॥यदुक्तंयत्रक्कवाभद्रमभूदिति।तदु
पपादयतिनवाइति।मुकुंदसेवीजनःजातुकदाचित्कथंचनकुयोनिगतोपिसंसृतिंनाव्रजेन्नविशेत्।अंगहेअन्यवत्केवलकर्मनिष्ठ
वदितिवैधर्म्यदृष्टांतः।कुतइत्यतआह।मुकुंदांघ्र्युपगूहनंआलिंगनंपुनःस्मरन्विहातुंनेच्छेत्।यतोयंजनोरसग्रहःरसेनरसनीयेनगृह्य
तेवशीक्रियते।यद्वारसनीयेग्रहआग्रहोयस्य।तदुक्तंभगवतायततेचततोभूयःसंसिद्धौकुरुनंदन।पूर्वाभ्यासेनतेनैवह्रियतेह्यवशोपि २०
सइति॥१९॥

तर्ह्येवं भगवल्लीलां प्राधान्येन [illegible] वर्णयेत्युक्तं तत्र को भगवान्कास्य तस्य लीला इत्यपेक्षायामाह इदमिति। इदं विश्वं भगवानेव स तु अस्माद्वि ने
श्वस्मादितरः ईश्वरात्प्रपंचो न पृथक्। ईश्वरस्तु प्रपंचात्पृथगित्यर्थः। तत्र भगवतो हेतोर्जगतस्थित्यादयो भवंति। अनेनैव लीला अपि दर्शि
ताः। यद्वा इदं विश्वं भगवानिव यः स जीवोपि भगवान् चेतनाचेतनप्रपंचस्तद्व्यतिरेकेण नास्ति स एवैकस्तत्त्वमित्यर्थः। हिशब्देन सर्वं
खल्विदं ब्रह्मेत्यादि प्रमाणं सूचितं। तद्धि स्वयमेव भवान्वेद प्रादेशमात्रं एकदेशमात्रं आचार्यवान् पुरुषो वेदेत्यादि कृत्यर्थसंपादनाय
तार प्रदर्शितं॥२०॥ न च तवाचार्यापेक्षा ईश्वरावतारत्वादित्याह। त्वमिति। हे अमोघदृक्। त्वं आत्मना स्वयं आत्मानमजमेव संतं जगतः शिवाय प्र

यतो

इदं हि विश्वं भगवानिवेतरो जगत्स्थाननिरोधसंभवाः। तद्धि स्वयं वेद भवांस्तथापि वै प्रादेशमात्रं भवतः प्रदर्शितं॥२०॥ त्व
मात्मनात्मानमवेह्यमोघदृक् परस्य पुंसः परमात्मनः कलां। अजं प्रजातं जगतः शिवाय तन्महानुभावाभ्युदयोधिगण्यतां॥२१॥
इदं हि पुंसस्तपसः श्रुतस्य वा स्विष्टस्य सूक्तस्य च बुद्धिदत्तयोः। अविच्युतोर्थः कविभिर्निरूपितो यदुत्तमश्लोकगुणानुवर्णनं॥
श्र २२॥ अहं पुरातीतभवेऽभवं मुने दास्यास्तु कस्याश्चन वेदवादिनां। निरूपितो बालक एव योगिनां शुश्रूषणे प्रावृषि निर्विविक्षतां॥२३॥

जातमवेहि कुतः परस्य पुंसः कलांशान्तं। तत्तस्मान्महानुभावस्य हरेरभ्युदयः पराक्रमो अधिकं गण्यतां निरूप्यतां। अनेनैव तपआदि सर्वं त
वसफलं स्यादित्याह इदं हीति। श्रुतादयो भावे निष्ठा इदमेव हि तपःश्रवणादेरविच्युतो नित्योर्थः फलं किं तत् उत्तमश्लोकस्य गुणा
नुवर्णनमिति यत्॥२२॥ सत्संगतो हरिकथाश्रवणादिफलं स्ववृत्तांतेन प्रपंचयति। अहमिति। अहं पुरा पूर्वकल्पे अतीते भवे पूर्वजन्मनि वे त
दवादिनां दास्याः सकाशाद्भवं जातोऽस्मि। निरूपितः नियुक्तः। योगिनां शुश्रूषणे। प्रावृषि वर्षोपलक्षिते चातुर्मास्ये। निर्विविक्षतां निर्वेशं ए
कत्रवासं कर्तुमिच्छतां॥२३॥

ना०प्र० अपेतान्याखिलानि चापलानि यस्मात्तस्मिन् नियतेंद्रिये अधृतक्रीडके त्यक्तक्रीडासाधने अनुवर्त्तिनि अनुकूले ॥२४॥ उच्छिष्टस्य लेपान् पात्रलग्नान्तैर्द्विजैरनुज्ञातः सन् भुंजे स्म तेन भोजनेनापास्तं किल्विषो जातोस्मीति तेषां धर्मे परमेश्वरभजने एव आत्मनो मनसो रुचिः प्र
जायते स्मेत्यनुषंगः ॥२५॥ अश्रृणवं श्रुतवानस्मि मे श्रद्धया ममैव श्रृण्वतः सिद्धया न त्वन्येन बलाज्जनितया अतो ममेत्यस्यापौनरुक्त्यं ।
प्रियं श्रवो यशो यस्य तस्मिन् भगवति ॥२६॥ लब्धरुचेर्मम सास्खलिता अप्रतिहता मतिः श्रृण्वदित्यनुषंगः यया मत्पापरे प्रपंचात्मा भ

ते मय्यपेताखिलचापलेऽर्भके दांतेऽधृतक्रीडनकेऽनुवर्त्तिनि ॥ चक्रुः कृपां यद्यपि तुल्यदर्शनाः शुश्रूषमाणे मुनयोल्पभाषिणि ।
२४॥ उच्छिष्टलेपाननुमोदितो द्विजैः सकृत्स्म भुंजे तदपास्तकिल्बिषः ॥ एवं प्रवृत्तस्य विशुद्धचेतसस्तद्धर्म एवात्मरुचिः प्रजा
यते ॥२५॥ तत्रान्वहं कृष्णकथाः प्रगायतामनुग्रहेणाश्रृणवं मनोहराः ॥ ताः श्रद्धया मेऽनुपदं विश्रृण्वतः प्रियश्रवस्यंग
ममाभवद्रुचिः ॥२६॥ तस्मिंस्तदा लब्धरुचेर्महामुने प्रियश्रवस्यस्खलिता मतिर्मम ॥ ययाहमेतत्सदसत्स्वमायया प
श्ये मयि ब्रह्मणि कल्पितं परे ॥२७॥ इत्थं शरत्प्रावृषिकावृतू हरेर्विश्रृण्वतो मेनुसवं यशोमलं । संकीर्त्यमानं मुनिभिर्महा तो
त्मभिर्भक्तिः प्रवृत्तात्मरजस्तमोपहा ॥२८॥
ते ब्रह्मस्वरूपे मयि सदसत् स्थूलसूक्ष्मं च एतच्छरीरं स्वमायया अविद्यया कल्पितं न तु वस्तुतोऽस्तीति तल्लक्षणमेव पश्यामि ॥२७॥
एवं श्रुतैः परार्थज्ञाते देहादिकृतविक्षेपनिवृत्ते सत्तत्कारणभूतरजस्तमोनिवृत्तिका दृढा भक्तिर्जातेत्याह ॥ इत्थमिति ॥ हरेर्यशः २२
अनुसवं त्रिकालं ॥२८॥

तस्येति शुद्धत्वंपदार्थस्यदृष्टवन्त्किमतोमेऽश्रितस्यविनीतस्य ॥२९॥ गुह्यतममिति साधनभूतधर्मतत्त्वज्ञानं गुह्यं । तत्साध्यं विविक्ता
त्मज्ञानं गुह्यतरं । तत्प्राप्येश्वरज्ञानं गुह्यतमं । भगवतोदितं भागवतशास्त्रं । अन्ववोचन् । उपदिष्टवंतः ॥३०॥ तदेवज्ञानं पूर्वोक्त
त्वंपदार्थज्ञानात् विविक्तेन दर्शयति । येनैवेति । अविदं ज्ञातवानहं ॥३१॥ तत्साधनधर्मरहस्यं च सूचितमित्याह एतदिति । तापत्रय
स्याध्यात्मिकादेश्चिकित्सितं भेषजं निवर्त्तकं सत्त्वशोधकमिति । यावत् । किं तद्भगवतिभावितं समर्पितं यत्कर्म तत् । कथं भूते भग
अ वतिईश्वरेसर्वनियंतरि । एवमपि च ब्रह्मणि अच्युते पूर्णरूपे ॥३२॥ ननु संसारहेतोः कर्मणः कथं तापत्रयनिवर्त्तकत्वं सामग्रीभेदेन घ

तस्यैवंमेनुरक्तस्यप्रश्रितस्यहतैनसः ॥ श्रद्दधानस्यबालस्यदांतस्यानुचरस्य च ॥२९॥ ज्ञानंगुह्यतमंयत्तत्साक्षाद्भगवतोदितं ॥
अन्ववोचन्गमिष्यंतःकृपयादीनवत्सलाः ॥३०॥ येनैवाहंभगवतोवासुदेवस्यवेधसः ॥ मायानुभावमविदंयेनगच्छंतितत्पदं ॥३१॥
एतत्संसूचितंब्रह्मंस्तापत्रयचिकित्सितं ॥ यदीश्वरेभगवतिकर्मब्रह्मणिभावितं ॥३२॥ आमयोयेनभूतानांजायतेयश्चसुव्रत ।
तदेवह्यामयंद्रव्यंनपुनातिचिकित्सितं ॥३३॥ एवंनृणांक्रियायोगाःसर्वेसंसृतिहेतवः । तएवात्मविनाशायकल्पंतेकल्पिताःपरे ॥३४॥

टत इति सदृष्टांतमाह । द्वाभ्यां । य आमयो रोगः येन घृतादिना जायते । तदेव केवलमामयकारणभूतं द्रव्यं तमामयं न पुनाति न निवर्त्तयतीत्यर्थः ॥
किंतु चिकित्सितं द्रव्यांतरैर्भावितं सत्पुनात्येव यथा ॥३३॥ तथा आत्मविनाशायकर्मनिवृत्तये कल्पंते समर्था भवंति । परे ईश्वरे कल्पिता अ
र्पिताः संतः । अत्र च प्रथमं महत्सेवा ततः कृपा ततस्तद्धर्मश्रद्धा ततो भगवत्कथाश्रवणं ततो भगवति रतिः । तया च देहद्वयविवेकात्मज्ञानं त वि
तो दृढा भक्तिः । ततो भगवत्तत्त्वज्ञानं ततस्तत्कृपया सर्वज्ञत्वादिभगवद्गुणाविर्भाव इति [illegible]
क्रमो दर्शितः ॥३४॥

भा० प्र० नतु च ज्ञानेनाशानस्याप्तकर्मनाशः॥ तच्च ज्ञानं भक्तियोगाद्भवति। कथं। कर्मणा कर्मनाशः स्यात् तत्राह यदत्रेति॥३५॥ भगवदर्पणेन क्रियमा
णं भक्तियोगं जनयति सदाचारेण दर्शयति॥ यत्र यदा भगवतः शिक्षया कर्माणि कुर्वाणा भवंति। तदा कृष्णस्य गुणनामानि गृणंति अनु
स्मरंति च कृष्णमित्यर्थः॥ इयं भगवच्छिक्षा यथा। यत्करोषि यदश्नासि यज्जुहोषि ददासि यत्॥ तत्तपस्यसि कौंतेय तत्कुरुष्व मदर्पण।
मिति॥३६॥ कीर्त्तनस्मरणरूपभक्तिहेतुत्वमुक्तं ज्ञानहेतुत्वमाह॥ द्वाभ्यां। नमो धीमहीति मनसा नमनं कुर्वीमहि॥३७॥ अमूर्त्ति

यदत्र क्रियते कर्म भगवत्परितोषणं॥ ज्ञानं यत्तदधीनं हि भक्तियोगसमन्वितं॥३५॥ कुर्वाणा यत्र कर्माणि भगवच्छिक्षयासकृत्
गृणंति गुणनामानि कृष्णस्यानुस्मरंति च॥३६॥ नमो भगवते तुभ्यं वासुदेवाय धीमहि॥ प्रद्युम्नायानिरुद्धाय नमः संकर्षणाय च।
॥३७॥ इति मूर्त्त्यभिधानेन मंत्रमूर्त्तिममूर्त्तिकं॥ यजते यज्ञपुरुषं स सम्यग्दर्शनः पुमान्॥३८॥ इमं स्वनिगमं ब्रह्मन्नवेत्य मदनुष्ठि
तं॥ अदान्मे ज्ञानमैश्वर्यं स्वस्मिन्भावं च केशवः॥३९॥ त्वमप्यदभ्रश्रुत विश्रुतं विभोः समाप्यते येन विदां बुभुत्सितं॥ प्रख्या
हि दुःखैर्मुहुरर्दितात्मनां संक्लेशनिर्वाणमुशंति नान्यथा॥४०॥ इति श्रीभागवते महापुराणे प्रथमस्कंधे पंचमोध्यायः॥५॥ ॥

मूर्त्ति कं मंत्रो यत्कौ व्यतिरिक्ता मूर्त्तिर्यस्य तं यजते पूजयति स पुमान् सम्यग्दर्शनो भवति॥३८॥ एवं कृतवति मयि हरिः स्वसदृशं ज्ञानादिकं दत्तवान्॥
इदं स्वनिगमं स्वोपदेशं मयानुष्ठितं अवेत्य ज्ञात्वा भावं प्रीतिं च॥३९॥ अतस्त्वमप्येवं कुरु इत्याह। त्वमिति। अदभ्रं अनल्पं श्रुतं यस्य हे अद
भ्रश्रुत विभोर्विश्रुतं यशः प्रख्याहि कथय। येन विश्रुतेन बुद्धेन विदां विदुषां बुभुत्सितं बोधुमिच्छा समाप्यते। यतः दुःखैः पीडितानां
क्लेशशांतिं प्रकारांतरेण न मन्यंते॥४०॥ इति श्रीभागवते महापुराणे प्रथमस्कंधे पंचमोध्यायः॥५॥ ॥श्री॥ ॥श्री॥

व्यासस्य प्रश्नस्य यार्थं च षष्ठे प्राग्जन्मसंभवं॥ स्वजन्मापं नारदः प्राह कृष्णसंकथनोद्भवं॥१॥ स्वयमपि तथा चिकीर्षुर्गुरूपदेशानंतरमा
त्मनश्चरितं पृच्छति। भिक्षुभिरिति भिक्षुभिर्विप्रवसिते दूरदेशगमने कृते सति। विज्ञानस्यादेष्टृभिः॥२॥ परं वयः उत्तरमायुः ते
त्वया वर्तितं। इदमिति। दासीपुत्रत्वकृतकलेवरं उदस्राक्षीः उत्सृष्टवानसि॥३॥ एष कल्पांतलक्षणः कालः ते स्मृतिं कथं न व्यव
धात् न खंडितवान्। अत्रागमाभावस्त्वार्षः॥ हि यतः एष सर्वस्य निराकृतिरपलायो यस्मात्॥४॥ अकार्षं कृतवानहं। एकाष.

सूत उवाच॥ एवं निशम्य भगवान्देवर्षेर्जन्म कर्म च॥ भूयः पप्रच्छ तं ब्रह्मन्व्यासः सत्यवतीसुतः॥१॥ वेदव्यास उवा
च॥ भिक्षुभिर्विप्रवसिते विज्ञानादेष्टृभिस्तव॥ वर्तमानो वयस्याद्ये ततः किमकरोद्भवान्॥२॥ स्वायंभुव कया वृत्त्या व
र्तितं ते परं वयः॥ कथं चेदमुदस्राक्षीः काले प्राप्ते कलेवरं॥३॥ प्राक्कल्पविषयामेतां स्मृतिं ते सुरसत्तम॥ न ह्येष व्यवधात्
काल एष सर्वनिराकृतिः॥४॥ श्रीनारद उवाच॥ भिक्षुभिर्विप्रवसिते विज्ञानादेष्टृभिर्मम॥ वर्तमानो वयस्याद्ये तत ए
तदकारषं॥५॥ एकात्मजा मे जननी योषिन्मूढा च किंकरी॥ मय्यात्मजेनन्यगतौ चक्रे स्नेहानुबंधनं॥६॥ सास्वतंत्रा न क
ल्पासीद्योगक्षेमं ममेच्छती॥ ईशस्य हि वशे लोको योषा दारुमयी यथा॥७॥ ॥श्री॥ ॥श्री॥ ॥श्री॥ ॥

कारयोर्विश्लेषः छंदोनुरोधेन॥५॥ तत्र तावत्कंचित्कालं तत्रैव मातृस्नेहयंत्रितोन्ववसमित्याह। एक एवात्मजो यस्याः सा। योषिन्मूढेति
च स्नेहानुबंधे हेतुः॥६॥ किंकरीत्वस्यार्थं प्रपंचयति। अस्वतंत्रा सा अतो न कल्पा न समर्था आसीत्। दारुमयी योषि[illegible]तिपारवश्ये दृष्टांतः॥७॥

ना०प्र० तदेवसा स्नेहंचक्रे॥अहंचशिशादिषुनविज्ञः अतस्तत्रैवन्यवसमित्याह॥अहंतस्मिन्वत्सकुले।तस्याः मातुः स्नेहानुबंधस्यावेक्षयाक

ना दाविरक्षेदितिप्रतीयादित्यर्थः।उषितवान्संक्रांतवान्॥पंचवर्षः॥८॥गेहान्निर्गतांगांदुहंतीहेतौसत्प्रत्ययः।दोग्धुंनिर्गता

मित्यर्थः।पदापादेनआस्पृष्टःस्पृष्टःप्रदाक्रांतः।अदशत्।अखादत्॥९॥तन्मातुर्मरणंज्ञात्वाकल्याणंअन्नीयतईशस्या

नुग्रहंमन्यमानःप्रातिष्ठंप्रस्थितोस्मि॥१०॥स्फीतान्जनपदादीन्तियात्।सन्नमहद्विपिनमद्राक्षमितिचतुर्थेनान्वयः

अहंचतद्वत्सकुलेउषिवांस्तदवेक्षया॥दिग्देशकालाव्युत्पन्नोबालकःपंचहायनः॥८॥एकदानिर्गतांगेहाद्दुहंतींनिशिगां

पथि॥सर्पोदशत्पदास्पृष्टःकृपणांकालचोदितः॥९॥तदातदहमीशस्यभक्तानांसमभीप्सतः॥अनुग्रहंमन्यमानः

प्रातिष्ठंदिशमुत्तरां॥१०॥स्फीतान्जनपदांस्तत्रपुरग्रामव्रजाकरान्खेटखर्वटवाटीश्चवनान्युपवनानिच॥११॥

चित्रधातुविचित्राद्रीनिभभग्नभुजद्रुमान्॥जलाशयान्शिवजलान्नलिनीसुरसेविताः॥१२॥ ॥ ॥ ॥ ॥

जनपदादिषुनानागुणदोषयुक्तेषुसमदृष्टिःसन्गतोऽहमितितात्पर्यार्थः॥स्फीतान्समृद्धान्जनपदान्देशान्।तत्रतस्यांदिशिपु

रग्रामव्रजाकरान्।तत्रपुराणिराजधान्यः॥ग्रामाः अपुप्रोक्ताःविप्राश्चविप्रभृत्याश्चयत्रचैववसंतिते।सतुग्रामइतिप्रोक्तःशूद्राणां

नि वासएवचेति।व्रजागोकुलानिआकराःरत्नाद्युत्पत्तिस्थानानि।खेटाकर्षकग्रामाः।खर्वटाःगिरितटग्रामाः अगूढाःवा।एकतोयत्रतु

ग्रामोनगरंचैकतःस्थितं।मिश्रंतुखर्वटंनामनदीगिरिसमाश्रयमिति।वाटीःपूगकुमपुष्पवाटिकाः।लताःवनानिस्वतःसिद्धवृक्षाणां

समूहाःतानिच॥११॥चित्रैर्धातुभिःस्वर्णरजताद्यैःविचित्रानद्रीश्चाऽइभैर्भग्नाभुजाःशाखायेषांतेद्रुमायेषुतान्शिवानिजलानिज

लानियेषांतान्नलिनीसरसी॥१२॥

चित्राः स्वना येषां तैः पत्ररथैः पक्षिभिः तन्नादप्रबुद्धैरित्यर्थः ॥ विभ्रमद्भिः भ्रमरैः श्रीः शोभा यासां ताः नलिनीः अतियातः अतिक्रम्य गतः
सन् महद्विपिनं वनमद्राक्षं ॥१३॥ कीदृशं नलवेणुशराणां स्तंबैः कुशैः कीचकैश्च गह्वरं दुर्गमं । तत्र वेणुजातय एव विपुलांतराल
गर्भाः कीचका इति । घोरं दुःसहं प्रतिभयाकारं भयंकररूपं व्यालादीनामजिरं क्रीडास्थानं ॥१४॥ परिश्रांतानि इंद्रियाणि आत्मा
देहश्च यस्य । तृषा परीतो व्याप्तः । उपस्पृष्टः आचांतः ॥१५॥ पिप्पलोपस्थे अश्वत्थमूले आश्रितः उपविष्टः आत्मना बुद्ध्या आत्मस्थं हृ

चित्रस्वनैः पत्ररथैर्विभ्रमद्भ्रमरश्रियः ॥ एक एवातियातोहमद्राक्षं विपिनं महत् ॥१३॥ नलवेणुशरस्तंबकुशकीचकगह्वरं ॥ घोरं प्रति
भयाकारं व्यालोलूकशिवाजिरं ॥१४॥ परिश्रांतेंद्रियात्माहं तृट्परीतो बुभुक्षितः ॥ स्नात्वा पीत्वा ह्रदे नद्या उपस्पृष्टो गतश्रमः ॥
॥१५॥ तस्मिन्निर्मनुजेरण्ये पिप्पलोपस्थ आश्रितः ॥ आत्मनात्मानमात्मस्थं यथाश्रुतमचिंतयं ॥१६॥ ध्यायतश्चरणांभो
जं भावनिर्जितचेतसा ॥ उत्कंठ्याश्रुकलाक्षस्य हृद्यासीन्मे शनैर्हरिः ॥१७॥ प्रेमातिभरनिर्भिन्नपुलकांगोतिनिर्वृतः ॥
आनंदसंप्लवे लीनो नापश्यमुभयं मुने ॥१८॥ रूपं भगवतो यत्तन्मनःकांतं शुचापहं ॥ अपश्यन्सहसोत्तस्थे वैक्लव्याद्दु
र्मना इव ॥१९॥ दिदृक्षुस्तदहं भूयः प्रणिधाय मनो हृदि ॥ वीक्षमाणोऽपि नापश्यमवितृप्त इवातुरः ॥२०॥ एवं यतंतं विजने मा
माह गोचरो गिरां ॥ गंभीरश्लक्ष्णया वाचा शुचः प्रशमयन्निव ॥२१॥ हंतास्मिन्जन्मनि भवान्मा मां द्रष्टुमिहार्हति ॥ अविपक्वकषाया

दिस्थं आत्मानं परमात्मानं ॥१६॥ भावेन भक्त्या निर्जितं वशीकृतं । पश्चात् तेन उत्कंठ्येन अश्रुकलायुक्ते अक्षिणी यस्य ॥१७॥ प्रेम्णातिभरेण नि
र्भिन्नपुलकान्यंगानि यस्य । आनंदानां संप्लवे महाप्रवाहे परमानंदे । उभयं आत्मानं परं च ॥१८॥ मनसः कांतं अभीष्टं शुचा शोकः तामपहंती
त्यपातरः । उत्तस्थे उत्थितोस्मि । हृदि मनः प्रणिधाय स्थिरीकृत्य अवितृप्तोहमातुर इव अभवमिति शेषः ॥२०॥ गिरामगोचरः संवेदनस्यावि
षयं भूत ईश्वरः ॥२१॥ हंतेति सानुकंपसंबोधने । मा इति मां द्रष्टुं नार्हति । यतः न विपक्वाः दग्धाः कषायाः मलाः कामादयो येषां कुयोगिनां अनिष्पन्नयो
गानां ॥२२॥

कुतस्तर्हि दृष्टोसि तत्राह। सकृदिति। सकृद्दर्शितं मयेति। यदेतत्त्वत्कामाय मय्यनुरागाय। त्वत्कामेन किमित्यत आह। मत्कामः पुमान् हृच्छयान् कामा
न्॥२३॥ अदीर्घयापि सतां सेवया। अवद्यं निंद्यं। लोकं देहं। मज्जनतां मत्पार्षदतां गंतासि॥२४॥ प्रजानां सर्गे सृष्टौ निरोधे संहारेपि प्रजास
र्गस्य निरोध इति वा॥२५॥ तदुक्त्वा सिद्धं महद्भूतं अस्य महतो भूतस्य निश्वसितमेतद्यदृग्वेद इत्यादि श्रुतेः। कीदृशं। ईश्वरं सर्वनियंतृ। नभो
लिंगं मूर्तिर्यस्य तत्। नभोलिंगं संनिहितमपि न लिंग्यते इत्यलिंगं। तस्मै अदृष्टाय अवनामं प्रणामं विदधे कृतवान् अहं तेनानुकं
पितः सन्॥२६॥ हतत्रपः त्यक्तलज्जः विमत्सरो जातोस्मीति शेषः॥२७॥ काले स्वावसरे। कालः मृत्युः। प्रादुरभूत् आविर्बभूव। आक

सकृद्यद्दर्शितं रूपमेतत्कामाय तेनघ॥ मत्कामः शनकैः साधुः सर्वान्मुंचति हृच्छयान्॥२३॥ सत्सेवयादीर्घयापि जाता मयि दृढा
मतिः॥ हित्वावद्यमिमं लोकं गंता मज्जनतामसि॥२४॥ मतिर्मयि निबद्धेयं न विपद्येत कर्हिचित्॥ प्रजासर्गनिरोधेपि स्मृतिश्च म
दनुग्रहात्॥२५॥ एतावदुक्त्वोपरराम तन्महद्भूतं नभोलिंगमलिंगमीश्वरं॥ अहं च तस्मै महतां महीयसे शीर्ष्णावनामं विदधे
ऽनुकंपितः॥२६॥ नामान्यनंतस्य हतत्रपः पठन् गुह्यानि भद्राणि कृतानि च स्मरन्॥ गां पर्यटंस्तुष्टमना गतस्पृहः कालं प्रती
क्षन्विमदो विमत्सरः॥२७॥ एवं कृष्णमतेर्ब्रह्मन्नासक्तस्यामलात्मनः॥ कालः प्रादुरभूत्काले तडित्सौदामिनी यथा॥२८॥ प्र
युज्यमाने मयि तां शुद्धां भागवतीं तनुं॥ आरब्धकर्मनिर्वाणो न्यपतत्पांचभौतिकः॥२९॥ ॥ ॥ ॥ ॥ ॥ ॥

स्यात्। प्रादुर्भावे दृष्टांतः। विद्युदिवेति। सौदामिनीति विशेषणं। स्फुटत्वप्रदर्शनार्थं। सुदाममाला तत्र भवा सौदामिनी मालाकारेत्यर्थः। यद्वा
सुदामा पर्वतः तेनैकदिगिति सूत्रेणाण् स्फटिकादिमयपर्वतप्रांते जाता हि विद्युदतिस्फुटा भवतीति तद्वदित्यर्थः॥ तडिदंतिकबाधयोरिति
निरुक्तस्मरणात्॥२८॥ प्रयुज्यमाने मयि तामित्ययमर्थः। हित्वावद्यमिमं लोकं गंता मज्जनतामसीति या भगवता भगवत्पार्षदरूपा शुद्धा स
त्वमयी तनुः प्रतिश्रुता। तां प्रति भगवता मयि प्रयुज्यमाने नीयमाने आरब्धं यत्कर्म निर्वाणं समाप्तं यस्य आरब्धकर्मणो निर्वाणं यस्येति वा

इदंत्रैलोक्यंआदायउपसंहृत्यउदन्वतः॥एकार्णवस्यांभसिशयानेश्रीनारायणेशिशयिषोःशायनंकर्तुमिछोर्विभोर्ब्रह्मणः अंत
र्मध्यंअनुप्राणंनिश्वासेनसहविवेशप्रविष्टोहं।ततोवतीर्यविश्वमात्मदेहमाविश्यचक्रिणः।अवापवैष्णवींनिद्रामेकीभूयाथविष्णुनेति
…दिदेवर्षेः कूर्मोक्तेः।स्वापनेंऽनसीतिपाठेस्वापनेस्वस्यअयनंऽनसिशिशयिषोर्ब्रह्मणइतिश्रीनारायणेनाभेदविवक्षयोक्तिरितिगमयितव्यं॥
२९॥प्राणेभ्यःअहंमरीचिमिश्राःतन्मुखाऋषयश्चयज्ञिरे॥३१॥येकर्मिणस्तेवहिर्नयांतितत्तपआदिभिर्ब्रह्मलोकंगतास्तेऽतर्नयां

२९

--कल्पांतइदमादायशयानेंऽभस्युदन्वतः।शिशयिषोरनुप्राणंविविशेंऽतरहंविभोः॥३०॥सहस्रयुगपर्यंतेउत्था
येदंसिसृक्षतः॥मरीचिमिश्राऋषयप्राणेभ्योहंचजज्ञिरे॥३१॥अंतर्वहिश्चलोकांस्त्रीन्पर्येम्यस्कंदितव्रतः॥अनुग्र
हान्महाविष्णोरविघातगतिःक्वचित्॥३२॥देवदत्तामिमांवीणांस्वरब्रह्मविभूषितां॥मूर्छयित्वाहरिकथांगायमा
वी नश्चराम्यहं॥३३॥प्रगायतःस्ववीर्याणितीर्थपादप्रियश्रवा॥आहूतइवमेशीघ्रंदर्शनंयातिचेतसि॥३४॥एतद्ध्यातुरचि
त्तानांमात्रस्पर्शेछयामुहुः॥भवसिंधुप्लवोदृष्टोहरिचर्यानुवर्णनं॥३५॥

ति॥अहंतुमहाविष्णोरनुग्रहादस्कंदितव्रतश्चर्यतःसन्नंतर्वहिश्चपर्येमिपर्यटामिक्वचिदपिअविघाताअप्रतिहतागतिर्यस्यसः॥३२॥कि
मितिपर्यटईश्वराज्ञयालोकमंगलार्थमित्याह।चतुर्भिः।देवेनईश्वरेणदत्तांस्वराः॥निषादर्षभगांधारषड्जमध्यमधैवतपंचमाइतिधैवतस
प्तसएवब्रह्माब्रह्माभिव्यंजकत्वात्।तेनविभूषितांस्वतःसिद्धसप्तसुरामित्यर्थः।मूर्छयित्वामूर्छनालापवतींकृत्वा॥३३॥स्वप्रयोजन
माह।प्रगायतइति॥३४॥परप्रयोजनमाह।एतद्धीति।मात्राविषयास्तेषांस्पर्शाभोगास्तेषामिछयाआतुराणिचित्तानियेषांतेषांहरि
चर्यानुवर्णनंयत्।एतदेवसिंधोःप्लवःपोतः।नकेवलंश्रुतिप्रामाण्येनकिंतुव्यतिरेकान्वयाभ्यांदृष्टएवेत्यर्थः॥३५॥ ॥ ॥

भा०प्र०

एतदेवेत्युक्तमवधारणमनुभवेनद्रढयति।यमादिभिः तथा न शाम्यति।यद्वन्मुकुंदसेवया अद्धा साक्षादात्मा मनः शाम्यति।कथंचिन्मु
कुंदसेवामात्रेण शाम्यति।किंपुनस्तद्गुणवर्णनेनेतिभावः॥३६॥भवतो मनःपरितोषकं चाख्यातं॥३७॥आमंत्र्यानुज्ञाप्य यादृच्छिकः
स्वप्रयोजनसंकल्पशून्यः॥३८॥हरिकथा नाम्ग्यं श्लाघते अहो इति।माद्यन्हृष्यन्।तंत्र्या वीणया॥३९॥इति प्रथमे षष्ठः॥अथम

यमादिभिर्योगपथैः कामलोभहतो मुहुः॥मुकुंदसेवया यद्वत्तथात्माद्धा न शाम्यति॥३६॥सर्वं तदिदमाख्यातं यत्पृष्टोऽहं
त्वयानघ॥ जन्मकर्मरहस्यं मे भवतश्चात्मतोषणं॥३७॥सूत उवाच॥एवं संभाष्य भगवान्नारदो वासवीसुतं।आ
मंत्र्य वीणां रणयन्ययौ यादृच्छिको मुनिः॥३८॥अहो देवर्षिर्धन्योयं यत्कीर्तिं शार्ङ्गधन्वनः॥गायन्माद्यन्निदं तंत्र्या रमयत्यातुरं
जगत्॥३९॥इति श्रीभागवते महापुराणे प्रथमस्कंधे षष्ठोध्यायः॥६॥शौनक उवाच॥निर्गते नारदे सूत भगवान्बादरा
यणः॥श्रुतवांस्तदभिप्रेतं ततः किमकरोद्विभुः॥१॥सूत उवाच॥ब्रह्मनद्यां सरस्वत्यां आश्रमः पश्चिमे तटे॥सम्याप्रा
स इति प्रोक्त ऋषीणां सत्रवर्द्धनः॥२॥तस्मिन्स्व आश्रमे व्यासो बदरीखंडमंडिते।आसीनोप उपस्पृश्य प्रणिदध्यौ मनः स्वयं॥३॥
भक्तियोगेन मनसि सम्यक्प्रणिहितेऽमले॥अपश्यत्पुरुषं पूर्णं मायां च तदुपाश्रयां॥४॥ ॥श्री॥ ॥श्री॥ श्री॥

भगवत्श्रोतुर्जन्म वक्तुं परीक्षितः।शुक्रबालवधाद्रौणेर्दंडः स तमुच्यते।तस्य नारदस्याभिप्रेतं श्रुतवान्॥१॥ब्रह्मनद्यां ब्रह्मदैव
त्यायां ब्राह्मणैरन्वितायां वा सत्रं कर्म वर्द्धयतीति तथा॥२॥बदरीणां खंडेन समूहेन मंडिते मनः प्रणिदध्यौ स्थिरीचकार समाधि
नानुस्मरेति नारदोपदिष्टं ध्यानं कृतवानित्यर्थः॥३॥प्रणिहिते निश्चले अत्र हेतुः भक्तियोगेनामले पूर्वं प्रथमं पुरुषमीश्वरम २५
पश्यत्।पूर्णमिति व्यापकः॥तदुपाश्रयां ईश्वराश्रयां॥तदधीनां मायां चापश्यत्॥४॥ ॥श्रीकृष्णायनमः॥ ॥श्री॥

ईशमायाकृतां च जीवानां संसृतिमपश्यदित्याह यया संमोहितः स्वरूपावरणेन निह्नितः । परोऽपि गुणत्रयाद्व्यतिरिक्तोऽपि तत्कृतं गु
णत्रयाभिमानकृतमनर्थं च कर्तृत्वादिकं प्राप्नोति ॥५॥ अनर्थमुपशमयतीत्यधोक्षजे साक्षाद्भक्तियोगः तं चापश्यत् । एतत्सर्वं स्वयं दृष्ट्वा
ऽमजानतो लोकस्यार्थे सात्वतसंहितां श्रीभागवताख्यां चक्रे । तदनेन श्लोकत्रयेण भागवतार्थः संक्षेपतो दर्शितः । तदुक्तं भवति । वि
द्याशक्त्या मायानियंता नित्याविर्भूतपरमानंदस्वरूपः सर्वज्ञः सर्वशक्तिरीश्वरः । तन्मायया संमोहितस्तिरोभूतस्वरूपस्तद्विपरीतधर्मा
जीवः तस्य चेश्वरस्य भक्त्या लब्धतत्त्वज्ञानेन मोक्ष इति । तदुक्तं विष्णुस्वामिना ह्लादिन्या संविदाश्लिष्टः सच्चिदानंद ईश्वरः । स्वा

यया संमोहितो जीव आत्मानं त्रिगुणात्मकं । परोऽपि मनुतेऽनर्थं तत्कृतं चाभिपद्यते ॥५॥ अनर्थोपशमं साक्षाद्भक्तियोगमधोक्ष
जे लोकस्याजानतो विद्वांश्चक्रे सात्वतसंहितां ॥६॥ यस्यां वै श्रूयमाणायां कृष्णे परमपूरुषे । भक्तिरुत्पद्यते पुंसः शोकमोहभयाप
हा ॥७॥ स संहितां भागवतीं कृत्वानुक्रम्य चात्मजं । शुकमध्यापयामास निवृत्तिनिरतं मुनिः ॥८॥ शौनक उवाच ॥ स वै निवृ
त्तिनिरतः सर्वत्रोपेक्षको मुनिः । कस्य वा बृहतीमेतामात्मारामः समभ्यसत् ॥९॥ सूत उवाच ॥ आत्मारामाश्च मुनयो नि
र्ग्रंथा अप्युरुक्रमे । कुर्वंत्यहैतुकीं भक्तिमित्थंभूतगुणो हरिः ॥१०॥

विद्यासंवृतो जीवः संक्लेशनिकराकरः । तथा । स ईशो यद्वशे माया स जीवो यस्तयार्दितः । स्वाविर्भूतपरानंदः । स्वाविर्भूतसुदुःखभूः । स्वादृगु
त्थविपर्यासभवभेदजभीशुचः । यन्मायया जुषन्नास्ते तमिमं नृहरिं नुम इत्यादि ॥६॥ संहितायाश्चानर्थोपशमकत्वं दर्शयति । यस्यामिति श्रूयमा
णायामेव किं पुनः कृतायामित्यर्थः ॥७॥ अनुक्रम्य शोधयित्वा ॥८॥ कस्य वा हेतोर्बृहतीं विततां ॥९॥ निर्ग्रंथाः ग्रंथेभ्यो निर्गताः । तदुक्तं गीता
सु । यदा ते मोहकलिलं बुद्धिर्व्यतितरिष्यति । तदा गंतासि निर्वेदं श्रोतव्यस्य श्रुतस्य चेति । यद्वा ग्रंथिरेव ग्रंथः निवृत्तहृदयग्रंथय इत्यर्थः । य
त्थं ननु मुक्तौ किं भक्त्या इति सर्वाक्षेपपरिहारार्थमाह इत्थंभूतगुण इति ॥१०॥

भा॰प्र॰
२६

ननु किं कुर्वंतु नाम एतच्छास्त्राभ्यासे शुकस्य किं कारणमित्यत आह॥ अध्यगात् अधीतवान् विष्णुजनाः प्रिया यस्येति व्याख्यानादिप्रसं
गेन तत्संगतिकाम इति भावः। एतेन तस्य पुत्रो महायोगीत्यादिना शुकस्य व्याख्याने प्रवृत्तिः कथमिति यत्पृष्टं तस्योत्तरमु
क्तं॥११॥ यदन्यत्पृष्टं परीक्षितः प्रायोपवेशेन श्रवणं कथमिति तस्य जन्म महाश्चर्यमित्यादिना तस्योत्तरं वक्तुमाह परीक्षित इ
ति। विलापनं मुक्तिं मृत्युं वा। संस्थां महाप्रयाणं। श्रीकृष्णकथानामुदयो यथा भवति तथा॥१२॥ परीक्षितो जन्म निरूपयिष्य
न्नादौ तावज्जन्मन्येवाश्वत्थाम्नो ब्रह्मास्त्रात् कृष्णेन रक्षित इति वक्तुं कथां प्रस्तौति यदेत्यादिना। यदा द्रौणिरश्वत्थामा कृष्णासु
स्त्रा

हरेर्गुणाक्षिप्तमतिर्भगवान्बादरायणिः। अधिगान्महदाख्यानं नित्यं विष्णुजनः प्रियः॥११॥ परीक्षितोथ राजर्षेर्जन्मकर्मविला
पनं। संस्थां च पांडुपुत्राणां वक्ष्ये कृष्णकथोदयं॥१२॥ यदा मृधे कौरवसृंजयानां वीरेष्वथो वीरगतिं गतेषु वृकोदराविद्धगदा
भिमर्शभग्नोरुदंडे धृतराष्ट्रपुत्रे॥१३॥ भर्तुः प्रियं द्रौणिरिति स्म पश्यन् कृष्णासुतानां स्वपतां शिरांसि उपाहरद्विप्रियमेव
तस्य तज्जुगुप्सितं विगर्हयंति॥१४॥ माता शिशूनां निधनं सुतानां निशम्य घोरं परितप्यमाना तदारुदद्बाष्पकलाकुलाक्षी तां सां
कर्म
त्वयन्नाह किरीटमाली॥१५॥

तानां द्रौपदीपुत्राणां शिरांसि उपाहरत्। तदा तन्माता अरुदत्। तां च सांत्वयन्। किरीटमाली अर्जुन आहेति तृतीयेनान्वयः। किमिति बालानां भा
शिरांस्यानीतवानित्यपेक्षायामाह। मृधे युद्धे। यद्यपि पांडवा अपि कौरवा एव तथापि संजयवंशजो धृष्टद्युम्नः पांडवानां सेनापतिरिति संज
यानामित्युक्तं। वीरगतिं स्वर्गं। अथो अनंतरं वृकोदरेण आविद्धायाः क्षिप्तायाः गदायाः अभिमर्शेन घातेन भग्नौ ऊरुदंडौ यस्य तथाभू
ते धृतराष्ट्रपुत्रे दुर्योधने सति॥१३॥ भर्तुर्दुर्योधनस्य स्मेति वितर्के इति एवं प्रियं स्यादिति पश्यन्। तस्य तद्विप्रियमेवेति वाक्यांतरं॥ २६
विप्रियत्वे हेतुः जुगुप्सितमिति॥१४॥ घोरं दुःसहं यथा भवति। बाष्पकलाभिर्बिंदुभिराकुले अक्षिणी यस्याः सा। किरीटस्यैकत्वे पितर
प्राप्तं बकुलात् किरीटमालीत्युक्तं॥१५॥

५२

शुचः शोकाश्रूणि। प्रमृज्य आमि परिमार्ज्य आमि। यत् यदा। कुलवंधोर्ब्राह्मणाधमस्य आततायिन इति। अग्निदो गरदश्चैव शस्त्रपाणि-
र्धनापहः। क्षेत्रदारहरश्चैव षडेते ह्याततायिन इति स्मरणात्। अत्र आततायी शस्त्रपाणिः तेन च पुत्रहंतृत्वं लक्ष्यते। गांडीवध-
नुषो मुक्तैर्विशिखैर्बाणैरुपाहरे त्वत्समीपमानयामि यच्छिरः आक्रम्य आसनं विधाय दग्धपुत्रा सती॥१६॥ वल्गवो वीरस्य विचित्रा जल्पाः भा-
षणानि तैः। स अर्जुनः। अच्युत एव मित्रं सूतश्च यस्य। दंशितः बद्धकवचः। उग्रं धनुश्चापं यस्य सः। कपिर्हनुमान् ध्वजे यस्य सः। गुरोः पुत्रं रथे-
नान्वधावत॥१७॥ आपततं अधावंतं। स द्रौणिः कुमारहा बालघाती। उद्विग्नमनाः कंपितहृदयः प्राणपरीप्सुः प्राणान् रक्षितुमिच्छुः

तदा शुचस्ते प्रमृजामि भद्रे यत्कुलबंधोः शिर आततायिनः॥ गांडीवमुक्तैर्विशिखैरुपाहरे त्वाक्रम्य यत्स्नास्यसि दग्धपुत्रा॥१६॥
इति प्रियां वल्गुविचित्रजल्पैः स सांत्वयित्वाच्युतमित्रसूतः॥ अन्वाद्रवद्दंशित उग्रधन्वा कपिध्वजो गुरुपुत्रं रथेन॥१७॥ तमा-
पतंतं स विलक्ष्य दूरात् कुमारहोद्विग्नमना रथेन। पराद्रवत्प्राणपरीप्सुरुर्व्यां यावद्गमं रुद्रभयाद्यथार्कः॥१८॥ यदाशरणमात्मा-
नमैक्षत श्रांतवाजिनं। अस्त्रं ब्रह्मशिरो मेने आत्मत्राणं द्विजात्मजः॥१९॥ अथोपस्पृश्य सलिलं संदधे तत्समाहितः। अजानन्न-
पि संहारं प्राणकृच्छ्र उपस्थिते॥२०॥

नन्वकीर्त्तिं यावद्गमं गंतुं तावदुर्व्यां पराद्रवत् पलायत। ब्रह्मा मृगो भूत्वा सुतां जग्मुमुद्यतः सन् रुद्रस्य भयात् यथा पलायते स्म। अर्क इति
पाठे वामनपुराणकथा सूचिता। तथाहि विद्युन्माली नाम कश्चित्तरासो माहेंद्रः तस्मै रुद्रेण सौवर्णं विमानं दत्तं। ततोऽसावर्कस्य
भ्रमतोऽनुभ्राम्यन्विमानदीप्त्या रात्रिं विलोपितवान्। ततोऽर्केण निजतेजोभिर्द्रावयित्वा तद्विमानं पातितं। तच्छ्रुत्वा कुपिते रुद्रे सति अ-
यमर्कः पर्याद्रवत् ततो रुद्रस्य क्रूरदृष्ट्या दंदह्यमानः पतत् वाराणस्यां पतितो लोलार्कनाम्ना विख्यातो जातः॥१८॥ अशरणं रक्षितकरहि-
तं न नुपलायनमेव रक्षकमस्ति तस्यापि कुंठितत्वादित्याह। श्रांता वाजिनो यस्य तं ब्रह्मशिरोऽस्त्रं द्विजात्मजः शरीरसंरक्षितमाह॥१९॥

तदस्त्रं समाहितः कृतध्यानः उपसंहारमजानतोऽपि संधाने हेतुः प्राणकृच्छ्र इति ॥२०॥

भा० पु० ततः अस्मात् सर्वतोदिशं प्रादुःकृतं प्रकटीभूतं तेजो निरीक्ष्य ततः प्राणपदं चाभिवीक्ष्य॥२१॥ प्रस्तुतं विज्ञापयितुं प्रथमं स्तौति कृष्णेति। चतुर्भिः
२७ संसृतेर्हेतोः दह्यमानानां तस्याः अपवर्गोऽपवार्जयिता नाशक इत्यर्थः। हाय तस्त्वमीश्वरः साक्षात्। कुतः यतः प्रकृतेः परः पुरुषः। तत्कुतः॥
यतः आद्यः कारणं कारणत्वेऽपि विकारिता माहात्मा यो ऽस्य चिच्छक्त्या केवलरूपे आत्मन्येवस्थित इति॥२३॥ त्रिवर्गसंतापितत्वमेवेत्याह
स इति। अस्य माया मन्निरस्य स्थितः स एव मायाभिभूतस्य जनस्य धर्मादिफलमुपासितः सन् विधत्से। वीर्येण प्रभावेन॥२४॥ तथा चानेनाव

ततः प्रादुःकृतं तेजः प्रचंडं सर्वतोदिशं॥ प्राणपदमभिप्रेक्ष्य विष्णुं जिष्णुरुवाच ह॥२१॥ अर्जुन उवाच॥ कृष्ण कृष्ण महाबाहो भक्ता
नामभयंकर। त्वमेको दह्यमानानामपवर्गोऽसि संसृतेः॥२२॥ त्वमाद्यः पुरुषः साक्षादीश्वरः प्रकृतेः परः॥ मायां व्युदस्य चिच्छक्त्या
कैवल्ये स्थित आत्मनि॥२३॥ स एव जीवलोकस्य मायामोहितचेतसः॥ विधत्से स्वेन वीर्येण श्रेयो धर्मादिलक्षणं॥२४॥ तथायं
चावतारस्ते भुवो भारजिहीर्षया॥ स्वानां चानन्यभावानामनुध्यानाय वासकृत्॥२५॥ किमिदं स्वित्कुतो वेति देवदेव न वेद्म्य
हं सर्वतोमुखमायाति तेजः परमदारुणं॥२६॥ श्रीभगवानुवाच॥ वेत्थेदं द्रोणपुत्रस्य ब्राह्ममस्त्रं प्रदर्शितं॥ नैवासौ वेद संहारं
प्राणबाध उपस्थिते॥२७॥ न ह्यस्यान्यतमं किंचिदस्त्रं प्रत्यवकर्शनं॥ जह्यस्त्रतेज उन्नद्धमस्त्रज्ञो ह्यस्त्रतेजसा॥२८॥ ॥

तारेण। तव साधुपक्षपातो लक्षित इत्याह। तथेति। किंच भूभारहरणं मदिच्छामात्रेण न भवति तत्राह। स्वानां ज्ञातीनां भक्तानामनुध्यानाय
च। तथानन्यभावानां एकांतभक्तानां च॥२५॥ एवं स्तुत्वा प्रस्तुतं विज्ञापयति। किमात्मकमिदं कुतो वा याती स्वित्त वितर्के॥२६॥ इदं द्रो
णपुत्रस्य ब्राह्ममस्त्रं तेन च प्राणबाधे प्राप्ते प्रदर्शितं केवलं न तु तत्प्रयोगे कुशल इत्यर्थः। यतोऽसावुपसंहारं न वेद। एतच्च त्वं वेत्स्य नानासि
॥२७॥ अस्य च वर्त्तनं कराल कंरं निवर्त्तकमित्यर्थः। अतः अस्त्रस्य तेजः उन्नद्धं उत्कटं ब्रह्मास्त्रतेजसैव जहि घातय। त्वत्प्रयुक्तं चास्त्रं उपसं ता २७
हृत्य स्वयमुपशाम्येत् यतस्त्वमस्त्रज्ञोऽसि॥२८॥

परंशत्रुवस्त एव वीरास्तान् हंतीति तथा॥ फाल्गुनोऽर्जुनः अपःस्पृष्ट्वा आचम्य तं श्रीकृष्णं परिक्रम्य प्रदक्षिणीकृत्य आसा॥ यत्रस्ता
स्त्रं निवर्त्तयितुं॥२९॥ ततस्तदुभयोर्द्वे स्त्रास्त्रयोस्तेजसा शरैः॥ संहृते परस्परं मिलित्वा न दधाते अवर्द्धेतां॥ किंकृत्वा रोदसी द्यावापृथि
व्यौ। खमंतरिक्षमावृत्य यथा प्रलये संकर्षणमुखाग्निः उपरिस्थितोऽर्कश्च संहत्य वर्द्धते तद्वत्॥३०॥ तयोर्द्रौणिफाल्गुनयोः तेन दह्य
मानाः सांवर्त्तकं प्रलयाग्निं मत्तममनिरे॥३१॥ लोकानां व्यतिकरं व्यत्ययं नाशमित्यर्थः। वासुदेवस्य मतं चालक्ष्य बुद्ध्वा स्त्रद्वयमुपसंहृ

सूत उवाच॥ श्रुत्वा भगवता प्रोक्तं फाल्गुनः परवीरहा॥ स्पृष्ट्वापस्तं परिक्रम्य ब्राह्मं ब्राह्माय संदधे॥२९॥ संहत्यान्योन्यमुभयोस्ते
जसी शरसंवृते॥ आवृत्य रोदसी खं च ववृधातेऽर्कवह्निवत्॥३०॥ दृष्ट्वास्त्रतेजस्तु तयोस्त्रींल्लोकान्प्रदहन्महत्॥ दह्यमानाः
प्रजाः सर्वाः सांवर्त्तकममंसत॥३१॥ प्रजोपप्लवमालक्ष्य लोकव्यतिकरं च तत्॥ मतं च वासुदेवस्य संजहारार्जुनो द्वयं॥३२॥
तत आसाद्य तरसा दारुणं गौतमीसुतं॥ बबंधामर्षताम्राक्षः पशुं रशनया यथा॥३३॥ शिबिराय निनीषंतं रज्ज्वा बध्वा रिपुं बला
त्॥ प्राहार्जुनं प्रकुपितो भगवानंबुजेक्षणः॥३४॥ मैनं पार्थार्हसि त्रातुं ब्रह्मबंधुमिमं जहि॥ योऽसावनागसः सुप्तानवधीन्निशि
बालकान्॥३५॥ मत्तं प्रमत्तमुन्मत्तं सुप्तं बालं स्त्रियं जडं॥ प्रपन्नं विरथं भीतं न रिपुं हंति धर्मवित्॥३६॥ ॥ ॥

तद्वान्॥ गौतमवंशजा गौतमी कृपी तस्याः सुतं॥ अमर्षेण कोपेन ताम्रे ईक्षणे अक्षिणी यस्य सः॥ निरूपलेः दृष्टांतः पशुं यथेति॥ तस्य बंधनं धर्म इ
ति वा दृष्टांतः॥ यथा याज्ञिकः पशुमिति॥ रशनया रज्ज्वा॥३३॥ लोकरोषादियुक्तस्याप्यर्जुनस्य धर्मशिक्षापनाय श्रीकृष्णवाक्यं तदाह॥
तायर२४ प्राहेति॥ शिबिराज निवेशाय नेतुमिच्छंतं प्रकुपित इवेति॥३४॥ अनागसो निरपराधान्॥३५॥ रिपोरिपुसुतस्य बालस्य च वधो न धर्म इत्यन्यार्थैर्द
र्शयति॥ मत्तं मद्यादिना॥ प्रमत्तं अनवहितं॥ उन्मत्तं ग्रहवातादिना॥ जडं अनुद्यमं॥ प्रपन्नं शरणागतं॥ विरथं भग्नरथं॥३६॥ ॥ ॥

भा०प्र०
२८

तद्वधो दंडरूपः तस्यैव श्रेयः पुरुषार्थः यद्यतो दंडप्रायश्चित्तरहिता दोषात् सपुमान् अधो यातीति । तथा च स्मरंति । राजभिर्धृतदंडास्तु
कृत्वा पापानि मानवाः । विधूतकल्मषा यांति स्वर्गं सुकृतिनो यथेति । यद्यपि चोदितः । तथापि [illegible] हंतुं नैछत् । आत्महनं पुत्रहंतारम
पि यतो महान् ॥४०॥ गोविंदः प्रियः सारथिर्यस्य सः ॥ आत्मजान् शोचंत्यै प्रियायै ॥४१॥ तथा परिभवेन आहृतमानीतां कर्मणा जुगुप्सितेन
हेतुना वा उक्तं अपकृतं अपकारिणं कृपया निरीक्ष्य । वामः शोभनः स्वभावो यस्याः सा ननाम च ॥४२॥ उवाच चेति चकारात् त्यां संभ्रमः स्व

स्वप्राणान्यः परप्राणैः प्रपुष्णात्यघृणः खलः ॥ तद्वधस्तस्य हि श्रेयो यद्दोषाद्यात्यधः पुमान् ॥३७॥ प्रतिश्रुतं च भवता पांचाल्यै श्रृ
एवतो मम ॥ आहरिष्ये शिरस्तस्य यस्ते मानिनि पुत्रहा ॥३८॥ तदसौ वध्यतां पाप आततायात्मबंधुहा ॥ भर्तुश्च विप्रियं वीर कृ
तवान्कुलपांसनः ॥३९॥ एवं परीक्षिता धर्मं पार्थः कृष्णेन चोदितः ॥ नैछद्धंतुं गुरुसुतं यद्यप्यात्महनं महान् ॥४०॥ तथोपे
त्य स्वशिबिरं गोविंदप्रियसारथिः ॥ न्यवेदयत्तं प्रियायै शोचंत्या आत्मजान्हतान् ॥४१॥ तथाहृतं पशुवत्पाशबद्धमवाङ्मुखं क
र्मजुगुप्सितेन ॥ निरीक्ष्य कृष्णापकृतं गुरोः सुतं वामस्वभावा कृपया ननाम च ॥४२॥ उवाच चासहंत्यस्य बंधनानयनं सती ॥
मुच्यतां मुच्यतामेष ब्राह्मणो नितरां गुरुः ॥४३॥ सरहस्यो धनुर्वेदः सविसर्गोपसंयमः ॥ अस्त्रग्रामश्च भवता शिक्षितो यद
नुग्रहात् ॥४४॥ स एष भगवान्द्रोणः प्रजारूपेण वर्तते ॥ तस्यात्मनोऽर्द्धं पत्न्यास्ते नान्वगाद्वीरसूः कृपी ॥४५॥ ॥ त्न्यौं १

चितः । बंधनेनानयनं असहमाना ॥४३॥ सरहस्य गोप्यमंत्रसहितः विसर्गोऽस्त्रप्रयोगः उपसंयमः उपसंहारः ताभ्यां सहितोऽस्त्रसमूहश्च ॥
किंच तस्य द्रोणस्यात्मनो देहस्तस्यार्द्धं कृपी अस्ते । अर्धो वा एष आत्मनो यत्पत्नीति श्रुतेः । जायापती अग्निमादधीयातामिति श्रुतेरुभयोरे २८
ककारकत्वावगमाच्च । ननु भर्त्तरि मृते सा कथं जीवति । तत्राह । नान्वगाद्भर्त्तारं यतो वीरसूः पुत्रवती ॥४५॥ ॥श्री॥ ॥श्री॥

तत्तस्माद्गौरवं गुरोः कुलं भवद्भिः कर्तृभिर्वृजनं दुःखं प्राप्तुं नार्हति किंतु शुश्रूष्यं वंद्यं च ॥४६॥ मृतवत्सा मृतपुत्रा ॥४७॥ विपर्यये दोषमाह । यैरिति । तेषां
रतं राजन्यानां कुलं कर्मकं कथं सानुबंधं सपरिवारं । शुचा शोकेनार्पितं व्याप्तं च ब्रह्मकुलं कर्तृ प्रदहति ॥४८॥ धर्म्यमित्यादयो वचसः षड्गुणाः पूर्व
श्लोकषट्के द्रष्टव्याः । तत्र धर्म्यं धर्मादनपेतं मुच्यतां मुच्यतामिति । न्याय्यं न्यायादनपेतं सरहस्यमित्यादि । सकरुणं तस्यात्मनोर्द्धमिति । निर्व्य
लीकं निष्कपटं तद्धर्मज्ञेति । समं पक्षपातशून्यं मा रोदीदिति दुःखसाम्योक्तेः । महत् । यैः कोपितमिति । निष्ठुरोक्त्या हितोपदेशात् । एवंभूतं रा

तद्धर्मज्ञ महाभाग भवद्भिर्गौरवं कुलं । वृजिनं नार्हति प्राप्तुं पूज्यं वंद्यमभीक्ष्णशः ॥४६॥ मा रोदीदस्य जननी गौतमी पतिदेवता । यथाहं
मृतवत्सार्त्ता रोदिम्यश्रुमुखी मुहुः ॥४७॥ यैः कोपितं ब्रह्मकुलं राजन्यैरजितात्मभिः । तत्कुलं प्रदहत्याशु सानुबंधं शुचार्पितं ॥४
८॥ सूत उवाच ॥ धर्म्यं न्याय्यं सकरुणं निर्व्यलीकं समं महत् । राजा धर्मसुतो राज्ञ्याः प्रत्यनंदद्वचो द्विजाः ॥४९॥ नकुलः सहदेवश्च यु
युधानो धनंजयः । भगवान्देवकीपुत्रो ये चान्ये याश्च योषितः ॥५०॥ तत्राहामर्षितो भीमस्तस्य श्रेयान्वधः स्मृतः । न भर्तुर्नात्म
नश्चार्थे योऽहन्सुप्तान् शिशून्वृथा ॥५१॥ निशम्य भीमगदितं द्रौपद्याश्च चतुर्भुजः । आलोक्य वदनं सख्युरिदमाह हसन्निव
॥५२॥ श्रीभगवानुवाच ॥ ब्रह्मबंधुर्न हंतव्य आततायी वधार्हणः । मयैवोभयमाम्नातं परिपाह्यनुशासनं ॥५३॥ ॥श्री॥

राज्ञ्या वचः । हे द्विजाः । प्रत्यनंदत् अनुमोदितवान् ॥४९॥ नकुलादयश्च प्रत्यनंदत् । युयुधानः सात्यकिः ॥५०॥ तस्य तथाविधस्य द्रौणेर्वधः एव श्रेयः ।
अन्यथास्य नरकपातप्रसंगात् । तदाह न भर्तुरिति । अहन् जघान ॥५१॥ चतुर्भुजो हरिः स्वयं भावः । भीमेनैनं हंतुं प्रवृत्ते द्रौपद्यां च सहसा तन्नि
वारणे प्रवृत्तायां उभयोः संवारणया विक्षतश्चतुर्भुज इति ॥ संदिहानस्य सख्युरर्जुनस्य ॥५२॥ वधार्हणः वधार्हः मयैव शास्त्रकृता ब्राह्म
णो न हंतव्यः । तथा च आततायिनमायांतमपि वेदांतपारगं । जिघांसीयात् जिघांसंतं न तेन ब्रह्महा भवेदिति वदता । तदुभयमप्यनुशा
सनं परिपालय ॥५३॥

ति ता तं

भा० प्र० तव च पुत्रांश्चा रक्ष्ये त्याह॥ प्रियां सांत्वयन्ने वाप्यत प्रतिश्रुतं हनं तं च सत्यं कुरु प्रियं च [illegible] कुरु॥ मत्यं मम॥ तत्र वधे भीमस्य प्रियं
२५ न वति॥ अवध्ये द्रौपद्याः द्वेषी कृष्णस्य॥ ५४॥ हार्दं अभिप्रायं॥ आज्ञाय ज्ञात्वा नसरसकं॥ अयं विद्धात॥ अतो यमभिप्राय
मूर्द्धन्यं इत्यज्ञात्वे त्यर्थः॥ असिना खड्गेन मूर्द्धजातं सह मूर्द्धजं सकेशं॥ ५५॥ मणिना च हीनं निरयापयत निःसारितवान्॥ ५६॥ अ
नेन श्रीकृष्णोक्तं सर्वं संपादितमित्याह वपनमिति॥ ५७॥ निरहरणं दाहार्थं नयनं॥ ५८॥ इति प्रथमे सप्तमः॥ अष्टमे कुपित द्रोण

कुरु प्रतिश्रुतं सत्यं यत्तत्सांत्वयिता प्रियां॥ प्रियं च भीमसेनस्य द्रौपद्या मह्यमेव च॥ सूत उवाच॥ अर्जुनः सहसाज्ञाय हरे
र्हार्दमथासिना॥ मणिं जहार मूर्द्धन्यं द्विजस्य सहमूर्द्धजं॥ ५५॥ विमुच्य रशनाबद्धं बालहत्याहतप्रभं॥ तेजसा मणिना ही
नं शिबिरान्निरयापयत॥ ५६॥ वपनं द्रविणादानं स्थानान्निर्यापणं तथा॥ एष हि ब्रह्मबंधूनां वधो नान्योस्ति दैहिकः॥ ५७
पुत्रशोकातुराः सर्वे पांडवाः सह कृष्णया॥ स्वानां मृतानां यत्कृत्यं चक्रुर्निर्हरणादिकं॥ ५८॥ इति श्रीभागवते महापुराणे प्रथ
मस्कंधे द्रौणिनिग्रहो नाम सप्तमोध्यायः॥ ॥७॥ ॥सूत उवाच॥ अथ ते संपरेतानां स्वानामुदकमिच्छतां॥ दातुं सकृ
ष्णा गंगायां पुरस्कृत्य ययुः स्त्रियः॥ १॥ ते निनीयोदकं सर्वे विलप्य च भृशं पुनः॥ आप्लुता हरिपादाब्जरजःपूतसरिज्जले॥ २॥
तत्रासीनं कुरुपतिं धृतराष्ट्रं सहानुजं॥ गांधारीं पुत्रशोकार्त्तां पृथां कृष्णां च माधवः॥ ३॥ सांत्वयामास मुनिभिर्हतबंधूञ्छु
रस्त्राइच्छापरीक्षितः॥ श्रीकृष्णेन सत्कृतः कुंतीराज्ञः चार्पितान्॥ भूतेषु कालस्य गतिं दर्शयन्न प्रतिक्रियां॥ ४॥ शोकस्य कीर्त्यते॥ १॥ ते पांडवाः संपरेतानां
मृतानां॥ गंगायामुदकं दातुं सकृष्णाः श्रीकृष्णेन सहिताः॥ स्त्रियः पुरस्कृत्य अग्रतः कृत्वा॥ तस्मिन्कार्ये स्त्रीपुरःसरत्वविधानात्॥ १॥ निनीय दत्वा हरि २५
पादाब्जरजोभिः पूता या सरित् गंगा तस्या जले पुनर्ग्रहणाद्दोषो पि स्नाता इति गम्यते॥ २॥ कुरुपतिं युधिष्ठिरं सहानुजं भीमादिभिः सहितं॥ ३॥ मुनि
ब
भिः सहितं॥ ४॥

कितवैर्धूर्तैर्दुर्योधनादिभिः॥ द्रौपद्याः॥ कचग्रहणादिनास्ततं नष्टमायुर्येषां तान्॥५॥ घातयित्वेत्यादिना विकथासंक्षेपः॥ शतमन्योः शतं क्रतोरिव
॥६॥ सैनेयः शिनेर्नप्ता सात्यकिस्तेन चोद्धवेन च संयुतः॥७॥ रथमास्थितः सन्नुत्तरां परीक्षिन्मातरं अभिमुखं धावंतं उपलेभे ददर्श
॥८॥ उत्तरा श्रीकृष्णं आर्थपते पाहि पाहीति प्राह॥ अन्यस्त्वत्रार्थनायोग्यो नास्तीत्याह॥ त्वत्तः अन्यं अभयं न पश्यामि यत्र लोके पर
स्परं मृत्युर्न भवति॥९॥ तत्रास्त्रकृतं भयमावेदयति॥ अभिद्रवति अभिमुखमायाति तप्तमायसं लोहमयं शल्यं यस्य सः॥ अतिकार्पण्यमाह॥

साधयित्वाजातशत्रोः स्वं राज्यं कितवैर्हृतं॥ घातयित्वासतो राज्ञः कचस्पर्शक्षतायुषः॥५॥ याजयित्वाश्वमेधैस्तं त्रिभिरुत्तमकल्पकैः॥
तद्यशः पावनं दिक्षु शतमन्योरिवातनोत्॥६॥ आमंत्र्य पांडुपुत्रांश्च शैनेयोद्धवसंयुतः॥ द्वैपायनादिभिर्विप्रैः पूजितैः प्रतिपूजितः
॥७॥ गंतुं कृतमतिर्ब्रह्मन् द्वारकां रथमास्थितः॥ उपलेभेभिधावंतीमुत्तरां भयविह्वलां॥८॥ उत्तरोवाच॥ पाहि पाहि महायोगि
न्देवदेव जगत्पते॥ नान्यं त्वदभयं पश्ये यत्र मृत्युः परस्परं॥९॥ अभिद्रवति मामीश शरस्तप्तायसो विभो॥ कामं दहतु मां नाथ मामे ग
र्भो निपात्यतां॥१०॥ सूत उवाच॥ उपधार्य वचस्तस्या भगवान्भक्तवत्सलः॥ अपांडवमिदं कर्त्तुं द्रौणेरस्त्रमबुध्यत॥११॥ तर्ह्येवाथ
५ मुनिश्रेष्ठ पांडवाः पंच सायकान्॥ आत्मनोभिमुखान्दीप्तानालक्ष्यास्त्राण्युपाददुः॥१२॥ व्यसनं वीक्ष्य तत्तेषामनन्यविषयात्मनां॥ सु
दर्शनेन स्वास्त्रेण स्वानां रक्षां व्यधाद्विभुः॥१३॥ अंतःस्थः सर्वभूतानामात्मा योगेश्वरो हरिः॥ स्वमायया वृणोद्[illegible] वैराट्याः कुरुतंतवे॥१४॥

कामम् इति॥ कामं यथेष्टं॥१०॥ पराभवेनातिकुपितस्य द्रौणेः अपांडवं पांडवशून्यं इदं विश्वं कर्त्तुं प्रवृत्तं ब्रह्मास्त्रमबुध्यत॥११॥ अत एव वक्त्रं अभिमुखमागत
मित्याह॥ तर्ह्येवेति॥१२॥ ब्रह्मास्त्रस्यास्त्रांतरैरनिवर्त्यत्वात्॥ तत्र दुःपरिकरं व्यसनं [illegible] वीक्ष्य अनन्यविषया आत्मा येषां स्वैकनिष्ठानामित्य
र्थः॥१३॥ वैराट्या उत्तरायाः अंतःस्थः सन् गर्भमावृतवान्॥ तत्र हेतुः यत आत्मा अंतर्यामी योगेश्वरः इति बहिःस्थस्यापि प्रवेशघटनासामर्थ्यमुक्तं॥
कुरूणां तंतवे संतानाय पांडवानामपि कुरुवंशजत्वादेवमुक्तं॥१४॥

ना॰प्र॰ अमोघमप्रतिक्रियंच॥समशाम्यत॥संशांतमासीत्॥१५॥एतद्दुलालत्र॥आमनं॥आश्चर्यंमामंस्थाः॥मामन्यास्व॥१६॥कृष्णयासह॥१७॥त्वांन
३० मस्येनमस्करोमि॥ननुकनिष्टंमांकथंनमस्करोषितत्राह॥आद्यंपुरुषंकुतः॥प्रकृतेःपरं॥तत्कुतः॥ईश्वरंप्रकृतेरपिनियंतारं॥अतएवस
र्वभूतानामंतर्बहिश्चपूर्णत्वेनावस्थितं॥तथाप्यलक्ष्यं॥१८॥तत्रहेतुःमायैवजवनिकातिरस्करिणीतया॥आछन्नंप्रतिछन्नं॥अतोहमज्ञाभ
क्तियोगानभिज्ञाकेवलंनमस्यामि॥अधः॥अक्षजंइंद्रियजंज्ञानंयस्मात्तं॥अव्ययंअपरिछिन्नं॥नलक्ष्यसे॥मूढदृशा॥देहाभिमानिनापुंसात्वंन

यद्यप्यस्त्रंब्रह्मशिरस्त्वमोघंचाप्रतिक्रियं॥वैष्णवंतेजआसाद्यसमशाम्यद्भृगूद्वह॥१५॥मामंस्थाह्येतदाश्चर्यंसर्वाश्चर्यमये
च्युते॥यइदंमाययादेव्यासृजत्यवतिहंत्यजः॥१६॥ब्रह्मतेजोविनिर्मुक्तैरात्मजैःसहकृष्णया॥प्रयाणाभिमुखंकृष्णमिदमाहपृ
थासती॥१७॥कुंत्युवाच॥नमस्येपुरुषंत्वाद्यमीश्वरंप्रकृतेःपरं॥अलक्ष्यंसर्वभूतानामंतर्बहिरवस्थितं॥१८॥मायाजवनि
काछन्नमज्ञाधोक्षजमव्ययं॥नलक्ष्यसेमूढदृशानटोनाट्यधरोयथा॥१९॥तथापरमहंसानांमुनीनाममलात्मनां॥भक्ति
योगविधानार्थंकथंपश्येमहिस्त्रियः॥२०॥कृष्णायवासुदेवायदेवकीनंदनायच॥नंदगोपकुमारायगोविंदायनमोनमः॥
२१॥नमःपंकजनाभायनमःपंकजमालिने॥नमःपंकजनेत्रायनमस्तेपंकजांघ्रये॥२२॥ ॥श्री॥ ॥श्री॥ ॥श्री॥

लक्ष्यते॥किंचापरमहंसानामात्मानात्मविवेकिनां॥ततोमुनीनांमननशीलानामपि॥ततश्चामलात्मानांनिवृत्तरागादीनामपि॥तथातेननि
जमहिम्नानलक्ष्यसे॥अतोभक्तियोगंविधातुंत्वांवयंस्त्रियःकथंहिपश्येम॥यद्वापरमहंसानामपिभक्तियोगविधानार्थंत्वां॥आत्मारामाणामप
्यचिंत्यनिजगुणैःकृष्यभक्तियोगंविधातुंकारयितुंअवतीर्णमित्यर्थः॥२०॥ज्ञानभक्त्योरशक्यत्वमुक्त्वापुनःकेवलंनमस्करोतिकृ
ष्णायेतिद्वाभ्यां॥२१॥पंकजंनाभौयस्यपंकजानांमालास्तियस्यपंकजवत्प्रसन्नेनेत्रेयस्यपंकजांकितावंघ्रीयस्यतस्मै॥ ॥२२॥ ३०

तत्कृतोपकाराननुस्मरतियथेतिद्वाभ्यां।अयमर्थः माल्हतोपिमय्यधिकातवप्रीतिः तथाहि हे हृषीकेश।यथादेवकी कंसेन रुद्धा।तया
विमोचिता।अहंचतथैवकिंमोचितेतिकश्चामहाननुविशेषउक्तः।त्वंदर्शयति।साचअतिचिरंरुद्धासतितस्मादेवसकृद्विमो
चिता।यथाप्युचार्पिता।चसतीनचतस्याः पुत्रैरक्षिताः।अस्तिवान्योनाथस्तस्याः।अहंतुविपद्गणात्।तत्रापिमुहुः शीघ्रंच॥
सात्मजाचत्वयैवचनाथेनेति॥२३॥विपद्गणमेवदर्शयति।विषाद्भीमस्यविषमोदकदानात्।महाग्नेः जतुगृहदाहात्।पुरुषादाहिडंबा
दयोराक्षसास्तेषांदर्शनात्।असत्सभायाः द्यूतस्थानात्।अजितोरक्षिताः।आस्मअनवासमः॥२४॥अद्याप्यस्तुविपत्सुकीदृशंदर्शनंना

यथा हृषीकेश खलेन देवकी कंसेन रुद्धातिचिरं शुचार्पिता॥ विमोचिताहं च सहात्मजा विभो त्वयैव नाथेन मुहुर्विपद्गणात्॥
॥२३॥ विषान्महाग्नेः पुरुषाददर्शनादसत्सभाया वनवासकृच्छ्रतः॥ मृधे मृधेनेकमहारथास्त्रतो द्रौण्यस्त्रतश्चास्म हरेऽभि ६
रक्षिताः॥२४॥ विपदः सन्तु नः शश्वत्तत्र तत्र जगद्गुरो॥ भवतो दर्शनं यत्स्यादपुनर्भवदर्शनं॥२५॥ जन्मैश्वर्यश्रुतश्रीभिरे
धमानमदः पुमान्॥ नैवार्हत्यभिधातुं वै त्वामकिंचनगोचरं॥२६॥ नमोकिंचनवित्ताय निवृत्तगुणवृत्तये॥ आत्मारामाय शां
ताय कैवल्यपतये नमः॥२७॥ मन्ये त्वां कालमीशानमनादिनिधनं विभुं॥ समं चरन्तं सर्वत्र भूतानां यन्मिथः कलिः॥२८॥॥

स्तिपुनरपिभवदर्शनंयस्मात्॥२५॥संपदस्तुश्रेयः परिपंथिन्यइत्याह।जन्मसत्कुलेजन्मादिभिरेधमानोमदोयस्यसः।अभिधातुंश्रीकृ
ष्णगोविंदेतिवक्तुमपि।अकिंचनानांगोचरंविषयभूतं॥२६॥प्रस्तुतमनोरथपूरणायप्रणमति।अकिंचनाभक्ताएववित्तंसर्वस्वंयस्य
तस्मै।ततः किं।निवृत्तागुणवृत्तयोधर्मार्थकामविषयायस्मात्तस्मै।कुतः आत्मारामाय।ततकुतः।शांताय रागादिभिरहिताय।किंच
कैवल्यंदातुंसमर्थाय॥२७॥ननुदेवकीपुत्रंमांकथमेवंस्तोषितत्राह।मन्येत्वांकालं।ननुदेवकीपुत्रं।तत्रहेतवः ईशानंनियंतारं।अ
नादिनिधनंआद्यंतशून्यं।विभुंप्रभुं।समंयथाभवति।तथासर्वत्रचरंतं।ननुपार्थसारथेः कथममसाम्यंतत्राह।यद्यतः।त्वत्तोनिमित्तभूतानामेव भूतानां
मिथः कलिः कलहोभवति।नतुस्वतस्त्वयिवैषम्यं॥२८॥

भा०प्र० ३१ ननुनिग्रहानुग्रहस्थंमयिप्रसिद्धंवैषम्यंअतआह।नवेदेति।नृणांविडंबनमनुकरणमीहमानस्यकुर्वतः।यस्मिंस्त्वयिविषमामतिरनु
ग्रहनिग्रहरूपानभवति॥२९॥अजस्यजन्म।अकर्त्तुःकर्म।तिर्यक्षुवराहादिरूपेण।नृषुरामादिरूपेण।यादस्सुमत्स्यादिरूपेण॥३०॥
नरविडंबनमत्याश्चर्यमित्याह।गोपीयशोदात्वयिकृतागसिदधिभांडस्फोटनंकृतवति।यावद्दामरज्जुंआददेजग्राह।तावत्तत
त्क्षणमेवयातेदशावस्थासामांविमोहयति।किंभूतस्यअश्रुभिःकलिलंव्याप्तंमिश्रंअंजनंययोस्तेचसंभ्रमेणव्याकुलेअक्षिणी

नवेदकश्चिद्भगवंश्चिकीर्षितंतवेहमानस्यनृणांविडंबनं॥नयस्यकश्चिद्दयितोऽस्तिकर्हिचिद्द्वेष्यश्चयस्मिन्विषमा
मतिर्नृणां॥२९॥जन्मकर्मचविश्वात्मन्नजस्याकर्त्तुरात्मनः।तिर्यङ्नृषिषुयादस्सुतदत्यंतविडंबनं॥३०॥गोप्याददेत्वयि
कृतागसिदामतावद्यातेदशाश्रुकलिलांजनसंभ्रमाक्षं।वक्त्रंनिनीयभयभावनयास्थितस्यसामांविमोहयतिभीरपिय
द्बिभेति॥३१॥केचिदाहुरजंजातंपुण्यश्लोकस्यकीर्त्तये।यदोःप्रियस्यान्ववायेमलयस्येवचंदनं॥३२॥अपरेवसुदेवस्य
देवक्यांयाचितोऽभ्यगात्।अजस्त्वमस्यक्षेमायवधायचसुरद्विषां॥३३॥भारावतारणायान्येभुवोनावइवोदधौ॥सीदंत्या
भूरिभारेणजातोह्यात्मभुवार्थितः॥३४॥ ते

यस्मिन्नतद्वक्त्रंनिनीयअधःकृत्वाताडयिष्यतीतिभयस्यभावनयास्थितस्य।यद्यतःत्वत्तःभीरपिस्वयंबिभेतितस्यदशा॥३१॥अतएवज
गन्मोहनतयाद्भुतंमत्वातवजन्मादिबहुधावर्णयंतीत्याह।केचिदिति।द्विचतुर्भिः।पुण्यश्लोकस्यप्रियस्ययुधिष्ठिरस्यकीर्त्तये।यदोरे
वकीर्त्तयइतिवा।मलयस्यकीर्त्तयेवंशोवाचंदनंयथा॥३२॥तथाचवसुदेवस्यभार्यायांदेवक्यांअजएवत्वमभ्यगात्।पुत्रत्वमि ३१
तिशेषः।प्रथमपुरुषस्त्वार्षः।अभ्यगास्त्वमितिपाठःसुगमः।ताभ्यामेवपूर्वंसुतपःपृश्निरूपाभ्यांयाचितःसन्।अस्यजगतःक्षेमाय
३३॥आत्मभुवेतिब्रह्मप्रार्थनस्यप्राधान्यविवक्षयामतांतरं॥३४॥

परमानंदस्वरूपंविज्ञानमविद्या।ततोदेहाद्यभिमानात्कामः।ततःकर्माणि।तैःक्लिश्यमानानांतन्निवृत्तयेश्रवणाद्यर्हाणिकर्माणिकरिष्य
ता।।३५।।अस्यपक्षस्यसिद्धांततामभिप्रेत्यश्रवणादिफलमाह।शृण्वंतीति।नंदंतिअन्यैः।कीर्त्यमानमभिनंदंतियेजनाः।ईहितंचरितं।
तावकंत्वदीयंपदांबुजंतएवपश्यंत्येव।अचिरेणैवेतिचसर्वत्रावधारणं।कीदृशंभवप्रवाहस्यजन्मपरायाउपरमोयस्मिनतत्। परं
३६।।इदानींतवास्मत्परित्यागोऽनुचितइत्याशयेनाह।अपीतिचतुर्भिः।हेप्रभोसुहृदोऽनुजीविनश्चनोऽद्यअपिस्वित्त्वंजिहाससियेषां

भवेऽस्मिन्क्लिश्यमानानामविद्याकामकर्मभिः।।श्रवणस्मरणार्हाणिकरिष्यन्नितिकेचन।।३५।।शृण्वंतिगायंतिगृणंत्यभी
क्ष्णशःस्मरंतिनंदंतितवेहितंजनाः।तएवपश्यंत्यचिरेणतावकंभवप्रवाहोपरमंपदांबुजं।।३६।।अप्यद्यनस्त्वंस्वकृतेहि
तप्रभोजिहाससिस्वित्सुहृदोनुजीविनः।।येषांनचान्यद्भवतःपदांबुजात्परायणंराजसुयोजितांहसां।।३७।।केवयंनामरू
पाभ्यांयदुभिःसहपांडवाः।।भवतोदर्शनंयर्हिहृषीकाणामिवेशितुः।।३८।।नेयंशोभिष्यतेतत्रयथेदानींगदाधर।।
त्वत्पदैरंकिताभातिस्वलक्षणविलक्षितैः।।३९।।इमेजनपदाःस्वृद्धाःसुपक्वौषधिवीरुधः।।वनाद्रिनद्युदन्वंतो
ह्येधंतेतववीक्षितैः।।४०।।

मस्माकमन्यत्परायणं।नैवास्तिकुतः।राजसुयोजितमहोदुःखंयैस्तेषां।स्वानांकृतमपीहितमपेक्षितंयेनतस्यसंबोधनं।विसर्गांतपाठे
त्वंपदविशेषणं।।३७।।ननुतवबंधवोयादवाः।पुत्राश्चपांडवाःसमर्थाश्चतत्किंकार्पण्यमेवंभाषसेअतआह।केवयमिति।यर्हिभवतो
दर्शनंयदात्वमस्मान्नपश्यसितदानाम्नाविख्यातारूपेणसमृद्धाश्चयदुभिःसहिताःपांडवानामकेवयंनकेपिअपितुतुच्छाइत्यर्थः।।
हृषीकाणामीशितुर्जीवस्यदर्शनेयथानकिंचिन्नामरूपंचतद्वत्।।३८।।किंचायथेदानीमियंयस्मात्पादैर्भूमिःस्वैरसाधारणैर्वज्रांकु ६२
शादिभिर्लक्षणैर्विलक्षितैश्चिह्नितैस्त्वत्पदैरंकितासतीभाति।तत्रतदात्वयिनिर्गतेसतिनशोभिष्यते।।३९।।अपिचइमेजनपदादेशाःस्वृ
द्धाःसुसमृद्धाःसंतः।।४०।।

भा० प्र०
३२

गमनेपांडवानामकुशलं अगमने च यादवानामित्युभयतो व्याकुलचित्ता सती तेषु स्नेहनिवृत्तिं प्रार्थयते अथेति। विश्वेशेत्यादिसंबोधनानां
निस्नेहत्वे देसामर्थ्यख्यापनाय दृढंसंतं॥४१॥ ततः किमत आह। त्वयीति। अनन्यविषया सती मे मतिः रतिमुद्वहतात्। अनवच्छिन्नां प्रीतिं
न करोत्वित्यर्थः॥ ओघं पूरं। यथा गंगा प्रतिबंधं न गणयति। एवं मतिरपि विघ्नान्यागणयत्विति भावः॥४२॥ एवमभ्यर्थ्य पुनः प्रणमति।
हे कृष्णेति नमः। उपकारान् अनुस्मरंती बहुधा संबोधयति। कृष्णसख अर्जुनसखे। वृष्णीनामृषभे श्रेष्ठ अवन्ये द्रुह्यंति ये राजन्यास्तेषां

अथ विश्वेश विश्वात्मन् विश्वमूर्त्ते स्वकेषु मे॥ स्नेहपाशमिमं छिंधि दृढं पांडुषु वृष्णिषु॥४१॥ त्वयि मेनन्यविषया मतिर्मधुप
तेसकृत्॥ रतिमुद्वहतादद्धा गंगेवौघमुदन्वति॥४२॥ श्रीकृष्ण कृष्णसख वृष्ण्यृषभावनिध्रुग्राजन्यवंशदहनानपवर्गवीर्य
ग२ गोविंद गोद्विजसुरार्त्तिहरावतार योगेश्वराखिलगुरो भगवन्नमस्ते॥४३॥ सूत उवाच॥ पृथयेत्थं कलपदैः परिणूताखिलो
दयः॥ मंदं जहास वैकुंठो मोहयन्निव मायया॥४४॥ तं बाढमित्युपामंत्र्य प्रविश्य गजसाह्वयं॥ स्त्रियश्च स्वपुरं यास्यन्
प्रेम्णा राज्ञा निवारितः॥४५॥

वंशस्य दहन। एवमप्यनपवर्गवीर्य अक्षीणप्रभाव। गोविंद प्राप्तकामधेन्वैश्वर्य। गोद्विजसुराणामार्त्तिहरो अवतारो यस्येति॥४३॥ कला
नि मधुराणि पदानि येषु तैर्वाक्यैः परिणूतः अखिल उदयो महिमा यस्य सः। णुस्तुतावित्यस्मात् परिणूतेति वक्तव्ये दीर्घं छंदोनुरोधेन। मं
दमीषत्। तस्य हास एव माया। वक्ष्यति हि हासो जनोन्मादकरी च मायेति॥४४॥ त्वयि मेनन्यविषया मतिरिति यत् प्रार्थितं तत् बाढमित्यंगी ३२
कृ कृत्य रथस्थाना गजसा[illegible]यमागत्य पश्चात्तावान्याश्च सुभद्राप्रमुखाः स्त्रियः उपामंत्र्यानुज्ञाप्य स्वयं पुरं यास्यन् राज्ञा युधिष्ठिरेण प्रेम्णा
त्रैव कंचित्कालं निवसेति संप्रार्थ्य निवारितः॥
४५

अथ भीष्मनिर्याणोत्सवं वक्तुमुपोद्घातकथां प्रस्तौति।। व्यासाद्यैः प्रबोधितोऽपि शुचार्पितः व्याप्तः सन्नाबुध्यत विवेकं न प्राप। कुतः ईश्वरेहाय
अज्ञैः स्वभक्तभीष्मनिर्याणमहोत्सवाय मया राज्ञा सह कुरुक्षेत्रं गंतव्यं। तत्र तन्मुखेनैवायं प्रबोधनीय इतीश्वराभिप्रायः। कार्यद्वयवि
धायकस्तमजानद्भिरित्यर्थः। श्रीकृष्णेनापि प्रबोधितोऽपि नाबुध्यत। तत्र हेतुः अकृतकर्मणेति। यथा कुरुपांडवसंधानार्थं गतोऽपि यथो
चितमेव वदन्नपि विग्रहमेव दृढीकृतवान्। एवमत्रापि प्रबोधयन्नप्रबोधमेव दृढीचकारेत्यर्थः।।४६।। अप्रबोधमेव प्रपंचयति। आहे
ति षड्भिः। प्राकृतेन अविवेकप्राप्तेन आत्मना चित्तेन। हे विप्राः।।४७।। पारक्यस्य स्वसृगालाद्याहारस्य नूतस्य देहस्यार्थे इमे मयाऽक्षौ

व्यासाद्यैरीश्वरेहाज्ञैः कृष्णेनाकृतकर्मणा।। प्रबोधितोऽपीतिहासैर्नाबुध्यत शुचार्पितः।।४६।। आह राजा धर्मसुतश्चिंतयन्सु
हृद्वधं।। प्राकृतेनात्मना विप्राः स्नेहमोहवशंगतः।।४७।। अहो मे पश्यताज्ञानं हृदि रूढं दुरात्मनः। पारक्यस्यैव देहस्य कृते
मेऽक्षौहिणीर्हताः।।४८।। बालद्विजसुहृन्मित्रपितृभ्रातृगुरुद्रुहः। न मे स्यान्निरयान्मोक्षो ह्यपि वर्षायुतायुतैः।।४९।। न नो
राज्ञः प्रजा भर्तुर्धर्मयुद्धे वधो द्विषां। इति मे न तु बोधाय कल्पते शासनं वचः।।५०।। स्त्रीणां मद्धतबंधूनां द्रोहो योऽसाविहोत्थितः।।

हिणीः अक्षौहिण्यः। अक्षौहिणीप्रमाणं व्यासेनोक्तं। अक्षौहिणीप्रसंख्याता रथानां द्विजसत्तमाः। संख्यागणनतत्त्वज्ञैः सहस्राण्येकविंशतिः।।
वा शतान्युपरि चैवाष्टौ तथा भूयश्च सप्ततिः। गजानां च प्रसंख्यानमेतदेव प्रकीर्तितं। ज्ञेयं शतसहस्रं तु सहस्राणि नवैव तु। नराणामपि पंचाश
च्छतानि त्रीणि चैव हि। पंचषष्टिसहस्राणि तथाश्वानां शतानि च। दशोत्तराणि षट् प्राहुः संख्यातत्त्वविदो जनाः। एतामक्षौहिणीं प्राहुर्य
यावदिह संख्ययेति।।४८।। सुहृदः संबंधिनः। मित्राणि सखायः। पितरः पितृव्याः।।४९।। द्विषां वधः एनः पापं न भवतीति यच्छासनं शिष्टा
रूपं वचः। कुतो न कल्पते। यतस्तद्वचः प्रजाभर्तुरेवायं भावः। स्वप्रजानामन्यतो बाधे प्रसक्ते तद्वधोऽनुज्ञातः। दुर्योधनेन तु प्रजायां पाल्य
मानायां केवलं राज्यलोभेन हतत्वात्पापमेवेदमिति।।५०।।

भा॰ प्र॰ किंचायुद्धेपुंसांवधोभवतु भामधर्मः स्त्रीणांतु मयाहतावंधवोयासां ।तासांयोसौद्रोहोनुदिष्टोऽभ्युत्थितः ।तंव्यपोहितुमयाकर्तुंकल्पःसम
र्थोनाहं गृहमेधीयैर्गृहाश्रमविहितैः ॥५१॥ ननु च सर्वंपाप्मानंतरति ब्रह्महत्यांयोऽश्वमेधेनयजते य उ चैनमेवंवेदेति श्रुतेः ।पापमश्व
न मेधेन क्षपेदेवेत्याशंक्य अविवेकविजृंभितं हेतुवादमाश्रित्य निराकरोति। यथा घनपंकेन पंकांभोन मृज्यते। यथा वासुरालेशाक्र
न्तमपात्रंव सुरया न मृज्यते तथैव भूतहत्यामेकांप्रमादतोजातां बुद्धिपूर्वैर्हिंसाप्रायैर्यज्ञैर्मार्ष्टुं शोधयितुं नार्हति ॥५२॥ इति प्रथमेष्टमः

कर्मभिर्गृहमेधीयैर्नाहंकल्पो वियोहितुं ॥५१॥ यथा पंकेन पंकांभः सुरया वा सुराकृतं ।भूतहत्यां तथैवैकां न यज्ञैर्मार्ष्टुमर्हति ॥५२॥
३ इति श्रीभागवते महापुराणे प्रथमस्कंधे युधिष्ठिरानुतापे नाम अष्टमोध्यायः ॥८॥ सूत उवाच ॥ इति भीतः प्रजाद्रोहात्सर्वधर्म
विवित्सया ।ततो विनशनं प्रागाद्यत्र देवव्रतोऽपतत् ॥१॥ तदा ते भ्रातरः सर्वे सदश्वैः स्वर्णभूषितैः ।अन्वगच्छन्रथैर्विप्रा व्यासधौ
म्यादयस्तथा ॥२॥ भगवानपि विप्रर्षे रथेन सधनंजयः ।स तैर्व्यरोचत नृपः कुवेर इव गुह्यकैः ॥३॥ दृष्ट्वा निपतितं भूमौ दिवश्च्यु
तमिवामरं ।प्रणेमुः पांडवा भीष्मं सानुगाः सह चक्रिणा ॥४॥ तत्र ब्रह्मर्षयः सर्वे देवर्षयश्च सत्तम ।राजर्षयश्च तत्रासन्द्रष्टुं भरतपुं
गवं ॥५॥ पर्वतो नारदो धौम्यो भगवान्बादरायणः ।बृहदश्वो भरद्वाजः सशिष्यो रेणुकासुतः ॥६॥ वसिष्ठ इंद्रप्रमदस्त्रितो गृत्स
सि॰ टी॰ २ मदोऽसितः ।कक्षीवान्गौतमोऽत्रिश्च कौशिकोऽथ सुदर्शनः ॥७॥ अन्ये च मुनयो ब्रह्मन्ब्रह्मरातादयोऽमलाः ।शिष्यैरुपेता आजग्मुः कश्य
पांगिरसादयः ॥८॥ तान्समेतान्महाभागानुपलभ्य वसूत्तमः ।पूजयामास धर्मज्ञो देशकालविभागवित् ॥९॥ ॥श्री॥ श्री॥

युधिष्ठिराय भीष्मेण सर्वधर्मनिरूपणं क्रमस्तुतिश्च मुक्तिश्च नवमे तस्य वर्ण्यते। यदर्थं तस्याविवेकः श्रीकृष्णेन संवर्द्धितस्तद्दर्शयतीति
सर्वेषां धर्माणां विवित्सया वेदितुमिच्छया ।विनशनं कुरुक्षेत्रं ।देवव्रतो भीष्मः ॥१॥ सदश्वैः श्रेष्ठाश्वैर्युक्तै रथैः ॥२॥३॥४॥ तत्र तदा तत्रास ३३
न् ।तत्र[illegible]क्षणमेवागता इत्यर्थः भरतपुंगवं भीष्मं ५ रेणुकासुतः परशुरामः ६ ॥७॥ ब्रह्मरातः शुकः ।अंगिरसो बृहस्पतिः ८ वसूत्तमो भी
ष्मः ॥९॥

हृदिस्थंसतंपुरतश्चासीनंपूजयामास॥१०॥उपासीनानुपसमीपेउपविष्टान्॥प्रश्रयोविनयःप्रेमस्नेहस्ताभ्यांसंगतानुपसंगतान्
पाठांतरेताभ्यामवनतान्॥अभ्याचष्टअभ्यभाषत॥अनुरागास्रैःस्नेहाश्रुभिरंधीभूतेनचक्षुषाउपलक्ष्यतददर्शेतिवा॥११॥अ
भिभाषणमाह॥अहोइत्येकादशभिः॥हेधर्मनंदनाःक्लिष्टंयथाभवत्येवंजीवितुंनार्हथयोग्यमिति॥यतएतद्देहोकष्टंजुगुप्सितंअहोअ
न्याय्यंचेत्तत॥यतोयूयंविप्राःधर्मोऽच्युतश्चाश्रयोयेषांते॥१२॥किंचसंस्थितेमृतेबालाःप्रजाःपुत्राःयस्याःसावधूश्चेतिदैन्यंदर्शि

कृष्णंचतत्प्रभावज्ञआसीनंजगदीश्वरं॥हृदिस्थंपूजयामासमाययोपात्तविग्रहं॥१०॥पांडुपुत्रानुपासीनान्प्रश्रयप्रेमसंगतान्
अभ्याचष्टानुरागास्रैरंधीभूतेनचक्षुषा॥११॥अहोकष्टमहोन्याय्यंयद्यूयंधर्मनंदनाः॥१२॥जीवितुंनार्हथक्लिष्टंविप्रधर्मा
च्युताश्रयाः॥१२॥संस्थितेतिरथेपांडौपृथाबालप्रजावधूः॥युष्मत्कृतेबहून्क्लेशान्प्राप्तातोकवतीमुहुः॥१३॥सर्वंका
लकृतंमन्येभवतांचयदप्रियं॥सपालोयद्वशेलोकोवायोरिवघनावलिः॥१४॥यत्रधर्मसुतोराजागदापाणिर्वृकोदरः॥कृष्णोऽस्त्री
गांडिवंचापंसुहृत्कृष्णस्ततोविपत्॥१५॥नह्यस्यकर्हिचिद्राजन्पुमान्वेदविधित्सितं॥यद्विजिज्ञासयायुक्तामुह्यंतिकवयोऽ
पिहि॥१६॥तस्मादिदंदैवतंत्रंव्यवस्यभरतर्षभ॥तस्यानुविहितोनाथानाथपाहिप्रजाःप्रभो॥१७॥ ॥श्री॥ ॥श्री॥ ॥श्री

तं॥तोकान्यपत्यानितद्वतीअपत्यैःसहक्लेशान्प्राप्तेत्यर्थः॥१३॥कालकृतत्वेनशोकंवारयतिसर्वमितिद्वाभ्यां॥भवतामपीदृशोयस्यवशा
वर्ती॥१४॥अहोदुर्घटनायद्दुःकालइत्याहयत्रेति॥कृष्णोऽर्जुनःअस्त्रीधन्वीततःतत्रापिविपत्॥पुण्यशारीरवलअस्त्रनैपुण्यशास्त्रदेवसंप
त्तावत्यपीत्यर्थः॥१५॥ननुकृष्णस्यकथंकालोऽतिक्रामेदित्यपेक्षायामाह॥यत्रैवंनह्यस्यश्रीकृष्णस्येत्थंतुल्यानिदिशति॥विधित्सितंकर्तुमिष्टं
यस्यविधित्सितंतस्यविजिज्ञासया॥१६॥दैवतंत्रमीश्वराधीनंसुखदुःखादिव्यवस्यनिश्चित्य॥तस्यैश्वरस्यानुविहितःअनुवर्तीसन्॥कर्त्तरि
क्तः॥हेनाथकुलपरंपरागतस्वामिन्प्रभोसमर्थअनाथाःप्रजाःपाहि॥१७

भा० प्र० अनुविधेयः परमेश्वरः श्रीकृष्ण इत्याह । एष भगवान् सर्वेश्वरः यतः आद्यः पुमान् तत्र च यतो नारायणः साक्षात् ॥१८॥ तदुपपादय
३४ तिअस्येति अनुभावं प्रभावं ॥१९॥ त्वमज्ञानाद्यमेवं मन्यसे मातुलेयं देवक्याः सुतं । प्रियं प्रीतिविषयं । मित्रं प्रीतिकर्त्तारं । सुहृत्तमं । उप
न कारमपेक्ष्योपकारकं च । सौहृदाद्विश्वासात् । अकरोः कृतवानसि । सचिवं मंत्रिणं ॥२०॥ नन्वीश्वरस्येत्कथं नीचे सारथ्यादौ प्रवृत्ति
१ मर्ये स्तत्राह सर्वेति । तत्कृतं नीचोच्चकर्मकृतं ममयोग्यमिति मतिवैषम्यं कचिदपि नास्ति । कुतः निरवद्यस्य रागादिशून्यस्य । तत्कुतः ।

एष वै भगवान्साक्षादाद्यो नारायणः पुमान् । मोहयन्मायया लोकं गूढश्चरति वृष्णिषु ॥१८॥ अस्यानुभावं भगवान्
वेद गुह्यतमं शिवः । देवर्षिर्नारदः साक्षाद्भगवान्कपिलो नृप ॥१९॥ यं मन्यसे मातुलेयं प्रियं मित्रं सुहृत्तमं । अकरोः सचि
वं दूतं सौहृदादथ सारथिं ॥२०॥ सर्वात्मनः समदृशो ह्यद्वयस्यानहंकृतेः । तत्कृतं मतिवैषम्यं निरवद्यस्य न क्वचित् ॥२१॥ यथा
प्येकान्तभक्तेषु पश्य भूपानुकंपितं । यन्मेऽसूंस्त्यजतः साक्षात्कृष्णो दर्शनमागतः ॥२२॥ भक्त्यावेश्य मनो यस्मिन्वाचा यन्ना
मकीर्त्तयन् । त्यजन्कलेवरं योगी मुच्यते कामकर्मभिः ॥२३॥ स देवदेवो भगवान्प्रतीक्षतां कलेवरं यावदिदं हिनोम्यहं । प्रसन्न
हासारुणलोचनोल्लसन्मुखाम्बुजो ध्यानपथश्चतुर्भुजः ॥२४॥ सूत उवाच । युधिष्ठिरस्तदाकर्ण्य शयानं शरपंजरे । अपृच्छ
द्विविधान्धर्मानृषीणां चानुशृण्वतां ॥२५॥ पुरुषस्वभावविहितान्यथावर्णं यथाश्रमं । वैराग्यरागोपाधिभ्यामाम्नातोभयलक्ष

अनहंकृतेः तच्च कुतः । अद्वयस्य । तदपि कुतः समदृशः । सर्वस्यात्मनः । यथेष्टं वा हेतुहेतुमद्भावः ॥२१॥ तथापि समत्वेपि । हे नृप । अनुकंपितम
नुकंपां ॥२२॥ इदानीं स्वदेहत्यागपर्यंतं श्रीकृष्णावस्थानं प्रार्थयते भक्त्येति द्वाभ्यां ॥२३॥ यावदिति विलंबं द्योतयति । अहं हिनोमि त्यजामीति ।
स्वातंत्र्यं इदमित्यनात्मत्वेन ज्ञातं । प्रसन्नहासोऽत्र अरुणलोचनं च उल्लसत् रुचिरं मुखाम्बुजं यस्य । ध्यानस्य पंथा विषयः । योगिभिश्चिंत्यते केवलं
साम्प्रतः स्थितः सन्मां प्रतीक्षतामित्यर्थः ॥२४॥ तत्सानुकंपं वाक्यमाकर्ण्य ॥२५॥ पुरुषस्वभावेन विहितान् नरजातिसाधारणान् । वर्णाश्रमास
हती तियेनान्वयः । यथावर्णं धर्मान् । यथाश्रमं [illegible] आश्रमं आश्रमवर्णाभ्या वैराग्यरागाभ्यामुपाधिभ्यां क्रमेणाम्नातं उभयं निवृत्तिप्रवृत्तिरूपं लक्षणं ३४
वर्ण
येषां तान् ॥२६॥

पुनस्तत्रैव विशेषमाह। दानेति। मोक्षधर्मान् शमदमादीन्। भगवद्धर्मान् हरितोषणान् द्वादश्यादिनियमरूपान्। समासान्। समासव्यासौ संक्षेपविस्तारौ तावेव योगो उपायो ततः ताभ्यां॥२७॥ धर्मादींश्च यथाधिकारं प्रतिनियतोपायसहितान्। यथा यथावत्। नानाख्यानेषु ये इतिहासाः। तेषु यथा संति। तथा वर्णयामासेति॥२८॥ छंदेन स्वेच्छया मृत्युर्यस्य॥२९॥ सहस्रणीः युद्धे समीपस्थान् सहस्रं रथिनो नयति। पालयतीति सहस्रणीर्भीष्मः। सहस्रार्थीरिति पाठः सहस्रार्थवतीर्गिरः। लसंती पीतो पटो यस्य तस्मिन्। अमीलितदृगेव मनो व्यधारयत्॥३०॥ अनयैव शुद्धया धारणया हतमशुभं यस्य सः। तस्य श्रीकृष्णस्येक्षया कृपादृष्ट्या गत आयुधश्रमो यस्य सः। अत एव निवृत्तः सर्वेंद्रियवृत्ती

दानधर्मान् राजधर्मान् मोक्षधर्मान् विभागशः। स्त्रीधर्मान् भगवद्धर्मान् समासव्यासयोगतः॥२७॥ धर्मार्थकाममोक्षांश्च सहोपायान् यथा मुने। नानाख्यानेतिहासेषु वर्णयामास तत्त्ववित्॥२८॥ धर्मं प्रवदतस्तस्य स कालः प्रत्युपस्थितः। यो योगिनां छंदमृत्योर्वांछितस्तूत्तरायणः॥२९॥ तदोपसंहृत्य गिरः सहस्रणीर्विमुक्तसंगं मन आदिपूरुषे। कृष्णे लसत्पीतपटे चतुर्भुजे पुरः स्थितेऽमीलितदृग्व्यधारयत्॥३०॥ विशुद्धया धारणया हताशुभस्तदीक्षयैवाशु गतायुधश्रमः। निवृत्तसर्वेंद्रियवृत्तिविभ्रमस्तुष्टाव जन्यं विसृजन् जनार्दनं॥३१॥ भीष्म उवाच॥ इति मतिरुपकल्पिता वितृष्णा भगवति सात्वतपुंगवे विभूम्नि। स्वसुखमुपगते क्वचिद्विहर्तुं प्रकृतिमुपेयुषि यद्भवप्रवाहः॥३२॥ भा

वितर्धभ्रमण नां विभ्रमो यस्मात् सः। जन्यं देहं॥३१॥ परमफलरूपां श्रीकृष्णे रतिं प्रार्थयितुं प्रथमं स्वमतमर्पयतीति। इति नानाधर्माद्युपायैर्मतिर्मनोधारणालक्षणा ह
प उपकल्पिता समर्पिता। कस्मै सात्वतानां पुंगवे श्रेष्ठे भगवति। वितृष्णा निःकामा। अवितृष्णेति वा छेदः। अवितृप्तेत्यर्थः। विगतो भूमा यस्मात्तस्मिन् यमपेक्ष्यान्यत्र महत्त्वं नास्तीत्यर्थः। तदेव परमैश्वर्यमाह। स्वसुखं स्वस्वरूपभूतं परमानंदं उपगते प्राप्त एव। क्वचित्कदाचिद्विहर्तुं क्रीडितुं प्रकृतिमुपेयुषि स्वीकृतवति न तु स्वरूपतिरोधानेन जीववत्। पारतंत्र्यमित्यर्थः। विहर्तुं किमिति। यदुक्तं तत्प्रपंचयति। यत यतः प्रकृतेर्भवप्रवाहः सृष्टिपरंपरा भवति॥३२॥

भा॰प्र॰
३५

इदानीं श्रीकृष्णमूर्त्तिं वर्णयन् । रतिं प्रार्थयते । त्रिभुवनकमनं त्रिलोक्यामेव कमनीयं यत्तद्वपुर्दधाने रतिर्मेऽस्तु कथंभूतं वपुः । तमालवन्नीलवर्णो
यस्य तत् । प्रातःकालीना रवेः करा इव यस्य तत् एवं गौरे पीते उ वरे निर्मले अंबरे यस्मिन् तत् । अलककुलैः पर्यावृतमाननाब्जं यस्मिन् तत् । वि
जयसखे पार्थसारथौ । अनवद्या अहैतुकी फलाभिसंधिरहिता रतिरस्तु ॥३३॥ विजयसखित्वमेवानुवर्णयन् रतिं प्रार्थयते । युधि युद्धे तुर
त गाणां खुररजस्तुरगरजः तेन विधूम्रा धूसरास्ते च विष्वक् चः इतस्ततश्चलंतः कचाः कुंतलाः तैर्लुलितं विकीर्णं श्रमवारि स्वेदबिंदुरूपं तेनाल
कृतास्यस्य यो तकेनालंकृतमास्यं यस्य तस्मिन् श्रीकृष्णे ममात्मा मनः अस्तु रमतामित्यर्थः । पुनः किंभूते । मम निशितैः महीयैर्निशितैः ।

त्रिभुवनकमनं तमालवर्णं रविकरगौरवराम्बरं दधाने ॥ वपुरलककुलावृताननाब्जं विजयसखे रतिरस्तु मेऽनवद्या ॥३३॥ युधि
तुरगरजोविधूम्रविष्वक्कचलुलितश्रमवार्यलंकृतास्ये ॥ मम निशितशरैर्विभिद्यमानत्वचि विलसत्कवचेऽस्तु कृष्ण आत्मा ॥३४॥
सपदि सखिवचो निशम्य मध्ये निजपरयोर्बलयो रथं निवेश्य ॥ स्थितवति परसैनिकायुरक्ष्णा हृतवति पार्थसखे रतिर्ममास्तु ॥
३५॥ व्यवहितपृतनामुखं निरीक्ष्य स्वजनवधाद्विमुखस्य दोषबुद्ध्या ॥ कुमतिमहरदात्मविद्यया यश्चरणरतिः परमस्य तस्य मेऽस्तु ॥३६॥

तीक्ष्णैः शरैर्विभिद्यमाना त्वक् यस्य तस्मिन् । शरैरेव विलसत् त्रुटत् कवचं यस्य तस्मिन् ॥३४॥ किंच सपदीति । सेनयोरुभयोर्मध्ये रथं
स्थापय मेऽच्युत यावदेतान्निरीक्षेऽहं योद्धुकामानवस्थितानिति सख्युरर्जुनस्य वचो निशम्य सपदि तत्क्षणमेव स्व
परबलयोः सेनयोर्मध्ये स्थिते पार्थसखे रतिरस्तु । तत्र स्थित्वा परसैनिकानामायुरक्ष्णा कालदृष्ट्या हृतवति । असौ द्रो
णः असौ कर्ण इत्यादि प्रदर्शननाम्ना व्याजेन दृष्ट्यैव सर्वेषामायुराकृष्यार्जुनस्य जयं कृतवतीति ॥३५॥ न केवलमर्जुनस्य सपत्नानुद्धरणेनैव कृतं स्मरणं
जयमावहत् । किं तु विद्याहरणेनापीत्याह । व्यवहितादूरे स्थितायाः पृतनायास्तस्यां मुखमिव मुखं अग्रे स्थितान् भीष्मादीन्निरीक्ष्येत्यर्थः । स्व
जनवधाद्विमुखस्य निवृत्तस्यातः उक्तं गीतासु । एवमुक्त्वार्जुनः संख्ये रथोपस्थ उपाविशत् । विसृज्य सशरं चापं शोकसंविग्नमानस इति । अपत्यपि तं परस्य
कुमतिं अहं हंता ततो हतो इत्यादि कुबुद्धिं ॥३६॥ ॥ दुर्योधनस्य ॥ २०

ममतुमहांतमनुग्रहं कृतवानित्याह।। द्वाभ्यां।। स्वनिगमं अशस्त्र एवाहं साहाय्यमात्रं करिष्यामि इत्येवंरूपां स्वप्रतिज्ञां अपहाय हित्वा।।
शस्त्रं ग्राहयिष्यामि इति एवंरूपं मत्प्रतिज्ञां ऋतं सत्यं यथा भवति।। तथा अधिकां कर्तुं योरथस्थः सन्नव[प्लु]तः सहसैवावतीर्णः। ल
सन्नभ्ययात् अभिमुखमधावत्।। इभं हंतुं हरिः सिंहोवा किंच धृतो रथचरणः। चक्रं येन सः। तदा च संरंभेण मानुष्यनाट्य विस्मृते तु
र गुदस्यस्य सर्वसंहर्तुस्तु भुवनभारेण प्रतिपदं चलद्गुः चलंती गौः पृथिवी यस्मात्सः। तेनैव संरंभेण पतितमुत्तरीयं यस्य स स मुकुंदो मे गतिर्भव
तीत्युत्तरेणान्वयः।। ३७।। एवं यदाभ्ययात्तदा स्वयमानस्यातताथिनो धन्विनो मे शितैस्तीक्ष्णैर्विशिखैर्हतः। अतो विशीर्णं दंशः विध्वस्तं कवचं यस्य।। क्षत पतिजेन रुधिरेण परिप्लुतस्या

स्वनिगममपहाय मत्प्रतिज्ञामृतमधिकर्तुमवप्लुतो रथस्थः।। धृतरथचरणोऽभ्ययाच्चलद्गु र्हरिरिवहंतुमिभं गतोत्तरीयः।।
ञात ३७।। शितविशिखहतो विशीर्णदंशः क्षतजपरिप्लुत आततायिनो मे।। प्रसभमभिससार मद्वधार्थं स भवतु मे भगवान्गतिर्मुकुंदः।।
३८ विजयरथकुटुंब आत्ततोत्रे धृतहयरश्मिनि तच्छ्रियेक्षणीये।। भगवति रतिरस्तु मे मुमूर्षोर्यमिह निरीक्ष्य हता गताः स्वरूपं।। ३९।। मु

प्रसभं बलात्कारयंतं मर्जुनमप्यनादृत्यातिक्रम्य मद्वधार्थमभिससार अभिमुखमाजगाम।। एवं यो [?]प्रीत्या अर्जुनपक्षपाती बल
तितः। तस्मात्तस्य ममैवानुग्रहं कृतवान्।। यन्मम भक्तेनोक्तं वचो मा वृथास्तु।। स भगवान्मे गतिर्भवत्वित्यर्थः।। ३९।। तदेवमन्यायेऽ
र पि स्वपक्षरक्षाव्यग्रे कृष्णे रतिं मा आशास्ते।। विजयो अर्जुनः तस्य रथ एव कुटुंबं अत्यवलेरपि रक्षणीयं यस्य तस्मिन्।। आत्तं तोत्रं प्रतोदो येन तस्मि
न्।। धृता अश्वते हयानां रश्मयः प्रग्रहास्ते संति यस्य तस्मिन्।। अश्लाद्धिभ्यश्चेत्यनकारांतात् अपि रश्मिशब्दादिनिः। तच्छ्रिया तया सा
रथिश्रिया ईक्षणीये शोभमाने।। मुमूर्षोः मर्तुमिच्छोः। नत्वन्यायवत्ति कमिति रतिः प्रार्थ्यते अत आह।। भगवति अचिंत्यैश्वर्ये। तदाह
यमिहयुद्धे हताः सर्वे यं निरीक्ष्य स्वस्वरूपं तत्समानं रूपं गताः प्राप्ता इति दिव्यदृष्ट्या च पश्यन्नाह।। ३९।। श्री।। श्रीकृष्णायनमः।।

भा॰प्र॰ तत्रधर्मेणयुध्यमानास्तत्स्वरूपंप्रापुरित्येतन्नचित्रं।यतोमदांधाअपिप्रापुरित्याह।ललितगतिश्चविलासश्चवरासादि।मंजुगत्या
३६ दिनिरीक्षणैश्चकल्पितउरुमानःपूजायासांताः।अतःउत्कटेनमदेनांधाः।अतएवतदैकचित्तत्वेनतस्यकृतंकर्मगोवर्धनोद्धरणा
दिकमनुकृतवत्योगोपवध्वोयस्यप्रकृतिंस्वरूपंअगत।आगमन्।मकारलोपस्त्वार्षः।किलप्रसिद्धं।तस्मिन्मेरतिरस्त्वितिपूर्वेणा
न्वयः॥४०॥जगत्पूज्यतामनुस्मरन्नाह।मुनिगणैर्नृपवर्यैश्चसंकुलेव्याप्तेअंतःसदसिसभामध्येयुधिष्ठिरस्यराजसूयेएषांमु

ललितगतिविलासवल्गुहासप्रणयनिरीक्षणकल्पितोरुमानाः।कृतमनुकृतवत्यउन्मदांधाप्रकृतिमगन्कि
लयस्यगोपवध्वः॥४०॥मुनिगणनृपवर्यसंकुलेअंतःसदसियुधिष्ठिरराजसूयएषां।अर्हणमुपपेदईक्षणीयोममदृशि
गोचरएषआविरात्मा॥४१॥तमिममहमजंशरीरभाजांहृदिधिष्ठितमात्मकल्पितानां।प्रतिदृशमिवनैकधार्कमेकंसम
धिगतोस्मिविधूतभेदमोहः॥४२॥सूतउवाच॥कृष्णएवंभगवतिमनोवाग्दृष्टिवृत्तिभिः॥आत्मन्यात्मानमावेश्यसोंतश्श्वा
सउपारमत्॥४३॥संपद्यमानमाज्ञायभीष्मंब्रह्मणिनिष्कले॥सर्वेबभूवुस्तेतूष्णींवयांसीवदिनात्यये॥४४॥ ॥श्री॥

निगणादीनांईक्षणीयःअहोरूपमहोमहिमेत्येवमाश्चर्येणविलोकनीयःसन्उपपेदेप्रापएषजगतामात्माममदृशिगोचरः।दृशि।
विषयःसन्आविःप्रकटोप्रवर्त्तते।अहोमेभाग्यमितिभावः॥४१॥सोहंकृतार्थोस्मीत्याह।तमिमंअजंसम्यगधिगतःप्राप्तोऽस्मि।स
म्यक्त्वमाह।विधूतभेदमोहः।तदर्थंभेदस्योपाधिकत्वमाह।आत्मकल्पितानांस्वयंनिर्मितानांशरीरभाजांप्राणिनांहृदिप्रतिहृ
दयंधिष्ठितंअधिष्ठायस्थितं।अकारलोपस्त्वार्षः।नैकधाअनेकधानांतमित्यर्थः।तत्रदृष्टांतः।सर्वप्राणिनांदृशंदृशंप्रतिएकमेवार्कम ३६
नेकधाप्रतीतमिवेति॥४२॥मनोवाग्दृष्टीनांवृत्तिभिःपरमात्मनिश्रीकृष्णेअंतरेवलीनःश्वासोयस्य॥४३॥निष्कलेनिरुपाधौसंपाद्यमानं
मिलितंआज्ञायआलक्ष्य॥४४॥

वैर्मानवैश्च वादिताः। राज्ञां मध्ये ये साधवः अनसूयवः॥४५॥ निरहरणादीनि संस्कारादीनि। सम्यक्परेतस्य मुक्तस्यापीत्यर्थः॥४६॥ पि
तरं धृतराष्ट्रं तपस्विनीं संतापवतीं॥४८॥ राजा युधिष्ठिरः॥४९॥ इति प्रथमे नवमः॥ दशमे कृतकार्यस्य हस्तिनापुरतो हरेः। स्त्रीभिः संस्तू
दि१ यमानस्य वर्ण्यते द्वारकागमः। राज्यं चकारेत्युक्तं तत्र पृच्छति। हत्वेति। स्वऋक्थस्य धने स्पर्द्धते स्म ये ते तथा। यद्वा स्वऋक्थाय स्पृत् सं

तत्र दुंदुभयो नेदुर्देवमानववादिताः। शशंसुः साधवो राज्ञां खात्पेतुः पुष्पवृष्टयः॥४५॥ तस्य निरहरणादीनि संपरेतस्य भार्गव।
युधिष्ठिरः कारयित्वा मुहूर्त्तं दुःखितोऽभवत्॥४६॥ तुष्टुवुर्मुनयो हृष्टाः कृष्णं तद्गुह्यनामभिः॥ ततस्ते कृष्णहृदयाः स्वाश्रमा
न्प्रययुः पुनः॥४७॥ ततो युधिष्ठिरो गत्वा सहकृष्णो गजाह्वयं॥ पितरं सांत्वयामास गांधारीं च तपस्विनीं॥४८॥ पित्रा चा
नुमतो राजा वासुदेवानुमोदितः॥ चकार राज्यं धर्मेण पितृपैतामहं विभुः॥४९॥ इति श्रीभागवते महापुराणे प्रथमस्कं
धे युधिष्ठिरराज्य प्रलंभो नाम नवमोध्यायः॥९॥ शौनक उवाच॥ हत्वा स्वरिक्थस्पृध आततायिनो युधिष्ठिरो धर्मभृतां वरिष्ठः।
सहानुजैः प्रत्यवरुद्धभोजनः कथं प्रवृत्तः किमकारषीत्ततः॥१॥ सूत उवाच॥ वंशं कुरोर्वंशदवाग्निनिर्हृतं संरोहयित्वा भ
वभा वनो हरिः॥ निवेशयित्वा निजराज्य ईश्वरो युधिष्ठिरं प्रीतमना बभूव ह॥२॥

ग्रामो येषां। अत एव धनादिहरणादाततायिनः। तान्हत्वा। प्रत्यवरुद्धभोजनः बंधुवधदुःखेन संकुचितभोगः। राज्यलाभेन प्राप्तभोगो
वा। कथं राज्ये प्रवृत्तः प्रवृत्तो वा ततः किमकार्षीत्॥१॥ राज्यप्रवृत्तेः श्रीकृष्णस्य प्रीतिपर्यालोच्य प्रवृत्तत्वात्तदाशयेनोत्तरमाह। वंशं कु
हृ रोः संरोहयित्वा परीक्षिद्रूपेण संरोहमंकुरितं कृत्वा॥ कथंभूतं वंशं वंशदवाग्निनिर्हृतं। वंशा एव दवो वनं तस्माज्जातो यः क्रोधरूपो
ग्निः तेन निर्हृतं दग्धं। निजराज्ये निवेश्य च॥२॥

प्रवृत्तो हेतुमुक्त्वा किमकार्षीदित्यपेक्षायामाह। निशम्येति। प्रवृत्तं यद्विज्ञानं परमेश्वराधीनं जगन्नस्वतंत्रमित्येवंभूतं तेन विधूतो विभ्रमो अहं
कर्तेत्येवंभूतो मोहो यस्य सः। अनुजैरनुवर्तितः सेवितः सन् अजितः श्रीकृष्णः एव आश्रयो यस्य सः। परिधिः समुद्रः तत्पर्यंतां गां पृथ्वीं
पालयामास॥३॥ तस्य राज्यमनुवर्णयति काममिति त्रिभिः। मही सर्वकामदोग्ध्री वज्रभूताः व्रजान् गोष्ठानि [illegible]धस्वत्यः। ऊधः क्षीरा
शयः तद्वत्यः स्थूलोधस इत्यर्थः। सिषिचुः अभिषिंचन्॥४॥ अन्वृतु ऋतावृतौ॥५॥ आधयो मनोव्यथाः व्याधयो रोगाः क्लेशाः शीतोष्णादि।

निशम्य भीष्मोक्तमथाच्युतोक्तं प्रवृत्तविज्ञानविधूतविभ्रमः। शशास गामिंद्र इवाजिताश्रयः परिध्युपांतामनुजानुवर्तितः
३॥ कामं ववर्ष पर्जन्यः सर्वकामदुघा मही। सिषिचुः स्म व्रजान् गावः पयसोधस्वतीर्मुदा॥४॥ नद्यः समुद्रा गिरयः सवनस्प
तिवीरुधः॥ फलंत्योषधयः सर्वाः काममन्वृतु तस्य वै॥५॥ नाधयो व्याधयः क्लेशाः दैवभूतात्महेतवः। अजातशत्राविभवन्
जंतूनां राज्ञि कर्हिचित्॥६॥ उषित्वा हास्तिनपुरे मासान्कतिपयान्हरिः। सुहृदां च विशोकाय स्वसुश्च प्रियकाम्यया॥७॥
आमंत्र्य चाभ्यनुज्ञातः परिष्वज्याभिवा[द्य]तं। आरुरोह रथं कैश्चित् परिष्वक्तोभिवादितः॥८॥ सुभद्रा द्रौपदी कुंती विराट
तनया तथा॥ गांधारी धृतराष्ट्रश्च युयुत्सुर्गौतमो यमौ॥९॥ वृकोदरश्च धौम्यश्च स्त्रियो मत्स्यसुतादयः। न सेहिरे विमुह्यंतो
विरहं शार्ङ्गधन्वनः॥१०॥ सत्संगान्मुक्तदुःसंगो हातुं नोत्सहते बुधः। कीर्त्यमानं यशो यस्य सकृदाकर्ण्य रोचनं॥११॥ श्री॥

कृताः दैवं च भूतानि च आत्मा च हेतुर्येषां आधिदैविकादीनां [illegible] जंतूनां नाभवन्॥६॥ इदानीं द्वारकागमनं निरूपयितुमाह। उषित्वेति। स्व
सुर्भद्रायाः॥७॥ तं युधिष्ठिरं॥८॥ युयुत्सुः धृतराष्ट्राद्वैश्यायां जातः। गौतमः कृपः यमौ नकुलसहदेवौ॥९॥ अन्याश्च स्त्रियः मत्स्यसुता उत्तरा। तस्याः
पुनर्गृहगमने रक्षक श्रीकृष्णविरहे मोहाधिक्यात् तापधाम त्यसुतासत्यवनी॥१०॥ तेषां कृष्णविरहासहनं कैमुत्यन्यायेनाह। सत्संगादिति द्वाभ्यां। सतां सं
गाद्धेतोर्मुक्तः पुत्रादिविषयो दुःसंगो येन सः सद्भिः कीर्त्यमानं रुचिरं यस्य सः सकृदप्याकर्ण्य सत्संगं त्यक्तुं न शक्नोति॥११॥ श्री॥ श्रीरामायनमः

५

दर्शनादिनिसस्मिन् श्रीकृष्णे न्यस्तधीर्ययांते॥२२॥ अतएवानिमिषैर्नेत्रैस्तमेवीक्ष्यमाणाः तत्रतत्राहर्निशं नयनाद्यर्थं चलंतिस्म यतः। स्नेहेन सम्य
ग्बद्धा अतएव तमनुद्रुतानि अनुगतानि चेतांसि येषां ते॥२३॥ आगारान्निर्यातिनिर्गच्छतिसति। श्रीकृष्णं ग्राहेतोः उत्कलत्वात्स्रवतावाष्पं अ
श्रुनिरुद्धनेत्रेषु सत्सुविवंत्यः। तत्र हेतुः अश्रुनोस्यात् अमंगलंमाभूदित्यर्थः॥२४॥ मृदंगादयोदगवाद्यभेदाः॥२५॥ प्रेमव्रीडास्मितैर्नि पूर्वे
रीक्षणं यासां ताः॥२६॥ गुडाकानिद्रा तस्या ईशाः जितनिद्रोर्जुनः॥२७॥ व्यजनेचामरेजगृहतुः मधुपतिः श्रीकृष्णः॥२८॥ सत्याश्रीकृष्णेतांमन्वनि सा२

तस्मिन्न्यस्तधियः पार्थाः सहेरन्विरहं कथं॥ दर्शनस्पर्शसंलापशयनासनभोजनैः॥२२॥ सर्वेतेनिमिषैरक्षैस्तमनुद्रुतचेतसः॥
वीक्षंतः स्नेहसंबद्धा विचेलुस्तत्रतत्रह॥२३॥ न्यरुंधन्नुद्गलद्बाष्पमौत्कंठ्याद्देवकीसुते। निर्यात्यगारान्नोऽभद्रमिति स्याद्बांधवस्त्रि
यः॥२४॥ मृदंगशंखभेर्यश्च वीणापणवगोमुखाः॥ धुंधुर्यानकघंटाद्या नेदुर्दुंदुभयस्तथा॥२५॥ प्रासादशिखरारूढाः कुरुना
र्योदिदृक्षया॥ ववृषुः कुसुमैः कृष्णं प्रेमव्रीडास्मितेक्षणाः॥२६॥ सितातपत्रं जग्राह मुक्तादामविभूषितं। रत्नदंडं गुडाके
तमउ शः [illegible] प्रियः प्रियतमस्य ह॥२७॥ उद्धवः सात्यकिश्चैव व्यजने परमाद्भुते॥ विकीर्यमाणः कुसुमै रेजे मधुपतिः पथि॥२८॥
अश्रूयंताशिषः सत्यास्तत्रतत्रद्विजेरिताः॥ नानुरूपानुरूपाश्च निर्गुणस्य गुणात्मनः॥२९॥ अन्योन्यमासीत्संजल्प उ
त्तमश्लोकचेतसां॥ कौरवेंद्रपुरस्त्रीणां सर्वश्रुतिमनोहरः॥३०॥ सवैकिलायं पुरुषः पुरातनो य एक आसीदविशेष आत्मनि॥

परमानंदस्य१ चाग्रात्॥ किंतु नानुरूपाश्चताः अनुरूपाश्च निर्गुणस्य सुखी न वेत्यादयो नानुरूपाः गुणात्मनो मानुष्यनाट्यावतारोनुरूपाश्चेत्यर्थः॥
संधिरार्षः॥२९॥ सर्वासां श्रुतीनां मनोहरः। उपनिषदोपि मूर्त्तिमत्यस्तं संजल्पमन्वनंदन्नित्यर्थः। तत्र तेजःसौंदर्याद्यतिशयेन विस्मितेभ्यः सखीभ्योऽन्या
स स्त्रियः कथयंति नात्र विस्मयः कार्यः। सा स्वादीश्वरत्वादस्येति सर्वाइतिच तुर्भिः वैस्मरणे किलेति। प्रसिद्ध्या प्रमाणद्योतकं। य एक एवाद्वितीयः पु
रुषः आसीत्स एवायं श्रीकृष्णः कुत्रासीदविशेषे आत्मनि निःप्रपंचे निर्विकल्पे कदा अग्रे गुणेभ्यः गुणक्षोभात्पूर्वं। तथा निशि प्रलये च तस्य लक्षणं जग
दात्मनि जीवे निमीलितात्मन्निति सुप्तशक्तिषु सत्सु परं जातावेकवचनं ईश्वरे लीनरूपेषु सत्स्वित्यर्थः। ननु जीवानां प्रलयात्कथं लयं स्तत्राह। सुप्तासुप्ताः शक्तिषु

लुप्त२ जीवेषु२

भा०प्र० ३८

तु व

सतींजीवोपाधिर्जीवसत्तादिशक्तिलयएवजीवलयइत्यर्थः॥२१॥तदेवंसंसृतेरादौप्रलयानंतरंचनिष्प्रपंचावस्थानमुक्त्वासृष्टिप्रलययोर्म-
ध्येसप्रपंचावस्थानमाह॥सएवाप्रच्युतस्वरूपस्थितिरेवप्रकृतिंअनुससारअधिष्ठितवान्॥भूयःपुनःसृष्टिप्रवाहस्यानादित्वात्॥कीदृ-
शींनिजवीर्यचोदितांस्वकालशक्तिप्रेरितांस्वांशभूतानांजीवानांमायांमोहिनीं॥अतएवसिसृक्षतींस्रष्टुमिच्छतींकिमर्थमनुससारअनाम-
रूपेआत्मनिजीवे... स्वरूपनामनीविधातुमिच्छन्उपाधिसृष्ट्याजीवानांभोगायेत्यर्थः॥कर्माणिचविधातुंवेदान्कृतवानि-

ऋतेगुणेभ्योजगदात्मनीश्वरेनिमीलितात्मन्निशिसुप्तशक्तिषु॥२१॥सएवभूयोनिजवीर्यचोदितांस्वजीवमायां
नी प्रकृतिंसिसृक्षतीं॥अनामरूपात्मनिनामरूपेविधित्समानोऽनुससारशास्त्रकृत्॥२२॥सवाअयंयत्पदमत्रसूरयो
जितेंद्रियानिर्जितमातरिश्वनः॥पश्यंतिभक्त्युत्कलितामलात्मनाnन्वेषसत्वंपरिमार्ष्टुमर्हति॥२३॥सवाअयंस
ख्यनुगीतसत्कथोवेदेषुगुह्येषुचगुह्यवादिभिः॥यएकईशोजगदात्मलीलयासृजत्यवत्यत्तिनतत्रसज्जते॥२४॥यदा
ह्यधर्मेणतमोधियोनृपाजीवंतितत्रैषहिसत्वतःकिल॥धत्तेभगंसत्यमृतंदयांयशोभवायरूपाणिदधद्युगेयुगे॥२५॥

धि त्रि

त्याह॥शास्त्रकृदिति॥२२॥अस्यदर्शनमतिदुर्लभमस्मात्रिर्लब्धमित्याह॥सवैअयंयस्यपदंस्वरूपंअजितेंद्रियाःनिर्जितोमातरिश्वाप्राणोयैः॥ह्रस्वत्व-
मार्षंतेसूरयएवपश्यंतिकेनभक्त्याउत्कलितउत्कंठितःअमलोयआत्माबुद्धिस्तेनदृश्यतेत्वग्र्ययाबुद्ध्येतिश्रुतेः॥बुद्धिवैमल्यस्याप्ययमेवहेतुरि-
त्याह॥नन्विति हेसखिएषएवसत्वंबुद्धिंपरिमार्ष्टुंसम्यक्शोधयितुंअर्हतिनतुयोगादयइत्यर्थः॥यद्वानुअहोएषसत्वंज्ञानंपरिमार्ष्टुंनाशयितुंदूरगम- ३८
नेनअप्रत्यक्षीभवितुंनार्हतीति॥किंतुअनेनसहैवगंतव्यमित्यर्थः॥२३॥पुण्यश्लोकतामाह॥हेसखियोवेदेषुरहस्यैर्निरूपकैरनुगीतसत्कथः॥अ-
न्यैश्चगीताःसत्यःकथायस्यसएवायं॥गानप्रकारमाह॥यएकईशइत्यादि॥२४॥एवंभूतस्यनानावतारेकारणमाह॥यदाहीति॥तमोधियःसाधी-
गमेषुचरस्य

येषांते नृपा यदा अधर्मेण जीवंति केवलं प्राणान् पुष्णंति तदा एष एव नवायस्थित्यै सत्वतः। विशुद्धसत्वरूपेण सत्वेन रूपाणि दधत् जगादि
निधत्ते प्रकटयति। युगे युगे तत्तदवसरे भगं ऐश्वर्यं सत्यं सत्यप्रत्यज्ञत्वं ऋतं यथार्थोपदेशकत्वं दयां नृक्तरूपां यशः अद्भुतकर्मत्वं॥२५॥ वि
ज्ञापतः श्रीकृष्णावतारसौभाग्यं वर्णयंति। अहो इति पंचभिः। यद्यस्मादेषः पुरुषोत्तमः श्रियः श्रियः पतिः स्वजन्मना यदोः कुलं अंचति पूज
यति सत्करोति। अतः श्लाघ्यतमं तथा चंक्रमणेन मधोर्वनं मथुरां सत्करोति। अतस्तत्पुण्यतममिति। तस्मा र्थस्यापि अत्यंतातिशयेनालमि
ति तत्राप्याश्चर्यं अहो इत्युक्तं॥२६॥ अहोवत अत्याश्चर्यं किं तत् कुशस्थली द्वारका स्वर्गोत्तमलक्ष्यं इति घघरांस्तस्यातिरस्करी परिभवकर्त्री नु

स

अहो अलं श्लाघ्यतमं यदोः कुलं अहो अलं पुण्यतमं मधोर्वनं॥ यदेष पुंसामृषभः श्रियः पतिः स्वजन्मना चंक्रमणेन चांचति॥२६
अहोवत स्वर्गयशस्तिरस्करी कुशस्थली पुण्ययशस्करी भुवः। पश्यंति नित्यं यदनुग्रहेषितं स्मितावलोकं स्वपतिं स्म यत्प्र
जाः॥२७॥ नूनं व्रतस्नानहुतादिनेश्वरः समर्चितो ह्यस्य गृहीतपाणिभिः। पिबंति याः सख्यधरामृतं मुहुर्व्रजस्त्रियः सं
मुमुहुर्यदाशयाः॥२८॥ या वीर्यशुल्केन हृताः स्वयंवरे प्रमथ्य चैद्यप्रमुखान् हि शुष्मिणः। प्रद्युम्नसांबांबसुतादयोप
राया आहृता भौमवधे सहस्रशः॥२९॥

वश्य पुण्ययशः कर्त्री भवति। यद्यतः। यत्र ताः सर्वाः प्रजाः स्वानुग्रहेण ईषितं प्रेषितं स्मितपूर्वा वलोको यस्य तं। यद्वा अनुग्रहार्थमिषितं इष्टं स्वस्या
त्मनः पतिं। श्रीकृष्णं ननु पित्रादिवदेहमात्रपतिं नित्यं पश्यंति स्म उषितमिति पाठे स्वानुग्रहार्थमुषितं कृतनिवासं। नेतत्स्वर्गेऽस्तीत्यर्थः॥२७॥ हे
सखि अस्य गृहीतपाणिभिः। पत्नीभिः ईश्वरोयमेव नूनं जन्मांतरेषु समर्चितः। यस्मिन्नधरामृते आशयः स्थितं यासां ताः संमोहं प्राप्ता इति मनोहरत्व
मुक्तं॥२८॥ एतस्य पंचषा या इति द्वाभ्यां। वीर्यमेव शुल्कं मौल्यं तेन। शुष्मिणो बलिष्ठान्। प्रद्युम्नसांबांबसुता यासां रुक्मिणीजांबव
तीनाग्नजितीनां ताः आदिर्यासां सत्यजामादीनां ताः याश्चापराः। अस्य श्लोकस्योत्तरश्लोकेनान्वयः॥२९॥ ॥श्री॥ ॥श्रीकृष्णायनमः॥

भा॰ प्र॰ एतास्त्रीत्वमेवपरंकेवलंसाधुन्नोनैकुर्वते। किंतुतंस्त्रीत्वंअयासंगतंपेशलंजडंस्यात्तंअयंयस्मात्तत्। निरस्तंशौचंशुद्धित्वंयस्मात्तथानूतमपिजा
३८ नुकदाचिदपिनापैतिननिर्गच्छति। आहृतिर्व्याहारैः। यथापारिजाताहरिप्रियवस्त्राहरणैः। हृदिस्पृशन्आनंदयन्॥ ३०॥ एवंविधा
विचित्रागिरःसस्मितेननिरीक्षणेनाभिनंदन्सहहरिर्ययौ॥ ३१॥ मधुद्विषोपिगोपीथायरक्षणायस्नेहात्परेभ्यःशत्रुभ्यःशंकितःसन्
प्रायुंक्त। हस्त्यश्वरथपादातंसेनांगंस्याच्चतुर्विधमित्येवंचतुरंगिणींपृतनांसेनां॥ ३२॥ पांडोःकुरुवंशत्वात्पांडवाअपिकौरवाःएवतान्

एताःपरंस्त्रीत्वमपास्तपेशलंनिरस्तशौचंवसाधुकुर्वते॥ यासांगृहात्पुष्करलोचनःपतिर्नजात्वपैत्याहृतिभिर्हृदिस्पृशन्॥ ३०॥
एवंविधागदंतीनांसगिरःपुरयोषितां॥ निरीक्षणेनाभिनंदन्सस्मितेनययौहरिः॥ ३१॥ अजातशत्रुःपृतनांगोपीथायमधु
द्विषः॥ परेभ्यःशंकितःस्नेहात्प्रायुंक्तचतुरंगिणीं॥ ३२॥ अथदूरगतान्शौरिःकौरवान्विरहातुरान्॥ सन्निवर्त्यदृढंस्निग्धा
न्प्रायात्स्वनगरींप्रियैः॥ ३३॥ कुरुजांगलपांचालान्शूरसेनान्सयामुनान्॥ ब्रह्मावर्त्तंकुरुक्षेत्रंमत्स्यान्सारस्वतानथ॥ ३४॥
मरुधन्वमतिक्रम्यसौवीराभीरयोःपरान्॥ आनर्त्तान्भार्गवोपागाच्छ्रांतवाहोमनाग्विभुः॥ ३५॥ तत्रतत्रहतत्रत्यैर्हरिःप्रत्युदिता
र्हणः॥ सायंभेजेदिशंपश्चाद्गविष्ठोगांगतस्तदा॥ ३६॥ इतिश्रीभागवतेमहापुराणेप्रथमस्कंधेदशमोध्यायः॥ १०॥ श्री ॥

प्रियैःसुहृद्भिः॥ ३३॥ कुरुक्षेत्रंकुरुदेशांतरगतमेवक्रमोनविवक्षितः॥ ३४॥ मरुनिरुदकोदेशः। धन्वोऽल्पोदकः। आनर्त्तान्द्वारकादे
शान्सविभुःउपागात्। आसःहेभार्गवमनाक्ईषत्श्रांतावाहायस्यसः॥ ३५॥ तत्रतत्रदेशेतत्रत्यैर्जनैःप्रत्युदिताःनिवेदितान्यर्हणा
निउपायनानियस्मैसः। सायंअपराह्णेपश्चाद्दिशंपश्चिमांदिशंभेजेप्राप्तः। तदागविष्ठःस्वर्गे[illegible]ःसूर्यःगांउदकंगतःप्रविष्टः। अस्तंगतइत्यर्थः
अद्भ्योवाएषप्रातरुदेतियःसायंप्रविशतीतिश्रुतेः। यद्वातदासायंकालेजातेरथादवतीर्यगविष्ठःभूमौस्थितःगांजलाशयंगतःसन्पश्चाद्दि ३८
शंसायंसंध्यांभेजेउपासितवानित्यर्थः॥ ३६॥ इतिप्रथमेदशमः॥ ॥

आनर्त्तैस्स्तूयमानस्य पुरीं निर्विघ्नपबंधुभिः। एकादशो रतिः सम्यक्कथास्वेऽङ्गस्य वर्ण्यते॥१॥ तत्सवेरुच्चलल्लोरमुरं च ध्वजतोरणं। उत्क्र
उत्क्रसउत्कटा पालिसम्पुरं प्रचुराविश्रत॥२॥ स्वृद्धान् समृद्धान् दरवरं पांचजन्यं शं[illegible]शंखं दध्मौ वादितवान्॥३॥ जगतोयद्भयं तस्य
नयावहं प्रभुय प्रभुः अप्रभुजग्मुः। नतुर्दर्शनलालसमोत्सुक्यं यासां ताः॥४॥ तत्र तस्मिन् श्रीकृष्णे उपनीताः समर्पिताः बलयः उपायन
निर्याभिः। ताः निरपेक्षेऽपि तस्मिन्नाहरेण समर्पणे दृष्टांतः रवेर्दीपमिवेति। पितरं प्रत्यर्भकाद्भवतं सर्वसुहृत्स्म वितारस्मूचुरित्युत्त

सूत उवाच॥ आनर्त्तान्स उपव्रज्य स्वृद्धान्जनपदान्स्वकान्। दध्मौ दरवरं तेषां विषादं शमयन्निव॥२॥ तमुपश्रुत्य निन
दं जगद्भयभयाव[illegible]हं॥ प्रत्युद्ययुः प्रजाः सर्वा भर्तृदर्शनलालसाः॥३॥ तत्रोपनीतबलयो रवेर्दीपमिवादृताः॥ आत्मारामं पूर्ण
कामं निजलाभेन नित्यदा॥४॥ प्रीत्युत्फुल्लमुखाः प्रोचुर्हर्षगद्गदया गिरा॥ पितरं सर्वसुहृदमवितारमिवार्भकाः॥५॥ नताः स्म
ते नाथ सदांघ्रिपंकजं विरिंचवैरिंच्यसुरेंद्रवंदितं परायणं क्षेममिहेच्छतां परं न यत्र कालः प्रभवेत्परः प्रभुः॥६॥ भवाय
नस्त्वं भव विश्वभावन त्वमेव माताथ सुहृत्पतिः पिता त्वं सद्गुरुर्नः परमं च दैवतं यस्यानुवृत्त्या कृतिनो बभूविम॥७॥ अ
हो सनाथा भवता स्म यद्वयं त्रैविष्टपानामपि दूरदर्शनं प्रेमस्मितस्निग्धनिरीक्षणाननं पश्येम रूपं तव सर्वसौभगं॥८॥

रणान्वयः सुहृत्त्वेनैवावतारं नतु कामेन। अत्र हेतुः श्री[illegible]मारामा तत्रापि हेतुः परमानंदनिजस्वरूपलाभेन पूर्णकाम॥३॥ किमूचुरेतदित्याह नता
स्मेति। विरिंच्यो ब्रह्मा वैरिंच्याः सनकादयः। इह संसारे परं क्षेममिच्छतां परायणं परमं शरणं कुतः परेषां ब्रह्मादीनां प्रभुरपि कालो यत्र
प्रभुर्न भवेत्॥६॥ अतः भवाय उद्भवाय नोऽस्माकं त्वं भव हे विश्वभावन कृतिनः कृतार्थाः बभूविम जाता वयं॥७॥ कृतार्थत्वमेवाह।
अहो भवता वयं सनाथाः स्म यद्यस्मात्तव रूपं पश्येम त्रैविष्टपानामपि दूरदर्शनं यस्य तत् देवानामपि दुर्लभमित्यर्थः प्रेम्णा यत्स्मितं तेन त
स्निग्धं निरीक्षणं यस्मिन्नतत्प्राननं यस्मिन्नतद्रूपं सर्वेषु चांगेषु सौभगं यस्मिन्नतत्॥८॥

र्नकाईस करुणमाऊः।यर्हियदाभोऽअंबुजाक्षनो भवान्निपातेन इत्यनादरे षष्ठी।अस्मान्अनादृत्यअपससारअपहायजगाम।कुरू
न्हस्तिनापुरं मधून् मथुरांवा।तत्रतदारविंविनाअंधारक्षणेर्यथा।एवंतवनस्त्वदीयानामस्माकमपीत्यर्थः।।९।।इतिवएवंविधाः
प्रजाश्चोदीरितावाचः शृण्वन्।दृष्ट्यासानिनंदावलोकनेनानुग्रहंकुर्वन्पुरींद्वारकांप्राविशत्।।१०।।तांद्वारकांस्तौतिपंचभिः।स्वतु
भि ल्यबलैर्नागादिर्गुप्तांरक्षितां।।११।।सर्वर्तुषुक्तेषुसर्वेविभवाः।पुष्पादिसंपदोयेषांतेपुण्यवृक्षाः।लताश्रमाः लतामंडपास्त्वयेनतैरुद्याना।।

यर्ह्यंबुजाक्षापससारभोभवान्कुरून्मधून्वाथसुहृद्दिदृक्षया।।तत्राब्दकोटिप्रतिमःक्षणोभवेद्रविंविनाक्ष्णोरिवनस्तवाच्युत
।९। इतिचोदीरितावाचःप्रजानांभक्तवत्सलः।शृण्वानोऽनुग्रहंदृष्ट्यावितन्वन्प्राविशत्पुरीं।।१०।।मधुभोजदशार्हार्हकुकुरांध
कवृष्णिभिः।आत्मतुल्यबलैर्गुप्तांनागैर्भोगवतीमिव।।११।।सर्वर्तुसर्वविभवपुण्यवृक्षलताश्रमैः।उद्यानोपवनारामैर्वृ
तपद्माकरश्रियं।।१२।।गोपुरद्वारमार्गेषुकृतकौतुकतोरणां।चित्रध्वजपताकाग्रैरंतःप्रतिहतातपां।।१३।।संमार्जितमहामा
र्गरथ्यापणकचत्वरां।।सिक्तांगंधजलैरुप्तांफलपुष्पाक्षतांकुरैः।।१४।।द्वारिद्वारिगृहाणांचदध्यक्षतफलेक्षुभिः।अलंकृतां
पूर्णकुंभैर्बलिभिर्धूपदीपकैः।।१५।।

भिर्वृतायेपद्माकराः सरांसितैःश्रीःशोभायस्यांतां।उद्यानंफलप्रधानं।उपवनंपुष्पप्रधानं।आरामःक्रीडार्थवनं।।१२।।गोपुरं
पुरद्वारंगृहद्वारंकृतानिकौतुकेनोत्सवेनतोरणानियस्यांतां।गरुडादिचिह्नैरंकिताध्वजाःजयशब्दपत्रांकिताःपताकाः।चित्राणां
ध्वजपताकानामग्रैरंतःप्रतिहतआतपोयस्यांतां।।१३।।संमार्जितानिनिःसारितरजस्कानिमहामार्गादीनियस्यांतां।महामार्गोराजमार्गः।आ ४०
पणकाःपण्यवीथयः।चत्वराणिअंगनानि।फलादिभिरुप्तांअवकीर्णां।।१४।।१५।।

रथ्यारतर
१ मारजा

प्रेष्ठं अंतरात्मानं आयांतं निशम्य श्रुत्वा वसुदेवादयः प्रत्युज्जग्मुरिति चतुर्थेनान्वयः ॥१६॥ प्रहर्षवेगेन उच्छसितानि उल्लंघितानि श
यनाशनानि यैस्ते तत्र श्रुतगतौ ॥१७॥ वारणेंद्रं मंगलार्थं पुरतः कृत्वा ससुमंगलैः सुमंगलपुष्पादियुक्तपाणिभिः ब्रह्मघोषो मंत्र
पाठः प्रणयेन स्नेहेन आगतं साध्वसं संभ्रमो येषां ते ॥१८॥ वारमुख्या नटादयश्च प्रत्युज्जग्मुः लसत्कुंडलैर्निर्भातानि भातानि कपो
लानि तैर्वदने शुश्रीर्यासां ताः वारमुख्या नर्तक्यो वेश्या इति यावत् ॥१९॥ अद्भुतानि चेति चकारस्य वंदिनश्चेत्यन्वयः नटा नव नटर

निशम्य प्रेष्ठमायांतं वसुदेवो महामनाः ॥ अक्रूरश्चोग्रसेनश्च रामश्चाद्भुतविक्रमः ॥१६॥ प्रद्युम्नश्चारुदेष्णश्च सांबो जांबवतीसु
तः ॥ प्रहर्षवेगोच्छसितशयनाशनभोजनाः ॥१७॥ वारणेंद्रं पुरस्कृत्य ब्राह्मणैः ससुमंगलैः ॥ शंखतूर्यनिनादेन ब्रह्मघोषेण चा
दृताः ॥१८॥ प्रत्युज्जग्मू रथैर्हृष्टाः प्रणयागतसाध्वसाः ॥ वारमुख्याश्च शतशो यानैस्तद्दर्शनोत्सुकाः ॥ लसत्कुंडलनिर्भातक सं
पोलवदनश्रियः ॥१९॥ नटनर्तकगंधर्वाः सूतमागधवंदिनः ॥ गायंति चोत्तमश्लोकचरितान्यद्भुतानि च ॥२०॥ भगवांस्त
त्र बंधूनां पौराणामनुवर्त्तिनां ॥ यथाविध्युपसंगम्य सर्वेषां मानमादधे ॥२१॥ प्रह्वाभिवादनाश्लेषकरस्पर्शस्मितेक्षणैः ॥
आश्वास्य चाश्वपाकेभ्यो वरैश्चाभिमतैर्विभुः ॥२२॥ स्वयं च गुरुभिर्विप्रैः सदारैः स्थविरैरपि ॥ आशीर्भिर्युज्यमानोऽन्यैर्वंदि ण्पा
भिश्चाविशत्पुरं ॥२३॥ राजमार्गं गते कृष्णे द्वारकायाः कुलस्त्रियः ॥ हर्म्याँरुरुहुर्विप्र तदीक्षणमहोत्सवाः ॥२४॥ ॥श्री॥

रसाभिनयचतुराः तालाद्यनुसारेण नृत्यंतो नर्तकाः गंधर्वा गायकाः सूताः पौराणिकाः प्रोक्ता मागधा वंशशंसकाः वंदिनस्त्वमलप्रज्ञाः प्रस्तावसदृ
शोक्तय इति ते सर्वे गायंति चेति चकारस्यान्वयः ॥२०॥ यथाविधि यैः सह यथोचितं तैस्तथा समागमं कृत्वा सर्वेषां मानं कृतवानित्यर्थः ॥२१॥ तदाह प्र
ह्वेति प्रह्वत्वं शिरसा नतिः अभिवादनं वाचा नतिः आश्वास्य अभयं दत्त्वा श्वपाकानभिव्याप्य वरैरभीष्टदानैश्च मानं कृतवान् ॥२२॥ अन्यैश्च वं
दिभिश्च ॥२३॥ तस्येक्षणेन महानुत्सवो यासां ताः २४

यत् यस्मात् नित्यं सदा अच्युतं निरीक्ष्यमाणानामपि दृशो नैव तृप्यंति ॥ अतश्चारुरुक्तः । कथंभूतं श्रियः शोभायाः धाम स्थानं अंगं यस्य तं ॥२५
एतदेवाभिनयेनाह । श्रियो लक्ष्म्याः यस्योरः वक्षः निवासः यस्य मुखं सर्वप्राणिनां दृशां सौंदर्यामृतपानाय पात्रं । यस्य बाहवो लोकपा
लानां निवासः ॥ सारं श्रीकृष्णं गायंतीति सारंगा भक्ताः । तेषां यस्य पादांबुजं निवासः तं निरीक्ष्यमाणानां दृशः इति पूर्वेणान्वयः ॥२६॥
सितैरातपत्रव्यजनैरुपस्कृतो मंडितः । अर्कश्च उडुपो नक्षत्रसहितश्चंद्रः चापमिंद्रधनुश्च वैद्युतं विद्युत्तेजश्च तैः । अर्कछत्र

नित्यं निरीक्ष्यमाणानां यद्यपि द्वारकौकसां ॥ न वितृप्यंति हि दृशः श्रियो धामांगमच्युतं ॥२५॥ श्रियो निवासो यस्यो
रः पानपात्रं मुखं दृशां ॥ बाहवो लोकपालानां सारंगाणां पदांबुजं ॥२६॥ सितातपत्रैर्व्यजनैरुपस्कृतः प्रसूनवर्षैरभि
वर्षितः पथि पिशंगवासा वनमालया बभौ घनो यथार्कोडुपचापवैद्युतैः ॥२७॥ प्रविष्टस्तु गृहं पित्रोः परिष्वक्तः स्वमा
तृभिः । ववंदे शिरसा सप्त देवकीप्रमुखा मुदा ॥२८॥ ताः पुत्रमंकमारोप्य स्नेहस्नुतपयोधराः ॥ हर्षविह्वलितात्मा
नः सिषिचुर्नेत्रजैर्जलैः ॥२९॥ अथाविशत्स्वभवनं सर्वकाममनुत्तमं ॥ प्रासादा यत्र पत्नीनां सहस्राणि च षोडश ॥३०॥

स्योपमानं । नक्षत्राणि पुष्पवृष्टेः । चंद्रः परिभ्रमः । कृतमंडलाकारयोश्चामरव्यजनयोः । चापं वनमालायाः । विद्युत्तेजः पिशंगवाससोः ।
अद्भुतोपमेयं । यदि घनस्योपरि सूर्यबिंबः उन्नयतश्चंद्रो सर्वतो नक्षत्राणि मध्ये च मिलितं चापद्वयं स्थिरं । विद्युत्तेजश्च यदि भवेत
र्हि । स घनो यथा भाति तथा हरिर्बभावित्यर्थः ॥२७॥ देवकीप्रमुखाः सप्त ववंदे इति मातृसौंदर्यादादरविशेषज्ञापनार्थमुक्तं । अष्ट
दशापि वसुदेवस्य भार्या मातृतुल्यत्वान्नमस्कृता एव ॥२८॥ सहस्राणि च षोडशेति चकारादष्टोत्तरशताधिकानीति ज्ञेयं ॥३०॥ ४२

प्रोष्य देशांतरे उषित्वा। आरात् दूरादेव विलोक्य संजातो मनसि महोत्सवो यासां ताः। आशानां दिशां याद्वा। आशानाह्हे चोत स्युः॥ आ
शायां तःकरणं तस्मादप्यात्मना उत्तस्थुः। श्रीकृष्णेनात्मनः संश्लेषं तःकरण व्यवधानमपि सेहं ते इत्यर्थः। व्रीडितानि लोचनान्यान
नानि च यासां ताः। अपांगैरेव वीक्षणात् व्रीडितलोचनाः। अवनतमुखत्वात् व्रीडिताननाः। साकं व्रतैरिति हास्य क्रीडावर्ज्जितादिनि
यमा आपिता न्य उत्तस्थुः रित्यर्थः। धृतव्रता एवोत्तस्थुरिति वा। व्रतानि च याज्ञवल्क्योक्तानि। क्रीडां शरीरसंस्कारं समाजोत्सवदर्शनं
हास्यं परगृहे यानं त्यजेत् प्रोषितभर्तृकेति॥३१॥ आयांतं तं पतिं दृष्ट्वा तास्तूर्णमात्मना बुध्या परिरेभिरे। ततो दृष्टिभिः। ततः समीप

पत्न्यः पतिं प्रोष्य गृहानुपागतं विलोक्य संजातमनोमहोत्सवाः। उत्तस्थुरारात्सहसासनाशयात्साकं व्रतैर्व्रीडितलोचनान
नाः॥३१॥ तमात्मजैर्दृष्टिभिरंतरात्मना दुरंतभावाः परिरेभिरे पतिं॥ निरुद्धमप्यास्रवदंबु नेत्रयोर्विलज्जतीनां भृगुवर्य वैक्ल
व्यात्॥३२॥ यद्यप्यसौ पार्श्वगतो रहोगतस्तथापि तस्यांघ्रियुगं नवं नवं। पदे पदे का विरमेत तत्पदाच्चलापि यच्छ्रीर्न जहाति क नवं
र्हिचित्॥३३॥ एवं नृपाणां क्षितिभारजन्मनामक्षौहिणीभिः परिवृत्ततेजसां॥ विधाय वैरं श्वसनो यथानलं मिथो वधेनोपर
तो निरायुधः॥३४॥ स एव नरलोकेस्मिन्नवतीर्णः स्वमायया॥ रेमे स्त्रीरत्नकूटस्थो भगवान्प्राकृतो यथा॥३५॥ ॥श्री॥

मागतमात्मजैः पुत्रैर्गृहीतं कं भमालिंगयंति। इव स्वयमालिंगितवंत्य इत्यर्थः। अत्र हेतुः दुरंतभावः गंभीराभिप्रायाः तदा च तासां नेत्र
योः निरुद्धमप्यंबु बाष्पं वैक्लव्यात् अवैवश्यात् आस्रवत् अस्रवत् स्त्रावा अत एव धैर्यहान्या विलज्जतीनां हे भृगुवर्य चित्रं भूत् इति॥३२॥
पार्श्वगतः समीपस्थः तत्रापि रहोगतः एकांते अवर्त्तत तस्या पदे पदे प्रतिक्षणं नवं नवमेव च। अत्र कैमुत्यन्यायः का विरमेत इति चलापि च
लस्वभावापि॥३३॥ उक्तं श्रीकृष्णचरितं संक्षिप्याह। एवमिति द्वाभ्यां। क्षितेर्भाराय जन्म येषां। अक्षौहिणीभिः कृत्वा परिवृत्तं सर्वतः आ
वृतं तेजः अन्नावीर्यं येषां श्वसनो वायुर्वेणूनामन्योन्यसंघर्षणेनानलं विधाय मिथो वधेन यथोपशाम्यति तद्वत्॥३४॥ स्त्रीरत्नकूटस्थः। उ
तमस्त्रीकदंबस्थः॥३५॥

नन्वेवं स्त्रीसंगादिभिः संसारिप्रतीतेः कथं नैवानवृतीर्ण इत्युच्यते तत्राह उद्दामेति द्वाभ्यां । यासां उद्दामः गंभीरो यो भावोऽभिप्रायः तस्य पिशु-
नः सूचको मलो वल्गुः सुंदरो हासो व्रीडावलोकश्च ताभ्यां निहतः अमदनः श्रीमहादेवोपि संमुह्य लज्जया चापं पिनाकं अजहात् । एवं
प्रभावाः याः स्त्रियः इत्येतावद्विवक्षितं । यद्वा । भगवतो मोहिनीरूपेण महेशोपि मोहित एव । एताश्च तादृग्विलासा एवेति यथोक्तं । ताः कुह-
कैः कपटैर्विभ्रमैर्यस्येंद्रियं मनः [redacted] मथितुं क्षोभयितुं न शेकुः न शक्ताः ॥३६॥ तं श्रीकृष्णं अयं प्राकृतो लोकः आत्मौपम्येन स्वसादृश्ये-
न संगिनं मनुजं मन्यते । अत्र हेतुः । व्यापृण्वानं व्याप्रियमाणं यतो मयं बुधः अतत्त्वज्ञः ॥३७॥ कुत इत्यपेक्षायामैश्वर्यलक्षणमाह एतदिति
ईशस्य ईशनमैश्वर्यं नामैतदेव किं तत् । प्रकृतिस्थोपि तस्या गुणैः सुखदुःखादिभिः सदैव न युज्यत इति यत् । यथा आत्मस्थैरानंदादिभिरात्म-

उद्दामभावपिशुनामलवल्गुहासव्रीडावलोकनिहतो मदनोऽपि यासां ॥ संमुह्य चापमजहात्प्रमदोत्तमास्ता यस्येंद्रियं विमथि-
तुं कुहकैर्न शेकुः ॥३६॥ तमयं मन्यते लोको ह्यसंगमपि संगिनं ॥ आत्मौपम्येन मनुजं व्या[redacted]पृण्वानं यतोऽबुधः ॥३७॥ एतदीशन-
मीशस्य प्रकृतिस्थोपि तद्गुणैः ॥ न युज्यते सदात्मस्थैर्यथा बुद्धिस्तदाश्रया ॥३८॥ तं मेनिरेऽबला मूढाः स्त्रैणं चानुव्रतं रहः ॥ अ-
प्रमाणविदो भर्तुरीश्वरं मतयो यथा ॥३९॥ इति श्रीभागवते महापुराणे प्रथमस्कंधे श्रीकृष्णद्वारकाप्रवेशो नामैकादशोध्या-
यः ॥११॥ शौनक उवाच ॥ अश्वत्थाम्नोपसृष्टेन ब्रह्मशीर्ष्णोरुतेजसा ॥ उत्तराया हतो गर्भ ईशेनाजीवितः पुनः ॥१॥ तस्य जन्म महा-
श्रयापि बुद्धिर्न युज्यते । तद्वत् वैधर्म्यदृष्टांतो वा । आत्मस्थैः सत्ताप्रकाशादिभिर्यथा बुद्धि बुद्धेः कर्माणि च महात्मनः ॥ निधनं च यथैवासीत्स प्रेत्य गत
र्युज्यत इति । एवं वा । असदात्मा देहः । तत्रस्थैर्गुणैस्तदाश्रया बुद्धिः तदुपाधिः जीवो यथा युज्यते । एवं प्रकृतिस्थोपि तद्गुणैर्न युज्यत इति यत् । एतदीशनमीश-
स्येति ॥३८॥ तत्त्वमोपितस्य तत्त्वं न जानंतीत्याह । स्त्रैणं आत्मवशं रहः एकांते अनुव्रतं च मेनिरे भर्तुरप्रमाणविदः प्रमाणमियत्तां महिमानमजानंत्य इत्य-
र्थः ईश्वरं स्तेत्रकं मतयः अहंप्रत्ययवृत्तयः यथा स्वाधीनं स्वधर्मपोगिनं मन्यंते तद्वत् । यद्वा । यथा यथा तासां मतयः कल्पनाः तथा तथा तमीश्वरं स्त्रैणादिरूपं मेनि-
रे इत्यर्थः ॥३९॥ प्रथमे एकादशः ॥ पुरोक्तं यत्परसंगायब्रह्मादिदंडादिविस्तरात् । द्वादशो तु तद्देवाप्यपरीक्षिज्जन्मवर्ण्यते ॥ परीक्षितोथ राजर्षेर्जन्मकर्मविलाप-
नं । संस्थां च पांडुपुत्राणां वक्ष्ये कृष्णकथोदयमिति प्रतिज्ञाय पांडवानां राज्यस्थितिरूपो ह्युतन्नृतासप्रसंगं ततमाध्यायमारभ्य निरूपिता इदानीं मोक्षान्तिक

ग्राथ्येपेन त्वां ज्ञापयामीत्याह। गादितुं परिमुं परिमन्यसे अनुग्रहेण तर्हि ब्रूहीति। यस्य ज्ञानमदालुक इति श्रवणे छायां कारणं॥३॥ निःस्पृहस्यापि राज्ञः
नस्य श्रीकृष्णानुगृहीतैतादृक पौत्रः समजनीति वक्तुं तस्य कृष्णनक्षुद्रेकं माह। अपीपलदिति त्रिभिः। पितृवदपीपलत् पालयामास॥४॥ कृतवस्तु दुपार्जित
लोकाश्च॥५॥ सुरस्पार्हाः सुराणां स्पृहणीयाः ते संपरा इयःकामाः विषयाः राज्ञः किं प्रीतिं अधिजकुः न कृतवंत इत्यर्थः॥५॥ अत्र हेतुः मुकुंद एव म
नायस्येति कृष्णधितस्यान्नैकमनसो यथा इतरे स्मरकचंदनादयो न कुर्वंति। तद्वत्॥६॥ अस्कृतमाह। मातुरिति॥७॥ पुरटं सुवर्णं स्फुरटमौलिर्यस्या

तदिदं श्रोतुमिच्छामि गदितुं यदि मन्यसे॥ ब्रूहि नः श्रद्दधानानां यस्य ज्ञानमदाच्छुकः॥३॥ सूत उवाच॥ अपीपलद्धर्मराजः पितृव
द्रंजयन्प्रजाः॥ निस्पृहः सर्वकामेभ्यः कृष्णपादानुसेवया॥४॥ संपदः क्रतवो लोका महिषी भ्रातरो मही॥ जंबूद्वीपाधिपत्यं च यशश्
च त्रिदिवं गतं॥५॥ किं ते कामाः सुरस्पार्हा मुकुंदमनसो द्विजाः॥ अधिजह्रुर्मुदं राज्ञः क्षुधितस्य यथेतरे॥६॥ मातुर्गर्भगतो वी
त रः स राजन्गुरुनंदन॥ ददर्श पुरुषं कंचिद्दह्यमानोऽस्त्रतेजसा॥७॥ अंगुष्ठमात्रममलं स्फुरत्पुरटमौलिनं॥ अपीच्यदर्शनं श्यामं तडि
द्वाससमच्युतं॥८॥ श्रीमद्दीर्घचतुर्बाहुं तप्तकांचनकुंडलं॥ क्षतजाक्षं गदापाणिमात्मनः सर्वतो दिशं॥९॥ परिभ्रमंतमुल्का
भां भ्रामयंतं गदां मुहुः॥९॥ अस्त्रतेजः स्वगदया नीहारमिव गोपतिः॥ विधमंतं सन्निकर्षे पर्यैक्षत क इत्यसौ॥१०॥ श्री॥

स्फितां श्रीह्यादि निश्चेति इति निप्रत्ययः। अपीच्यं अतिसुंदरं दर्शनं यस्य तं इति दर्शनं। रूपं यस्य तं। तडिद्वाससी यस्येति श्यामममितिच पदाभ्यां विरुद्ध
सं भितमेवोपमा सूचिता। अच्युतं अविकारं॥८॥ तप्तं द्राहोत्तीर्णं यत्कांचनं तन्मये कुंडले यस्य तं। क्षतजाक्षं संरंभादत्यारक्तनेत्रं। अहो मद्रक्षस्या
पि गर्भोस्त्री पीडेति क्रोधेनेति भावः॥९॥ अस्त्रतेजो विधमंतं विनाशयंतं। नीहारं हिमं गोपतिः सूर्य इव। सन्निकर्षे समीपे ददर्श॥ दृष्ट्वा चासौ
क इति पर्यैक्षत वितर्कितवान्॥१०॥

अमेयात्मेति कथं तद्विधूतवानित्यवितर्क्यरूपः। धर्मं गोपायतीति धर्मगुप्। दशमासपरिच्छेदो यस्य तस्य च मिषतः पश्यतः। यत्र दृष्टस्तत्रैवांतर्हि
तः। तत्रान्यत्रगतः। यतो विभुः॥११॥ उदर्के उत्तरफले सर्वगुणानामुत्तरोत्तराधिक्यसूचके लग्ने। तत्र हेतुः। अनुकूलैरन्यैर्ग्रहैः सहितानां
शुभग्रहाणामुदयो यस्मिन्॥१२॥ जातकं जातकर्म। मंगलं पुण्याहं॥१३॥ वारान् श्रेष्ठान् स्वन्नं शोभनमन्नं च। तीर्थवि[?]द्दानकालज्ञः। यथा
यावन्न छिद्यते नालं तावन्नाप्नोति सूतकं। छिन्ने नाले ततः पश्चात्सूतकं तु विधीयते। इति वचनात्। ततः पूर्वं प्रादात्। प्रजातीर्थे पुत्रोत्पत्तिपुण्य

विधूयतदमेयात्मा भगवान् धर्मगुब्विभुः। मिषतो दशमासस्य तत्रैवांतर्दधे हरिः॥११॥ ततः सर्वगुणोदर्के सानुकूलग्र
होदये। जज्ञे वंशधरः पांडोर्भूयः पांडुरिवौजसा॥१२॥ तस्य प्रीतमना राजा विप्रैर्धौम्यकृपादिभिः। जातकं कारयामा
स वाचयित्वा च मंगलं॥१३॥ हिरण्यं गां महीं ग्रामान् हस्त्यश्वान्नृपतिर्वरान्। प्रादात्स्वन्नं च विप्रेभ्यः प्रजातीर्थे स तीर्थ
वित्॥१४॥ तमूचुर्ब्राह्मणास्तुष्टा राजानं^ प्रजातंतौ कुरूणां पौरवर्षभ॥१५॥ दैवेनाप्रतिघातेन शुक्ले संस्थामुपेयुषी॥
रातो वोनुग्रहार्थाय विष्णुना प्रभविष्णुना॥१६॥

प्रश्रयान्वितं एष
ह्यस्मिन् १५

काले पुत्रे जाते व्यतीपाते दत्तं नवतिचात्ययमिति स्मृतेः। देवाश्च पितरश्चैव पुत्रे जाते द्विजन्मनां। आयांति हि नृपश्रेष्ठ पुण्य
हामिति चाब्रुवन्निति च॥१४॥ हे पौरवर्षभ कुरूणां कुरुवंश्यानां॥१५॥ शुक्ले शुद्धे अस्मिन् प्रजातंतौ। दैवेन कथंभूतेन अप्र
प्रतिघातेन दुर्वारेण संस्थां नाशं उपेयुषि सति। वोनुग्रहार्थाय॥ यस्मात्प्रभवनशीलेन विष्णुरातः। दत्तः॥१६॥ ॥श्री॥ ४३
ना

तस्माल्लोके विश्रुत इति नाम्ना भविष्यति। महाभागवतश्च गुणैश्च महान् भविष्यति। नात्र संदेह इति तं। राजानं ब्राह्मणा ऊचु
रिति त्रयाणामन्वयः॥१७॥ महाभागवतो भविष्यतीत्युक्ते स्पष्टः पृच्छति॥ अपिस्वित् किंस्वित्। साधुवादेन यशसा सत्कीर्त्या चा
नुवर्तिता भविष्यतीति पूर्वस्यैवातः। परमप्यनुषंगः॥१८॥ प्रजानामविता रक्षिकः। मानवः मनोः पुत्रः। ब्राह्मणेषु हितः सत्यप्रति

तस्मान्नाम्ना विष्णुरात इति लोके बृहच्छ्रवाः॥ भविष्यति न संदेहो महाभागवतो महान्॥१७॥ युधिष्ठिर उवाच॥ अप्ये
ष वंश्यान्राजर्षीन्पुण्यश्लोकान्महात्मनः॥ अनुवर्तिता स्विद्यशसा साधुवादेन सत्तमाः॥१८॥ ब्राह्मणा ऊचुः॥ पार्थ
५३ प्रजाविता साक्षा[illegible]दिक्ष्वाकुरिव मानवः॥ ब्रह्मण्यः सत्यसंधश्च रामो दाशरथिर्यथा॥१९॥ एष दाता शरण्यश्च यथा ह्यौ
शीनरः शिबिः॥ यशो वितनिता स्वानां दौष्यन्तिरिव यज्वनाम्॥२०॥ धन्विनामग्रणीरेष तुल्यश्चार्जुनयोर्द्वयोः॥ कृताश
इव दुर्धर्षः समुद्र इव दुस्तरः॥२१॥ मृगेंद्र इव विक्रान्तो निषेव्यो हिमवानिव॥ तितिक्षुर्वसुधेवासौ सहिष्णुः पितराविव
॥२२॥ पितामहसमः साम्ये प्रसादे गिरिशोपमः॥ आश्रयः सर्वभूतानां यथा देवो रमाश्रयः॥२३॥ ॥श्री॥ ॥

ब्रह्मण्यः श्रीरामो यथा॥१९॥ उशीनरदेशाधिपतिः शिबिः येन स्वमांसं श्येनाय दत्वा शरणागतः कपोतो रक्षितः। स्वानां ज्ञाता
नां यज्वनां च यशो विस्तारको दौष्यन्तिर्भरत इव॥२०॥ पार्थ कार्तवीर्ययोः॥२१॥ हिमवानिव निषेव्यः। अनन्यगतिकत्वेन व
सुधेव तितिक्षुः। हंता[illegible]त्या पितराविव हिष्णुः॥२२॥ पितामहो ब्रह्मा तेन समः साम्ये समत्वे रमाश्रयो हरिः॥२३॥ ॥

अर्जुनयोः

मतां

सर्वैः सद्गुणैर्महात्म्यं यत्तस्मिन् प्रीक्षमतुल्यः ॥२४॥ धन्वा धैर्येण सन्नद्धः गुहः अग्निर्निवेशो यस्य सः आहर्त्ता कर्त्ता ॥२५॥ राजर्षीणां ज
न्मेजयादीनां ॥२६॥ द्विजपुत्रेणेरितात्तक्षकात् आत्मनो मृत्युमुपश्रुत्य हरेः पदं अपत्स्यते न बिभ्यति ॥२७॥ ततश्च जिज्ञासितमात्मनो
त्र्यं यथार्थं येन सः ॥ इदं शरीरं गंगायां हित्वा अकुतोभयं पदं यास्यतीति ॥२८॥ लब्धा उपचितिः पूजा येन ॥२९॥ परीक्षिदिति नाम निर्वक्ति स

सर्वसद्गुणमाहात्म्य एष कृष्णमनुव्रतः ॥ रंतिदेव इवोदारो ययातिरिव धार्मिकः ॥२४॥ धृत्या बलिसमः कृष्णे प्रह्लाद इव सद्ग्रहः ॥ २
आहर्तैषोऽश्वमेधानां वृद्धानां पर्युपासकः ॥२५॥ राजर्षीणां जनयिता शास्ता चोत्पथगामिनां ॥ निग्रहीता कलेरेष भुवो धर्म
स्य कारणात् ॥२६॥ तक्षकादात्मनो मृत्युं द्विजपुत्रोपसर्जितात् ॥ अपत्स्यत उपश्रुत्य मुक्तसंगः पदं हरेः ॥२७॥ जिज्ञासि
तात्मयाथात्म्यो मुनेर्व्याससुतादसौ ॥ हित्वेदं नृप गंगायां यास्यत्यद्धाकुतोभयं ॥२८॥ इति राज्ञ उपादिश्य विप्रा जातककोविदाः
लब्धोपचितयः सर्वे प्रतिजग्मुः स्वकान् गृहान् ॥२९॥ स एष लोके विख्यातः परीक्षिदिति यत्प्रभुः ॥ गर्भे दृष्टमनुध्यायन् प
रीक्षेत नरेष्विह ॥३०॥ स राजपुत्रो ववृधे आशु शुक्ल इवोडुपः ॥ आपूर्यमाणः पितृभिः काष्ठाभिरिव सोन्वहं ॥३१॥ यक्ष्य
माणोऽश्वमेधेन ज्ञातिद्रोहजिहासया ॥ राजा लब्धधनो दध्यौ नान्यत्र करदंडयोः ॥३२॥

एवमिति यद्यस्मात् प्रभुः समर्थः सन् गर्भे दृष्टं पुरुषमनुध्यायन् दृश्यमानेषु नरेषु मध्ये सर्वमपि नरं परीक्षेत अयमसौ न वेति ॥ नो चेति विचार
यन् ततः परीक्षित इति विख्यातः पूर्वं दृष्टमिति वा पाठः ॥३०॥ शुक्ले शुक्लपक्षे सन् असि कृतः उडुपो न्वहं यथा काष्ठाभिः पंचदश कलाभिरापूर्यमाणो वर्द्धते ॥ ए
वं पितृभिर्युधिष्ठिरादिभिः कामैश्च तुःषष्टिकलाभिश्चापूर्यमाणो ववृधे ॥ पूर्वमापद्धर्मोक्तानश्वमेधान् स्मावसरे स्मप्रकारं कथयति ॥ ज्ञातिद्रोहस्य हा ४४
नेच्छया यक्ष्यमाणः करदंडयोरन्यत्रान्यं विना न लब्धधनः दध्यौ चिंतयामास ॥ करदंडधनस्य परिजनत्रणमात्रोपरीक्षणत्वात् ॥३२॥ ॥श्री॥ ॥श्री

तदभिप्रेतमालक्ष्यभ्रातरोच्युतचोदिता धनंप्रहीणमाजह्रुरुदीच्यांदिशिभूरिशः ३३

प्रहीणंमरुत्तस्ययज्ञेत्यक्तंसुवर्णपात्रादिकमानीतवंतः ॥३३॥ संभृतःसंभारःसंपादितयज्ञोपकरणैः भीतोज्ञातिद्रोहात् ॥३४॥ इतिप्रथमेद्वाद
शोध्यायः ॥१२॥ निर्गमोधृतराष्ट्रस्यविदुरोक्त्यात्रयोदशे ॥ उक्तः पौत्राभिषेकेणवक्तुंराज्ञोमहोदयं ॥१॥ इदानींपरीक्षितःकलिनिग्रहादिकर्मा
णिवक्तुंविघ्नन् ॥ विदुरागमनेधृतराष्ट्रप्रस्थानं ॥ ततोर्जुनागमनं ॥ ततःश्रीकृष्णांतर्धानंततःपांडवप्रस्थानंचनिरूपयतित्रिभिरध्यायैः ॥ गतिंहरिं भि
तयात्मगत्याप्रवासेविविदिषितंज्ञातुमिष्टंसर्वंयेन ॥२॥ तदेवाह ॥ यावतःकर्मयोगव्रतादिविषयान्प्रश्नान्प्रथमंकृतवान् ॥ कौषारवस्य

तेनसंभृतसंभारोलब्धकामोयुधिष्ठिरः ॥ वाजिमेधैस्त्रिभिर्भीतोयज्ञैःसमयजद्धरिं ॥३४॥ इतिश्रीभागवतेमहापुराणेपरीक्षिज्जन्मा
द्युत्कर्षंनामद्वादशोध्यायः ॥१२॥ सूतउवाच ॥ विदुरस्तीर्थयात्रायांमैत्रेयादात्मनोगतिं ॥ ज्ञात्वागाद्धास्तिनपुरंतयावाप्तविवित्सि
तः ॥१॥ यावतःकृतवान्प्रश्नान्क्षत्ताकौषारवाग्रतः ॥ जातैकभक्तिर्गोविंदेतेभ्यश्चोपररामह ॥२॥ तंबंधुमागतंदृष्ट्वाधर्मपुत्रःस
हानुजः ॥ धृतराष्ट्रोयुयुत्सुश्चसूतःशारद्वतःपृथा ॥३॥ गांधारीद्रौपदीब्रह्मन्सुभद्राचोत्तराकृपी ॥ अन्याश्चजामयःपांडोर्ज्ञातयः
ससुताःस्त्रियः ॥४॥ प्रत्युज्जग्मुःप्रहर्षेणप्राणंतन्वइवागतं ॥ अभिसंगम्यविधिवत्परिष्वंगाभिवादनैः ॥५॥ मुमुचुःप्रेमबाष्पौघंवि
रहौत्कंठ्यकातराः ॥ राजातमर्हयांचक्रेकृतासनपरिग्रहं ॥६॥ तंभुक्तवंतमासीनंविश्रांतंसुखमासने ॥ प्रश्रयावनतोराजाप्राहतेषांचशृ
ण्वतां ॥७॥

मैत्रेयस्यपुरस्थात्पश्चात्त्रिचतुरप्रश्नार्थज्ञानमात्रेणगोविंदेजातैकांतभक्तिःकृतार्थःसन् ॥ तेभ्यःउपररामततःपरंनविजिज्ञासितवान् ॥२॥
सूतःसंजयःशारद्वतःकृपः ॥३॥ कृपीद्रोणपत्नी ॥ जामयोज्ञातिभार्याः अन्याश्चस्त्रियः ॥४॥ प्राणंतन्वइवइतिकुतश्चिन्मूर्छादिदोषतःप्राणे
सत्येसतितन्वःकरचरणादयोनिश्चेष्टाभवंति ॥ पुनस्तस्मिन्नाविर्भूतेयथोत्तिष्ठंतितद्वत् ॥५॥ विरहेणयदौत्कंठ्यंतेनकातराःविवशाः ॥६॥

भा॰प्र॰ पक्षिणो स्वपक्षाणि। यथाति स्नेहेन। पक्षच्छायया वर्द्धयंति तद्वत्। युष्मत्पक्षपातच्छायया समेधितान् नः अस्मान् किं स्मरथ। समेधितत्व
४५ मेवाह। विपद्गणात्। यस्मात्मोचिताः स्म॥८॥ वो युष्माभिः कया वृत्त्या वर्तितं देहवृत्तिः कृता। कानि च तीर्थादीनि सेवितानीति॥९॥
भवतां च तीर्थाटनं न स्वार्थं किंतु तीर्थानुग्रहार्थमित्याह। भवद्विधेति॥ मलिनजनसंपर्केण तीर्थानि मलिनानि संति संतः पुनः स्व

युधिष्ठिर उवाच॥ अपि स्मरथ नो युष्मत्पक्षच्छायासमेधितान्॥ विपद्गणाद्विषाग्न्यादेर्मोचिता यत्समातृकाः॥८॥ कया वृ
त्त्या वर्तितं वश्चरद्भिः क्षितिमंडलं॥ तीर्थानि क्षेत्रमुख्यानि सेवितानीह भूतले॥९॥ भवद्विधा भागवतास्तीर्थभूताः स्वयं वि
भो॥ तीर्थीकुर्वंति तीर्थानि स्वांतस्थेन गदाभृता॥१०॥ अपि नः सुहृदस्तात बांधवाः कृष्णदेवताः॥ दृष्टाः श्रुता वा यदवः स्व
पुर्यां सुखमासते॥११॥ इत्युक्तो धर्मराजेन सर्वं तत्समवर्णयत्॥ यथानुभूतं क्रमशो विना यदुकुलक्षयं॥१२॥ नन्वप्रियं दु
र्विषहं नृणां स्वयमुपस्थितं॥ नावेदयत्सकरुणो दुःखितान्द्रष्टुमक्षमः॥१३॥ किंचित्कालमथावात्सीत्सत्कृतो देवव
त्सुखं॥ भ्रातुर्ज्येष्ठस्य श्रेयस्कृत्सर्वेषां प्रीतिमावहन्॥१४॥

यं तीर्थीकुर्वंति स्वांतं मनः। तत्रस्थेन स्वस्यांतस्थितेनेति वा॥१०॥ अपि किं सुखमासते भवद्भिः क्वापि दृष्टाः श्रुता वा॥११॥१२॥ यदु
कुलक्षयावर्णने कारणमाह। नन्विति॥१३॥ श्रेयस्कृत् तत्त्वमुपादिशत्॥१४॥ ननु शूद्रोऽसौ कथमुपदिशेत् न ह्यसौ शूद्रः किंतु यमस्त
विदुर् द्रूपेणैव किं तत्र कारणं॥ यमे चात्रागते अर्यमा को वा दंडधर इत्यपेक्षायामाह॥ ॥श्री॥ ॥श्रीकृष्णायनमः॥ ॥श्री॥ ॥ ४५

अविक्रूरितिधनवानित्यर्थः। मांडव्यशापात्। क्वचिच्चौरानतुधावंतोराजनरामांडव्यस्यऋषेस्तपश्चरतःसमीपेतान्संप्राप्यतेनसहितैर्व
धानीयराज्ञेनिवेदयतराज्ञयासर्वान्शूलमारोपयामासुः। ततोराज्ञातमृषिंतमृषिंज्ञात्वाशूलादवतार्यप्रसादयामास। ततोमुनिर्यमं
गत्वाकुपितउवाच। कस्मादहंशूलमारोपितइतितेनोक्तंत्वंबाल्येशलभंकुशाग्रेणविद्धवानिति। तच्छ्रुत्वामांडव्यस्तं
शशाप। बाल्येअजानतोमेमहांतंदंडंयतस्त्वंकारितवानतःशूद्रोभवेति॥१५॥ इदानींराज्यापकर्षणिरूपयितुंकृष्णनिर्गमयति। यु सु

८ अबिभ्रदर्यमादंडंयथावदघकारिषु॥ यावद्दधारशूद्रत्वंशापाद्वर्षशतंयमः॥१५॥ युधिष्ठिरोलब्धराज्योदृष्ट्वापौत्रंकु
लंधरं॥ भ्रातृभिर्लोकपालाभैर्मुमुदेपरयाश्रिया॥१६॥ एवंगृहेषुशक्तानांप्रमत्तानांतदीहया॥ अतिक्रामदविज्ञा
तःकालःपरमदुस्तरः॥१७॥ विदुरस्तदभिप्रेत्यधृतराष्ट्रमभाषत॥ राजन्निर्गम्यतांशीघ्रंपश्येदंभयमागतं॥१८॥ प्रति श्री
क्रियानयस्येहकुतश्चित्कर्हिचित्प्रभो॥ सएषभगवान्कालःसर्वेषांनःसमागतः॥१९॥ येनचैवाभिपन्नोयंप्रा
णैःप्रियतमैरपि॥ जनःसद्योवियुज्येतकिमुतान्यैर्धनादिभिः॥२०॥ पितृभ्रातृसुहृत्पुत्राहतास्तेविगतंवयः॥
आत्माचजरयाग्रस्तःपरगेहमुपाससे॥२१॥ अहोमहीयसीजंतोर्जीवितशायथाभवान्॥ भीमेनावर्जितंपिंडमादत्तेगृ

धिपिरइति। कुलंधरंवंशधरं॥१६॥ तदीहयागृहव्यापारेणप्रमत्तानां॥ अतिक्रामत्॥ आयुःकालोतिक्रांतः। यद्वातानतिक्रामत्तानन्य
नवदित्यर्थः॥१७॥ अभिप्रेत्यज्ञात्वा॥१८॥ तस्यप्रतीकारःक्रियतांकिंनिर्गमनेनतत्राह। प्रतिक्रियेति। सर्वेषामितियेःप्रतिकर्त्तव्यंतेषा
मपीत्यर्थः॥१९॥ कथंधनादिवियोगःसोढुंशक्योऽतआह। येनचेति। अभिपन्नोग्रस्तः॥२०॥ अत्रावस्थानमतिदैन्यमितिदर्शयन्नाद्वैराग्यमु
त्पादयति। पितृभ्रात्रइतिसप्तभिः॥ आत्माचदेहः॥२१॥ येनपुत्राहतास्तेनभीमेनदत्तंपिंडंगृहपालइहपालःश्वा॥२२॥ श्री॥

ना॰प्र॰ निसृष्टः अग्नि सः गरो विषं दत्तं दूषिता अवमताः तद्दत्तैः रत्नादिभिर्लब्धैरसुभिः । कियत्प्रयोजनं न किंचिदित्यर्थः ॥२३॥ तस्यापि एव
देहोयं अनुनवतोपि परैति क्षीयते ॥२४॥ गतस्वार्थं यशोधर्मादिशून्यं मुक्तबंधनः त्यक्ताभिमानः । क्व गत इत्यविज्ञाता गतिर्यस्य सः ॥
धीरः आह दुःखस्य स्वयं प्राप्तस्य दृष्टेन मुक्तिः प्राप्ते ॥२५॥ नरोत्तमस्त्वतः प्रागेव कृततीकारः स्वकात् स्वत एव परतः परोपदेशतो वा
॥२६॥ त्वं तु नरोत्तमो नासि नः अत इदानीं धीरो भवेत्याह । अथेति । अर्वाक् अर्वाचीनः एष्यन्नित्यर्थः । गुणान् धैर्यादीन् विकर्षति क

अग्निर्निसृष्टो दत्तश्च गरो दाराश्च दूषिताः ॥ हृतं क्षेत्रं धनं येषां तद्दत्तैरसुभिः कियत् ॥२३॥ तस्यापि तव देहोयं कृपणस्य
जिजीविषोः ॥ परैत्यनिच्छतो जीर्णो जरया वाससी इव ॥२४॥ गतस्वार्थमिमं देहं विरक्तो मुक्तबंधनः ॥ अविज्ञातगतिर्जह्या
त्स वै धीर उदाहृतः ॥२५॥ यः स्वकात्परतो वेह जातनिर्वेद आत्मवान् ॥ हृदि कृत्वा हरिं गेहात्प्रव्रजेत्स नरोत्तमः ॥२६॥ अ
थोदीचीं दिशं यातु स्वैरज्ञातगतिर्भवान् ॥ इतोर्वाक् प्रायशः कालः पुंसां गुणविकर्षणः ॥२७॥ एवं स राजा विदुरेणानुजे
स्वेषु न प्रज्ञाचक्षुर्बोधित आजमीढः ॥ छित्वा स्नेहपाशान्द्रढिम्नो निश्चक्राम भ्रातृसंदर्शिताध्वा ॥२८॥ पतिं प्रयांतं सुबल
स्य पुत्री पतिव्रता चानुजगाम साध्वी ॥ हिमालयं न्यस्तदंडप्रहर्षं मनस्विनामिव सत्संप्रहारः ॥२९॥ ॥श्री॥ ॥श्री॥

आछिनत्तीति तथा ॥२७॥ आजमीढः अजमीढवंशजः । प्रज्ञाचक्षुः अंधः । एवं बोधितः सन् द्रढिम्नः चित्तदार्ढ्यात् । अधावनमोक्षयो मा
र्गो यस्य सः ॥२८॥ सुबलस्य पुत्री गांधारी साध्वी सुशीला हिमालयं प्रयांतं पतिमनुजगाम । कथं सा सुकुमारी हिमादिदुःखबाहुलं हिमवंतं ग
ता अत आह न्यस्तदंडानां प्रहर्षो यस्मिन् तं । दुःखेदमपि केषांचित्प्रहर्षहेतुर्भवतीत्यत्र दृष्टांतः । मनस्विनां शूराणां युद्धे सन्नतीव्रः प्रहा ४६
रो यथा । पाठांतरे सत्संप्रहारं युद्धे यथेति ॥२९॥

कृतं मैत्रं मित्रैर्देवत्वं संधावं दर्नयेन ना नत्वा संपृक्ष्य. पितरौ धृतराष्ट्रे ॥३०॥ हे गावल्गणे गावल्गणस्य पुत्र संजय अकृतप्रज्ञे मंदस्म
तौ शमलं पापं अपराधं आशंकमानः भार्यया सह ॥३२॥ यो अरक्षतां तौ इतः स्याताम् ॥३३॥ कृपया स्नेहेन वैक्लव्यान्मातिपीडितः
आत्मेश्वरं धृतराष्ट्रं अपश्यन् विरहकर्षितः अस्वस्थः संजयः न प्रत्युत्तरमाह ॥३४॥ आत्मना बुद्ध्या आत्मानं मनो विष्टभ्य धैर्येण

अजातशत्रुः कृतमैत्रो हुताग्निर्विप्रान्नत्वा तिलगोहेमरुक्मैः ॥ गृहं प्रविष्टो गुरुवंदनाय न चापश्यत्पितरौ सौबलीं च ॥३०॥
तत्र संजयमासीनं पप्रच्छोद्विग्नमानसः ॥ गावल्गणे क्व नस्तातो वृद्धो हीनश्च नेत्रयोः ॥३१॥ अंबा च हतपुत्रार्ता पितृव्यः क्व ग
तः सुहृत् ॥ अपि मय्यकृतप्रज्ञे हतबंधुः स भार्यया ॥३२॥ आशंसमानः शमलं गंगायां दुःखितोपतत् ॥३२॥ पितर्युपरते
पांडौ सर्वान्नः सुहृदः शिशून् ॥ अरक्षतां व्यसनतः पितृव्यौ क्व गतावितः ॥३३॥ सूत उवाच ॥ कृपया स्नेहवैक्लव्यात्सूतो वि
रहकर्षितः ॥ आत्मेश्वरमचक्षाणो न प्रत्याहातिपीडितः ॥३४॥ विमृज्याश्रूणि पाणिभ्यां विष्टभ्यात्मानमात्मना ॥ अजातश
त्रुं प्रत्यूचे प्रभोः पादावनुस्मरन् ॥३५॥ संजय उवाच ॥ नाहं वेद व्यवसितं पित्रोर्वः कुलनंदन ॥ गांधार्या वा महाबाहो मुषितो ६
स्मि महात्मभिः ॥३६॥ अथाजगाम भगवान्नारदः सहतुंबुरुः ॥ प्रत्युत्थायाभिवाद्याह सानुजोभ्यर्चयन्निव ॥३७॥ यु
धिष्ठिर उवाच ॥ नाहं वेद गतिं पित्रोर्भगवन्क्व गतावितः ॥ अंबा वा हतपुत्रार्ता क्व गता च तपस्विनी ॥३८॥ ॥ ॥

कं कृत्वा ॥ अत्रो धृतराष्ट्रस्य गांधार्याश्च ॥३५॥ व्यवसितं निश्चयं यतो मुषितः वंचितोस्मि ॥३६॥ एवं कंचित्कालं शोचति तस्मिन्नथ
नारद आजगाम ॥ अत्रास्ति कश्चित्कुतूहलके पामंतरं तदुक्तं ध्ययथा संप्रदायं व्याख्यायते शोकवेगास्य चं यन्निवारयाह राजानं त्वस्य
चेयतः ॥३७॥ तपस्विनी दुःखसमुक्ता ॥३८॥ शोकाक्रांत कृपाविष्टः अद्यापरहितः सुमान् गुरुस्वद्विजातीनां पूजनं न समाचरेदिति स्मृते ।

ना॰प्र॰ अपारे शोकार्णवे भगवान् त्वमेव पारदर्शकः। अतो ब्रूहीति शेषः॥३९॥ अरा वेव यथा वृत्तकथने शोकेन मूर्छितः। यतेरिति अथ
४७ मंतावच्छोकमुपशामयति। कंचन मा शुचः मा शोच न केवलं त्वानेव यद्यस्मादीश्वराधीनं जगत्। तदेवाह। लोका इति॥४०॥ पूर्व
वोपार्जितं अमुक्ता संयोगयोरप्याह। यथेति क्रीडोपस्कराणां क्रीडासाधनानां॥४२॥ ईश्वराधीनत्वान्न शोकः कार्य इत्युक्तं लोक
तत्वेनविचार्यमाणे निर्विषयोऽयं शोक इत्याह॥ यद्यदि लोकं जनं ध्रुवं जीवरूपेण। अध्रुवं देहरूपेण। न चेति न ध्रुवं

कर्णधारमिवापारे भगवान्पारदर्शकः॥ अथाबभगवान्नाह नारदो मुनिसत्तमः॥३९॥ मा कंचन शुचो राजन् यदीश्वर
वशं जगत्। लोकाः सपाला यस्येमे वहंति बलिमीशितुः॥४०॥ स संयुनक्ति भूतानि स एव वियुनक्ति च॥ यथा गावो नसि
प्रोतास्तंत्यां बद्धाः स्वदामभिः॥४१॥ वाक्तंत्यां नामभिर्बद्धा वहंति बलिमीशितुः॥ यथा क्रीडोपस्कराणां संयोगविगमा ग
माविह। इच्छया क्रीडितुः स्यातां तथैवेशेच्छया नृणां॥४२॥ यन्मन्यसे ध्रुवं लोकमध्रुवं वा न चोभयं॥ सर्वथा हि न सोच्या
स्ते स्नेहादन्यत्र मोहजात्॥४३॥ तस्माज्जह्यंग वैक्लव्यमज्ञानकृतमात्मनः। कथं त्वनाथाः कृपणा वर्त्तेरन् त्वन मामाश्रिताः।
४४॥ कालकर्मगुणाधीनो देहोयं पांचभौतिकः॥ कथमन्यांस्तु गोपायेत्सर्पग्रस्तो यथापरं॥४४॥ ॥श्री॥ ॥

नाप्यध्रुवं शुद्धब्रह्मरूपेण अनिर्वचनीयत्वेन वा। उभयं वा चिज्जडांशात्। सर्वथा चतुर्ष्वपि पक्षेषु ते पित्रादयो न शोच्याः स्नेहादन्यत्र
स्नेह एव केवलं शोकहेतुः स चाज्ञानमूल इत्यर्थः॥४३॥ तस्मात्त्वां विना कथं ते वर्त्तेरन्निति मनसो वैक्लव्यं च व्याकुलतां त्यज॥४४॥ तत्र
त्वद्देहतस्तेषां वृत्तिरित्येतत्तावन्नास्तीत्याह॥ कालो गुणक्षोभकः कर्म जन्मनिमित्तं गुणा उपादानं तदधीनः पांचभौतिकः जडः तद्विना ४७
गेनाशवांश्च सर्पग्रस्तः अजगरगिलितः॥ यथा अन्यं न रक्षति तद्वत्॥४४॥

ईश्वरेण विहिता वृत्तिश्च सर्वतः सुलभैवेत्याह । अहस्तानि पश्वादीनि तत्र तेषु अहस्तादिष्वपि फल्गूनि अल्पानि । एवं जीवः सर्वोपि
सर्वस्य सर्वं जीवनं जीविका । एतेनैव सर्वतो मृत्युपाशकत्वं चोक्तं ॥४५॥ मोहनिवृत्त्यर्थं द्वैतस्यावस्तुत्वमाह । तदिदं अहस्तसह
स्तादिरूपं जगता स्वदृग् भगवानेव न ततः पृथक् स च एक एव न तु नाना । ननु सजातीयविजातीयभेदे प्रत्यक्षे कुत एतत्तत्राह ॥
न आत्मानां भोक्तृणां आत्मा स्वरूपं अतो न सजातीयभेदः । अंतरोऽनंतरश्च अंतर्बहिश्च भोग्यरूपश्च भाति । अतो न विजातीयभेदोपि

अहस्तानि सहस्तानामपदानि चतुःपदां । फल्गूनि तत्र महतां जीवो जीवस्य जीवनं ॥४५॥ तदिदं भगवान्राजन्नेक आत्मा
त्मनां स्वदृक् । अंतरोनंतरो भाति पश्य तं माययोरुधा ॥४६॥ सोय[illegible]मद्य महाराज भगवान्भूतभावनः । कालरूपोव
तीर्णोस्यामभावाय सुरद्विषां ॥४७॥ निष्पादितं देवकृत्यमवशेषं प्रतीक्षते । तावद्यूयमवेक्षध्वं भवेद्यावदिहेश्वरः ॥४
८॥ धृतराष्ट्रः सह भ्रात्रा गांधारी च स्वभार्यया । दक्षिणेन हिमवत ऋषीणामाश्रमं गतः ॥४९॥ स्रोतोभिः सप्तभिर्या वै स्वर्धुनी
सप्तधा व्यधात् । सप्तानां प्रीतये नाना सप्तस्रोतः प्रचक्षते ॥५०॥ स्नात्वानुसवनं तस्मिन्हुत्वा चाग्नीन्यथाविधि । अब्भक्ष उप
शांतात्मा स आस्ते विगतैषणः ॥५१॥ जितासनो जितश्वासः प्रत्याहृतषडिंद्रियः । हरिभावनया ध्वस्तरजःसत्वतमोमलः ॥५२॥

एकः कथं तथा प्रतीयते अत आह । मायया तं बहुधा पश्येति ॥४६॥ कासावस्था (से) दृश्यो महामायावीक्षरकायामित्याह । सोयमिति । अस्यां भूमौ अभावाय नाशाय ॥
४७॥ तर्हि श्रीकृष्णोऽत्रास्तीत्यत्रैवास्थां मा कृथा इत्याह । तच्च देवानां कार्यं तेन निष्पादितं केवलमवशेषं प्रतीक्षते । यदुकुलमिति हृदिस्थं ततो निजं धाम
यास्यति । ततो यूयमपि गच्छतेत्यर्थः । तच्च श्रुतमपि दुःखात् विदुरेण वेदनावर्णयत् ॥४८॥ तदेवं शोकमास्थां च निवार्य जिज्ञासवे तस्मै यथावृत्तं कथ
यति धृतराष्ट्र इति षड्भिः ॥ हिमवतो दक्षिणभागे ॥४९॥ या वै प्रसिद्धा स्वर्धुनी सा आत्मानं यत्र सप्तधा व्यधात् । किमर्थं । नाना पृथक् सप्तभिः सप्ताना
मृषीणां प्रीतये । अत एव तत्तीर्थं सप्तस्रोतो वदंति ॥५०॥ तेन कृतं अष्टांगयोगमाह । तत्र स्नानं होमोऽब्भक्षणं च नियमा उक्ताः । उपशांतस्यानेन अयांस्वीका
रस्त्रत्यः । उपशांत आत्मा यस्य । विगताः पुत्राद्येषणा यस्मादिति यमा उक्ताः ॥५१॥ जितासन इत्यादिना । आसनप्राणायामप्रत्याहारा उक्ताः । हरिभा

भा

भा०प्र०
४८ तै

समाधिमाह। विज्ञानेति द्वाभ्यां। आत्मानमहंकारास्पदं स्थूलदेहादियोग्यं विज्ञानात्मनि बुद्धौ संयोज्य एकीकृत्य तं विज्ञानात्मानं दृश्यरूपं साक्षियोग्य
क्षेत्रज्ञे द्रष्टरि प्रविलाप्य तं च क्षेत्रज्ञं द्रष्टृंशादियोग्यं आधारे आश्रयसंज्ञे ब्रह्मणि। प्रविलाप्य घटांबरं घटोपाधेर्वियोज्य यथा महाकाशे प्र
विलाप्यते तद्वत्॥५३॥ व्युत्थानाभावमाह ध्वस्तेति। अंतर्गुणक्षोभाभावं बहिरिंद्रियविक्षेपाभावं व्युत्थानं न वेत्ता तद्व्यतिरेकं ~ तस्य नास्ति यतः
ध्वस्तो मायायाः गुणानामुदर्कः उत्तरफलं वासना यस्य निरुद्धानि करणानि चक्षुरादीनि आशयो मनश्च यस्य। अत एव निवर्तितः
खिल आहारो भोग्यं इंद्रियैर्विषयाहरणं व्यापारो येन सः स्थाणुरिव निश्चलः आस्ते॥५४॥ तथाभूतमप्यानेतुं उद्यतं प्रत्याह॥ तस्येति। अंत

विज्ञानात्मनि संयोज्य क्षेत्रज्ञे प्रविलाप्य तं॥ ब्रह्मण्यात्मानमाधारे घटांबरमिवांबरे॥५३॥ ध्वस्तमायागुणोदर्को निरुद्धकरणा
शयः॥ निवर्तिताखिलाहार आस्ते स्थाणुरिवाचलः॥५४॥ तस्यांतरायो मैवाभूः संन्यस्ताखिलकर्मणः॥ स वा अद्यतनाद्रा
जन्परतः पंचमेऽहनि॥५५॥ कलेवरं हास्यति स्वं तच्च भस्मीभविष्यति॥ दह्यमानेऽग्निभिर्देहे पत्युः पत्नी सहोटजे॥५६॥ बहि
स्थिता पतिं साध्वी तमग्निमनुवेक्ष्यति॥५७॥ विदुरस्तु तदाश्चर्यं निशाम्य कुरुनंदन॥ हर्षशोकयुतस्तस्माद्गंता तीर्थनिषेवकः
॥५८॥ इत्युक्त्वाथारुहत्स्वर्गं नारदः सहतुंबुरुः॥ युधिष्ठिरो वचस्तस्य हृदि कृत्वाजहाच्छुचः॥५९॥ इति श्रीभागवते महापुराणे
प्रथमस्कंधे त्रयोदशोऽध्यायः॥१३॥

रायो विघ्नः मैवाभूरित्यध्याहारः। छांदसः। दर्शनमपि तावत्कुर्यामित्युद्यतं प्रत्याह। स वै अद्यतनाद्दक्षः स्वं स्वाधीनं। तर्हि तद्दाहार्थं गमिष्यामि
इत्याह तच्चेति॥५५॥ तर्हि गांधारीं तु पुनरानयामि इत्याह। पत्युर्देहे सहोटजे पर्णशालासहिते योगाग्निना सह गार्हपत्यादिभिर्दह्य
माने तस्य पत्नी बहिः स्थिता सती तं पतिमनु अग्निं प्रवेक्ष्यति॥५७॥ तर्हि विदुरानयनार्थं गंतव्यमेवेत्याह। विदुरस्तु तन्निशाम्य हर्षश्चा
तुः सुगत्या हर्षः तन्मृत्युना शोकश्च ताभ्यां युक्तः तस्मात्स्थानात्तीर्थानि सेवितुं गंता गमिष्यति॥५८ शुचः शोकान्॥५९॥ प्रथमे त्रयोदशः
१३॥ ४८

चतुर्दशे त्वरिष्टानि दृष्ट्वा राजा विशंकितः। अभ्रगणोर्जुनात कृष्णतिरोधानमितीर्यते॥१॥ श्रीकृष्णस्येति चकारेण निर्णायं च ज्ञा
तुं। कतिचित्सप्त तदा केलातिक्रमेपि ततः द्वारकायाः नायात् नागतः॥२॥ निमित्तानि उत्पातान् कुरुद्वहो युधिष्ठिरः
रौद्रं घोरां ततः एवाह विपर्यस्ता ऋतुधर्मा यस्मिन्। तस्य वार्त्तां जीविकां। क्रोधलोभानृतैर्युक्त आत्मा येषां॥३॥ जिह्मप्रायं कपटबहुलं व्यवह।

सूत उवाच॥ संप्रस्थिते द्वारकायां जिष्णौ बंधुदिदृक्षया॥ ज्ञातुं च पुण्यश्लोकस्य कृष्णस्य च विचेष्टितं॥१॥ व्यतीताः कतिचि
न्मासास्तदा नायात्ततोर्जुनः॥ ददर्श घोररूपाणि निमित्तानि कुरूद्वहः॥२॥ कालस्य च गतिं रौद्रां विपर्यस्तर्तुधर्मिणः॥ पापी
यसीं नृणां वार्त्तां क्रोधलोभानृतात्मनां॥३॥ जिह्मप्रायं व्यवहृतं शाठ्यमिश्रं च सौहृदं॥ पितृमातृसुहृद्भ्रातृदंपतीनां च
कल्कनं॥४॥ निमित्तान्यत्यरिष्टानि काले त्वनुगते नृणां॥ लोभाद्यधर्मप्रकृतिं दृष्ट्वोवाचानुजं नृपः॥५॥ युधिष्ठिर उवाच
संप्रेषितो द्वारकायां जिष्णुर्बंधुदिदृक्षया॥ ज्ञातुं च पुण्यश्लोकस्य कृष्णस्य च विचेष्टितं॥६॥ गताः सप्ताधुना मासा भीमसे म३
न तवानुजः॥ नायाति कस्य वा हेतोर्नाहं वेदेदमंजसा॥७॥ अपि देवर्षिणादिष्टः स कालोयमुपस्थितः॥ यदात्मनोंगमाक्री
डं भगवानुत्सिसृक्षति॥८॥ यस्मान्नः संपदो राज्यं दाराः प्राणाः कुलं प्रजाः॥ आसन्सपत्नविजयो लोकाश्च यदनुग्रहात्॥९॥

रं शाठ्यं वंचनं तन्मिश्रं सौहृदं सख्यं। पित्रादीनां स्वहाति योगिनिः कल्कनं कलहादि॥४॥ अत्यरिष्टानि अत्यंतमशुभानि दृष्ट्वा नृणां
प्र लोभाद्यधर्मप्रकृतिं च दृष्ट्वा अनुजं भीमं॥५॥ वेत्ति किं तत्किं कस्माद्धेतोर्नायातीत्यहं न वेद्मि॥६॥ अपि किं यदा आत्मनः आक्रीडं क्रीडा
स्थानं अंगं मनुष्यनाट्यं उत्स्रष्टुमिच्छति स कालः प्राप्तः॥८॥ अस्माकं सर्वपुरुषार्थहेतुः श्रीकृष्णः अतस्तद्वियोगं विनाऽनिष्टं तस्मादित्या
शयेनाह। यस्मात् श्रीकृष्णाद्धेतोः। एतच्चोपरिष्टादर्जुनः स्पष्टीकरिष्यति। लोकाश्च यज्ञकरणरूपा यस्यानुग्रहात्॥९॥ ॥श्री॥

ना० प्र० ९८

अद्भुतानां निहितं नोस्माकमाशंसतः। उत्पातान्॥१७॥ दैहिकानाह कुर्विति। कुर्वीदयो वामाः स्फुरंति वेपथुः कंपश्च हृदये वर्तंते। एते मयं

आरात्तं निहितं विप्रियं शंसंति॥१८॥ भौमानाह। सार्धैस्त्रिभिः। शिवा क्रोष्टुः। आदित्यमभि रौति। उद्यत्सूर्याभिमुखं क्रोशति। अनलानना।

ना। अग्निमुखेन वमंती। अंग हे भीम। मामभि लक्ष्य सारमेयः श्वा अभीतं रौति भाषति। अभीरुवत् निःशंकं॥११॥ शस्ता गवादयो मां शव्यं

वामं कुर्वंति। वाहा नश्रुश्चान्॥१२॥ अयं कपोतोमृत्युदूतश्च कः। तत्प्रतिपक्षोलूकः। काकुवाकु ध्वनेः। कुत्सितशब्दैर्विश्वं शून्यमिच्छतः॥

पक्षोत्पातान्नरव्याघ्र दिव्यान् भौमान् सदैहिकान्। दारुणान् शंसतोदूरात् भयं नो बुद्धिमोहनं॥१७॥ ऊर्वक्षिबाहवो मह्यं स्फु

रंत्यंग पुनः पुनः। वेपथुश्चापि हृदये आरात् दास्यंति विप्रियं॥१८॥ शिवैषोद्यंतमादित्यमभिरौत्यनलानना॥ मामंग सारमेयो

भिरौति घनीरुवत्॥११॥ शस्ताः कुर्वंति मां शव्यं दक्षिणं पशवोपरे। वाहांश्च पुरुषव्याघ्र लक्षये रुदतो मम॥१२॥ मृत्यु

दूतः कपोतोयमुलूकः कंपयन्मनः। प्रत्युलूकश्च कुह्वानैरनिद्रौ शून्यमिच्छतः॥१३॥ धूम्रा दिशः परिधयः कंपते भूः सहा

द्रिभिः। निर्घातश्च महांस्तात साकं च स्तनयित्नुभिः॥१४॥ वायुर्वाति खरस्पर्शो रजसा विसृजंस्तमः। असृग्वर्षंति जल

दा बीभत्समिव सर्वतः॥१५॥ सूर्यं हतप्रभं पश्य ग्रहमर्दं मिथो दिवि॥ ससंकुलैर्भूतगणैर्ज्वलिते इव रोदसी॥१६॥ नद्यो

नदाश्च क्षुभिताः सरांसि च मनांसि च। न ज्वलत्यग्निराज्येन कालोयं किं विधास्यति॥१७॥ न पिबंति स्तनं वत्सा न दुह्यंति मा

धूम्रा इति। धूम्रा दिशः। स्तनयित्नवो गर्जितानि तैः सह। इमान् लोकानाह एवं वर्तेति॥१४॥ दिव्यानाह। सार्धैर्भ्यां। निर्घातो निरभ्रवज्रपातः। स्तनयित्नवो गर्जितानि तैः सह तमः विशेषेण सृजन्॥१५॥ असृग्वर्षंति। ग्रहमर्दं युद्धं भूताः रुद्रानुचराः। तेषां गणैः। संकुलैः व्याप्तैः। अग्नि

भिः सहितैः रोदसी द्यावापृथिव्यौ ज्वलिते दीप्ते इव पश्य इति॥१६॥ पुनर्भौमानाह। नद्य इति सार्धैस्त्रिभिः। आज्येन अग्निर्न ज्वलति॥१७॥ दुह्यंतीति क

र्तर्यार्षं न प्रस्नुवंतीत्यर्थः॥१८॥ ९८

मना

दैवतानि प्रतिमाः अघं दुःखं १८॥ एतैः फलान्नविद्यते अन्येषु पुरुषेषु श्रीर्ध्वजांकुशादिशोभा येषां तैः भगवतः पदैर्हीना भूरित्यहं मन्ये
१९॥ तस्य राज्ञः इत्येवं दृष्टान्यरिष्टानि येन चेतसा॥ चिंतयतः सतः॥२०॥ अयथापूर्वं निपतितं तदेवाह॥ आतुरमित्यादि॥ अब्बिंदून्
८ अश्रूणि नेत्राभ्यां विसृजंतमित्यर्थः॥२१॥ उद्विग्नं कंपितं हृदयं यस्य॥ विछायं विगतकांति॥२२॥ स्वजना बांधवाः॥२३॥ किं

दैवतानि रुदंतीव स्विद्यंति ह्युच्चलंति च॥ इमे जनपदा ग्रामाः पुरोद्यानाकराश्रमाः॥१८॥ भ्रष्टश्रियो निरानंदाः
किमघं दर्शयंति नः॥ मन्य एतैर्महोत्पातैर्नूनं भगवतः पदैः॥ अनन्यपुरुषश्रीभिर्हीना भूर्हतसौभगा॥१९॥ इति चिं
तयतस्तस्य दृष्टारिष्टेन चेतसा॥ राज्ञः प्रत्यागमद्ब्रह्मन्यदुपुर्याः कपिध्वजः॥२०॥ तं पादयोर्निपतितमयथापूर्वमा
तुरं॥ अधोवदनमब्बिंदून्सृजंतं नयनाब्जयोः॥२१॥ विलोक्योद्विग्नहृदयो विछायमनुजं नृपः॥ पृच्छति स्म सुहृन्मध्ये
संस्मरन्नारदेरितं॥२२॥ युधिष्ठिर उवाच॥ कच्चिदानर्तपुर्यां नः स्वजनाः सुखमासते॥ मधुभोजदशार्हार्हसात्वतांधक
वृष्णयः॥२३॥ शूरो मातामहः कच्चित्स्वस्त्यास्ते वाथ मारिषः॥ मातुलः सानुजः कच्चित्कुशल्यानकदुंदुभिः॥२४॥ सप्त
स्वसारस्तत्पत्न्यो मातुलान्यः सहात्मजाः॥ आसते सस्नुषाः क्षेमं देवकीप्रमुखाः स्वयं॥२५॥ कच्चिद्राजाहुको जीवत्यसत्पु
त्रोऽस्य चानुजः॥ हृदीकः ससुतोऽक्रूरो जयंतगदसारणाः॥२६॥ आसते कुशलं कच्चिद्ये च शत्रुजिदादयः॥ कच्चिदास्ते
सुखं रामो भगवान्सात्वतां पतिः॥२७॥

वक्ष्यतीशं कथाव्यवहितक्रमेण पृच्छति शूर इत्यादिना॥ मारिषः मान्यः मातामहः॥ आनकदुंदुभिर्वसुदेवः॥२४॥ स्वसारः परस्परं वसुदेवपत्न्य इमेन
तासामपि पत्न्य इमं पृष्टमेव तथापि पृथक्पृथक्पृच्छति स्वयमिति॥२५॥ आहुकः उग्रसेनः॥ असत्पुत्रो यस्य॥ अतएव जीवन्मात्रमेव पृष्टं॥
अनुजश्च देवकः॥ हृदीकसुतः कृतवर्मा॥ जयंतादयः कृष्णभ्रातरः॥२६॥२७॥

भा०श्र०
५०

सर्ववृष्णीनां महारथः ॥ गंभीररयः ॥ युद्धे महावेगः ॥ वर्द्धते मोदत इत्यर्थः ॥ २८ ॥ कृष्णस्यापत्यानि कार्ष्णयः तेषु प्रवराः ॥ २९ ॥ सुनंदनंदशी
र्षण्यो मुख्यो येषां ते ॥ ३० ॥ ३१ ॥ भगवति सुखमास्त इति प्रश्नस्यानौचित्यमाशंक्याह ॥ पुर इत्यादि ॥ ३२ ॥ भगवतोऽत्रैव स्थाने हि लोकानां मं
गलं नान्यथेत्याशयेनाह चतुर्भिः ॥ मंगलाय प्रभावाय क्षेमाय लब्धपालनाय ॥ अनंतसखः बलभद्रसहायः ॥ ३३ ॥ अर्चिताः सर्वैः पूजिताः

अथ प्रश्नः सर्ववृष्णीनां सुखमास्ते महारथः ॥ गंभीररयोनिरुद्धो वर्द्धते भगवानुत ॥ २८ ॥ सुखेन चारुदेष्णश्च साम्बो जाम्बवतीसुतः ॥
अन्ये च कार्ष्णिप्रवराः सपुत्रा ऋषभादयः ॥ २९ ॥ तथैवानुचराः शौरेः श्रुतदेवोद्धवादयः ॥ सुनंदनंदशीर्षण्या ये चान्ये सात्वतर्षभाः ॥ ३० ॥ द
अपि स्वस्त्यासते सर्वे रामकृष्णभुजाश्रयाः ॥ अपि स्मरंति कुशलमस्माकं बद्धसौहृदाः ॥ ३१ ॥ भगवानपि गोविंदो ब्रह्मण्यो
भक्तवत्सलः ॥ कच्चित्पुरे सुधर्मायां सुखमास्ते सुहृद्वृतः ॥ ३२ ॥ मंगलाय च लोकानां क्षेमाय च भवाय च ॥ आस्ते यदुकुलां
भोधावाद्योऽनंतसखः पुमान् ॥ ३३ ॥ यद्बाहुदंडगुप्तायां स्वपुर्यां यदवोऽर्चिताः ॥ क्रीडंति परमानंदं महापौरुषिका इव ॥ ३४ ॥ य
त्पादशुश्रूषणमुख्यकर्मणा सत्यादयो द्व्यष्टसहस्रयोषितः ॥ निर्जित्य संख्ये त्रिदशांस्तदाशिषो हरंति वज्रायुधवल्लभोचि
ताः ॥ ३५ ॥ यद्बाहुदंडाभ्युदयानुजीविनो यदुप्रवीरा ह्यकुतोभया मुहुः ॥ अधिक्रमंत्यंघ्रिभिराहृतां बलात्सभां सुधर्मां सुरसत्तमो
चितां ॥ ३६ ॥

परमानंदं यथा भवति तथा ॥ महापौरुषिकाः वैकुंठनाथानुचराः ॥ ३४ ॥ यस्य पादशुश्रूषणमेव मुख्यं तपआदिभ्यः श्रेष्ठं यत्कर्म ते
न सत्यभामादयः संख्ये युद्धे श्रीकृष्णबलेन निर्जित्य तदाशिषः देवभोग्यान् पारिजातादीन् वज्रायुधस्य वल्लभा शची तस्या उचि ५०
ताः ॥ ३५ ॥ यद्बाहुदंडाश्रयोपजीविनः सुधर्माम् अंघ्रिभिरधिक्रामंति ॥ स गोविंदः सुखमास्ते इति गतपंचमश्लोकेनान्वयः ॥ ३६ ॥ ॥

इदानीं तस्यैव कुशलं पृच्छति। कच्चिदिति षड्भिः। अनामयं आरोग्यं। न लब्धो मानो येन वंधुभ्यः आ काशात्। किं वा तैः तिरस्कृतः। यत
श्चिरोषितः बहुकालं तत्र स्थितः॥३७॥ अभावैरिति छेदः अप्रेमशून्यैरमंगलैः परुषैः शब्दादिभिः नाभिहितः न ताडितोसि किं। यद्वा
अर्थिभ्यः किमपि दास्यामीति नोक्तं किं। यद्वा आशया सह यथा आसीत् भवति तथा दास्यामीति प्रतिश्रुतं सन्न दत्तं किं॥३८॥ अन्य

कच्चित्तेनामयं तात भ्रष्टतेजा विभासि मे॥ अलब्धमानोऽवज्ञातः किं वा तात चिरोषितः॥३७॥ कच्चिन्नाभिहतोऽभावैः शब्दा
दिभिरमंगलैः॥ न दत्तमुक्तमर्थिभ्य आशया यत्प्रतिश्रुतं॥३८॥ कच्चित्त्वं ब्राह्मणं बालं गां वृद्धं रोगिणं स्त्रियं शरणोपसृतं स
त्वं नात्याक्षीः शरणप्रदः॥३९॥ कच्चित्त्वं नागमोगम्यां गम्यां वासत्कृतां स्त्रियं॥ पराजितो वाथ भगवान्नोत्तमैं पथि॥४०॥ नासमैः
अपि स्वित्पर्यभुंक्थास्त्वं संभोज्यान्वृद्धबालकान्॥ जुगुप्सितं कर्म किंचित्कृतवान्नयदक्षमं॥४१॥ कच्चित्प्रेष्ठतमेनाथ हृद
येनात्मबंधुना॥ शून्योस्मि रहितो नित्यं मन्यसे तेन्यथा न रुक्॥४२॥ इति श्रीभागवते महापुराणे प्रथमस्कंधे युधिष्ठिरदर्शो
नाम चतुर्दशोध्यायः॥१४॥

ब्राह्मणागतं सत्वं प्राणिमात्रं न त्यक्तवानसि किं। यतस्त्वं पूर्वं शरणदः आश्रयप्रदः॥३९॥ अगम्यामिति छेदः निंदितां स्त्रियं आगमः किं नो
[illegible] तमैः अनुत्तमैः समैरित्यर्थः। अधमैरधमैर्वा किं न पराजितोसीत्यर्थः॥४०॥ संभोजनार्हान् वृद्धान् बालकांश्च किं स्वि
त् अपर्यभुंक्थास्त्यक्त्वा भुक्तवानसि परत्र वर्जनार्थः॥ अक्षमं कर्तुमयोग्यं यत् तत्कृतवानसि किं॥४१॥ नित्यं सदा प्रेष्ठतमेन हृदयेनांतरं
गेण स्वबंधुना श्रीकृष्णेन रहितः शून्योस्मीति। आत्मानं मन्यसे इत्यर्थः। अन्यथा ते रुक् मनःपीडा न घटते॥४२॥ इति प्रथमे चतुर्दशः॥१४॥

भा० प्र०
५२

कलिंप्रवेशमालक्ष्य धुरंधस्य परीक्षितिः॥ आरुरोह नृपः स्वर्गमिति पंचदशोब्रवीत॥१॥ कृष्णेऽर्जुनः॥ अविकल्पित इति छेदः॥ नाना
शंकास्पदं रूपमालक्ष्य विकल्पित इत्यर्थः॥ प्रतिभाषितुं नाशक्नोदित्युत्तरेणान्वयः॥ तत्र हेतवः॥ कृष्णविश्लेषेण कर्शितः कृशः कृ
तः॥१॥ शोकेन हेतुना वदनं च हृत्पद्मं त एव सरोजे शुष्यंती वदनहृत्सरोजे यस्य हता प्रभा तेजो यस्य॥२॥ शुचः शोकाश्रूणि यान्युज

सूत उवाच॥ एवं कृष्णसखः कृष्णो भ्रात्रा राज्ञा विकल्पितः॥ नानाशंकास्पदं रूपं कृष्णविश्लेषकर्शितः॥१॥ शोकेन शुष्यद्व
दनहृत्सरोजो हतप्रभः॥ विभुं तमेवानुध्यायन्नाशक्नोत्प्रतिभाषितुं॥२॥ कृच्छ्रेण संस्तभ्य शुचः पाणिनामृज्य नेत्रयोः
परोक्षेण समुन्नद्धप्रणयौत्कंठ्यकातरः॥३॥ सख्यं मैत्रीं सौहृदं च सारथ्यादिषु संस्मरन्॥ नृपमग्रजमित्याह बाष्प
गद्गदया गिरा॥४॥ अर्जुन उवाच॥ वंचितोहं महाराज हरिणा बंधुरूपिणा॥ येन मेपहृतं तेजो देवविस्मापनं मह
त्॥५॥ यस्य क्षणवियोगेन लोको ह्यप्रियदर्शनः॥ उक्थेन रहितो ह्येष मृतकः प्रोच्यते यथा॥६॥ श्री ॥

रुंति तानि नेत्रयोरेव संस्तभ्य गलितानि च पाणिना आमृज्य परोक्षेण दर्शनागोचरेण श्रीकृष्णेन हेतुना॥ समुन्नद्धं अधिकं यत्प्रेमौ
त्कंठ्यं तेन कातरः व्याकुलः नृपमित्याहेत्युत्तरेणान्वयः॥३॥ सख्यं हितैषितां मैत्रीं उपकारितां सुहृत्त्वं संबंधितां च॥ बाष्पेन कंठे च
धा रोधे गद्गदया॥४॥ येन मां वंचयता देवान् विस्मापयति यत्॥५॥ यस्य क्षणवियोगेनेत्यादियच्छब्दानां तेनाह॥ मद्यमुषित इति स ५२
प्तमश्लोकस्थेन तच्छब्देन संबंधः॥ अप्रियस्याप्यप्रियत्वे दृष्टांतः उक्थेन प्राणेन॥ एष पित्रादिः॥६॥ ॥श्री॥ ॥श्री॥

श्रीकृष्णोपकारानुस्मरति। यत्संश्रयादिति दशभिः। यस्य संश्रयात् बलात्। स्मरेण कामेन दुर्मदानाम् अतिमत्तानां तेजः प्रभावः हृतं ध
नुर्ग्रहणेनैव पश्यन्तु धनुः सज्जीकृतं च तेन मत्स्यो यन्त्रोपरि भ्रमता विद्धः। ततस्तान् विजित्य द्रौपदी प्राप्ता च॥७॥ इति विस्मये। खांड
वं द्रुस्यवनं। अदां दत्तवानस्मि। खांडवदाहे रक्षितेन मयेन कृता च सभा लब्धा। अद्भुत शिल्पिरूपा माया यस्यां सा। ते अध्वरे राजसूये
चाग्रनंतरश्लोको विगीतः। तथापि व्याख्यायते। नृपशिरः स्वंघ्रि यस्य तेजसा संधानं तवानुजो भीमः मखार्थं महत् हतवान्। तं निर्जितं वि

यत्संश्रयाद्द्रुपदगेहमुपागतानां राज्ञां स्वयंवरमुखे स्मरदुर्मदानां॥ तेजो हृतं खलु मयाभिहतश्च मत्स्यः सज्जीकृतेन धनुषा
धिगता च कृष्णा॥७॥ यत्संनिधावहमु खांडवमग्नयेदामिंद्रं च सामरगणं तरसा विजित्य॥ लब्धा सभा मयकृताद्भुतशिल्पि
माया दिग्भ्योहरन्नृपतयो बलिमध्वरे ते॥८॥ यत्तेजसा नृपशिरोंघ्रिमहन्मखार्थे आर्योनुजस्तव गजायुतसत्ववीर्यः॥ तेना
हृताः प्रमथनाथमखाय भूपा यन्मोचितास्तदनयन् बलिमध्वरे ते॥९॥ पत्न्यास्तवाधिमखक्लृप्तमहाभिषेकश्लाघिष्ठचारुक
बरं कितवैः सभायां॥ स्पृष्टं विकीर्य पदयोः पतिताश्रुमुख्या यस्तत्स्त्रियोकृत हतेशविमुक्तकेशाः॥१०॥ ॥श्री॥ ॥

नाराजसूयमखानुपपत्तेः। गजायुतस्येव सत्वमुत्साहशक्तिः। वीर्यं बलं च यस्य सः। तं हत्वा। प्रमथनाथो महाभैरवः तस्य मखाय ये रा
जानः तेनाहृताः यद्यस्मान्मोचिताः ते तस्मिन्नध्वरे बलिमानीतवंतः॥९॥ यैः कितवैः दुःशासनादिभिः तव पत्न्याः। कबरं किकीर्यं ज्न्मु
च्यस्पृष्टं आकृष्टं तेषां स्त्रियो हतेशाः अत एव वैधव्यात् मुक्तकेशाः कृतश्चकार। कथंभूतं कबरं अधिमखं राजसूयमधिकृत्य क्लृप्तो र
चितो यो महाभिषेकः। तेन श्लाघ्यतमं चारुरम्यं स्मरणात् तदानीमेव शास्त्रस्य श्रीकृष्णस्य नमनेय पदयोः पतितान्यश्रूणि मुखात् यस्याः प
त्न्याः परशब्दसापेक्षत्वस्यापि पतितशब्दस्याश्रुपदेन समासो नित्यसापेक्षितत्वात्॥१०॥

पुते

ना० प्र० ५२ शिष्याणामयुतस्याग्रेतत्संक्षेपःतस्माद्दुर्वाससोहेतोःअरिणारचितंयतदुरंतंकृच्छ्रंशापलक्षणंतस्मात्सकाशात्नोस्मानवने।।
५२ एत्यजुगोपकिंकृत्वाशाकमेवान्नंतस्मिन्पात्रेअवशिष्टंउपयुज्यजग्ध्वायतउपयोगात्।सलिलेविनिमग्नोमुनीनांसंघस्त्रिलो
कीतृप्तामममंस्त।एवंभारतेकथाकदाचित्दुर्वाससोदुर्योधनेनातिथ्यंकृतंतेनचपरितुष्टेनवरंवृणीष्वइत्युक्तं।दुर्वाससःशापात्पांड
वानश्येयुरितिमनसिविधायदुर्योधनेनोक्तं।युधिष्ठिरोस्मत्कुलमुख्योऽतस्तस्यापिभवतेवमेवशिष्यायुतसहितेनातिथिना
भवितव्यं।किंतुद्रौपदीभुक्ताधानंसीत्तथासीत्ततथातस्यांभुक्तवत्यांतद्गृहंगंतव्यमिति।ततश्चतथैवदुर्वाससशिष्यासेपरमाद

योनोजुगोपवनमेत्यदुरंतकृच्छ्रात्दुर्वाससोऽरिविहितादयुताग्रभुक्यः।।
शाकान्नशिष्टमुपयुज्ययतस्त्रिलोकींतृप्तामममंस्तसलिलेविनिमग्नसंघः।।११।।

रेणयुधिष्ठिरेणमध्याह्निकंकृत्वाआगम्यतामितिविज्ञापितोमुनिसंघोऽघमर्षणायजलेनिममज्ज।।तत्रचिंतातुरयाद्रौपद्यास्मृत
मात्रःश्रीकृष्णःतत्क्षणमेवभक्तवात्सल्यतयाचागतः।तयाचावेदितेवृत्तांतेभगवतोक्तंद्रौपद्यहंचबुभुक्षुस्ततोस्मिअथममभोजन
यततयाहिलज्जयोक्तं।स्वामिन्ममभोजनपर्यंतंमत्तयमन्नंसूर्यदत्तस्थाल्यांमयाचसर्वोन्नंसंभोज्यमुक्तं।अतोनास्त्यन्नमिति।त
तयाप्यत्तिनिर्बंधनेस्थालीमानाय्यतत्कंठलग्नंकिंचित्शाकान्नंभगवताउक्तंमुनिसंघमाह्वयेति।सचतावतातृप्तः।वृथापाकभयेन ५२
पलाय्यगतइति।।११।।

गिरिजासहितोविस्मापितःसन्निजंपाशुपतमस्त्रं।अन्येपिलोकपालाःनिजान्यस्त्राणिअदुः।अन्यदप्याश्चर्यमाह॥अमुनैवेतिम
हतइंद्रस्यासनार्द्धं॥१२॥तत्रैवस्वर्गेक्रीडतःगांडीवलक्षणंचिह्नंयस्यतत्।अरातयोनिवातकवचादैत्याः।तेषांवधार्थमाश्रितवं
तः।येनानुज्ञापितंअज्ञावयुक्तंकृतं।हेआजमीढयुधिष्ठिरतेनमुषितःवंचितोस्मि।कथंभूतेनभूम्ना।निजमहिमावस्थानेन॥
१३॥यद्बांधवइत्यादिश्लोकत्रयस्यापितेनमुषितोहमितिपूर्वेणैवसंबंधः।श्रीकृष्णबांधवएकएवाहंकौरवसैन्याब्धिं।नास्यंतो

यत्तेजसाथभगवान्युधिशूलपाणिर्विस्मापितःसगिरिजोस्त्रमदान्निजंमे॥अन्येपिचाहममुनैवकलेवरेणप्रा
प्तोमहेंद्रभवनेमहदासनार्द्धं॥१२॥तत्रैवमेविहरतोभुजदंडयुग्मंगांडीवलक्षणमरातिवधायदेवाः।सेंद्राःश्रिताय
दनुभावितमाजमीढतेनाहमद्यमुषितःपुरुषेणभूम्ना॥१३॥यद्बांधवःकुरुबलाब्धिमनंतपारमेकोरथेनततरेऽ
हमतीर्यसत्वं॥प्रत्याहृतंबहुधनंचमयापरेषांतेजस्पदंमणिमयंचहृतंशिरोभ्यः॥१४॥ ॥श्री॥ ॥श्री॥ ॥

गांभीर्येणपारंचरेशातोयस्यततरेतीर्णवान्।उत्तरगोग्रहेअवतीर्याणिउत्तराणिसत्वानीतिमंगलादीनिभीष्मादिरूपाणियस्मिन्।
परैर्नीतंगोधनंप्रत्याहृतंपरेषांचशिरोभ्यःसकाशात्।तेजस्पदंप्रज्ञावास्पदमुष्णीषरूपंमणिमयंमुकुटंरत्नरूपंबहुधनंतान्मो
हनास्त्रेणमोहयित्वाहृतंयद्बांधवेनमया॥१४॥

भा॰ प्र॰ अदभ्रा अनल्पा ये राजवर्याः।तेषां रथमंडलैर्मंडितासु भीष्मादीनां चमूषु सारथिरूपेण ममाग्रेचरः सन् हे विभो तेषां रथयूथपा-

५३ नां आयूंषि यो दृशा दृष्ट्यैव आच्छेत् हृतवान्।मनांसी तु उत्साहादिशक्तिं सहो बलं।ओजः शस्त्रादिकौशलं।।२५।।यस्य दोष्षु भु-

जेषु मां प्रणिहितं स्थापितं तैर्नैव गुर्वादिभिर्निरूपितानि प्रयुक्तानि अस्त्राणि न स्पृशंति स्म।गुरुर्द्रोणः।त्रिगर्त्तदेशाधिपतिः

सुशर्मा।शलः शल्यः सैंधवः सिंधुदेशाधिपतिर्जयद्रथः।।बाह्लीकः शांतनोर्भ्राता।अमोघो महिमा येषां तथाभूतान्यपि पार्थंतरेपि

यो भीष्मकर्णगुरुशल्यचमूष्वदभ्रराजन्यवर्यरथमंडलमंडितासु।।अग्रेचरो मम विभो रथयूथपानामायुर्मनांसि च

दृशा सह ओज आच्छेत्।।२५।।यद्दोष्षु मा प्रणिहितं गुरुभीष्मकर्णद्रौणित्रिगर्त्तशलसैंधवबाह्लिकाद्यैः।।अस्त्राण्यमोघ

महिमानि निरूपितानि नोपस्पृशुर्नृहरिदासमिवासुराणि।।२६।।सौत्ये वृतः कुमतिनात्मद ईश्वरो मे यत्पादपद्ममभ

वाय भजंति भव्याः।।मां श्रांतवाहमरयो रथिनो भुविष्ठं न प्राहरन्यदनुभावनिरस्तचित्ताः।। ।।२७।। ।।श्री।। ।।

स एवार्थः।।प्रतीकाराकरणेऽप्यस्पर्शे दृष्टांतः।नृहरिदासं प्रह्लादमिवेति।।२६।।स्वापराधमनुस्मरन् संतप्यमान आह।सौत्ये सारथ्ये कुम-

तिना मे मया स वृतः।।कुमतित्वमेवाह।आत्मद इत्यादिना।।अभवाय मोक्षाय भव्याः श्रेष्ठाः।श्रांतवाहं अश्वा यस्य तं मां जयद्रथवधे

हि जलपानं विना अश्वाः श्रांताः।ततो रवतीर्य बाणैः भुवं भित्वा जलं संपादितं मया।तदा यस्यानुभावेन निरस्तचित्ताः अरयो मां ५३

न प्रहृतवंतः स सौत्ये वृत इति कुमतित्वं।।२७।।

हेनरदेवउदारंगंभीरंरुचिरंयत्स्मितंतेनशोभितानिनर्मोक्तिपरिहासवाक्यानि॥तथाकार्यप्रस्तावेषुहेपार्थ॥इत्यादीनिमधुराक्ष
राणिसंजल्पितानिचहृदिस्पृशानिमनोज्ञानिमाधवस्ययान्येतानि॥इदानींस्मर्तुर्ममहृदयंलुठंतिक्षोभयंति॥निजभावश्चार्थः॥
१८॥विकत्थनंस्वगुणश्लाघनादि॥शय्यादिषुएकत्वात्॥अव्यतिरेकाद्धेतोःकदाचिद्व्यभिचारंदृष्ट्वाहेवयस्यकृतवान्॥सत्यमुक्त

नर्माण्युदाररुचिरस्मितशोभितानिहेपार्थहेर्जुनसखेकुरुनंदनेति॥संजल्पितानिनरदेवहृदिस्पृशानि
स्मर्तुर्लुठंतिहृदयंममकाधवस्य॥१८॥शय्याशनाटनविकत्थनभोजनादिष्वैक्याद्वयस्यकृतवानितिवि
प्रलब्धः॥सख्युःसखेवपितृवत्तनयस्यसर्वंसेहेमहान्महितयाकुमतेरघंमे॥१९॥सोहंनृपेंद्ररहितःपु
रुषोत्तमेनसख्याप्रियेणसुहृदाहृदयेनशून्यः॥अध्वन्युरुक्रमपरिग्रहमंगरक्षन्गोपैरसद्भिरबलेव
विनिर्जितोस्मि॥२०॥

स्वंइतिवक्रोक्त्याविप्रलब्धःतिरस्कृतोऽपि॥कृतवानितिपाठे॥कृतनवोदेवाःसेवकाःसंतियस्यअसौमहामहानपि॥मयावय
स्यइतिमत्वाविप्रलब्धःतिरस्कृतइत्यर्थः॥मेअघंअपराधंअसहत॥महित्तयास्वमहितत्वेन॥एकपदेअतिमहत्त्वेनेत्यर्थः॥स
ख्युरघंसखेव॥तनयस्याघंपितेव॥१९॥यत्त्वयाशंकितंपराजयंच॥सोहमित्याह॥तेनसख्यारहितःअतोहृदयेनशून्यः॥
अंगहेराजन्॥उरुक्रमस्यपरिग्रहंषोडशसहस्रस्त्रीलक्षणं॥असद्भिर्नीचैःअबलायोषेव॥२०॥

श्रीकृष्णवियोगएवात्रहेतुर्नान्यइत्याह।तत्रेति।यतःयेभ्यः।ईश्वरेणरिक्तंशून्यं।असत्कार्याक्षमं।सम्मंत्रविधानैरपिजस्मनि
कृतमिव।अतिशीतादपिकुहकात्मायाविनःसकाशात्।राज्यंलब्धंयथा।सम्यक्कर्षणादिनाऽपिऊखरेभूमौउप्तंबीजमि
व।।२१।।सुहृत्पुरेत्वयापृष्टानांनःसुहृदांमध्येचत्वारःपंचवाऽवशेषिताः।तत्रहेतुःविप्रशापेत्यादि।।२२।।वारुणीम्

तद्वैधनुस्तइषवःसरथोहयास्तेसोऽहंरथीनृपतयोयतआनमंति।।सर्वंक्षणेनतदभूदसदीशरिक्तं।भस्मन्हुतं
कुहकराद्धमिवोप्तमूष्यां।।२१।।राजंस्त्वयानुपृष्टानांसुहृदांनःसुहृत्पुरे।विप्रशापविमूढानांनिघ्नतांमुष्टिभिर्मि
थः।।२२।।वारुणींमदिरांपीत्वामदोन्मथितचेतसां।।अजानतामिवान्योन्यंचतुःपंचावशेषिताः।।२३।।प्रायेणैतद्भग
वतईश्वरस्यविचेष्टितं।।मिथोनिघ्नंतिभूतानिभावयंतिचयन्मिथः।।२४।।जलौकसांजलेयद्वन्महांतोऽदंत्यणी
यसः।।दुर्बलान्बलिनोराजन्महांतोबलिनोमिथः।।२५।।एवंबलिष्ठैर्यदुभिर्महद्भिरितरान्विभुः।।यदून्यदुभिर
न्योन्यंभूभारान्संजहारह।।२६।।देशकालार्थयुक्तानिहृत्तापोपशमानि।हरंतिस्मरतश्चित्तंगोविंदाभिहितानिमे २७

त्मयी।अजानतामिवान्योन्यमेरकामुष्टिभिर्निघ्नतां।।२३।।अवशेषिताइत्यनेनोक्तंहेतुकर्तारमाह।त्रिभिः।प्रायेणेति।भावयां
तिपालयंति।।२४।।जलौकसांमत्स्यादीनांमध्ये।महांतःस्थूलाःअणीयसःसूक्ष्मान्।यथाअदंति।।२५।।भुवोभारभूतान्संहृ
तवान्।।२६।।अतःपरंवक्तुंनशक्नोमीतिसूचयन्नाह।देशकालोचितार्थयुक्तानिमनःपीडोपशमनकराणिचगोविंदस्यवचना
निस्मरतोममचित्तंहरंतिआकर्षंति।।२७।।

एवमिति सूतोक्तिः। अतिदृढेन स्नेहेन चिंतयतो मतिः शांता। विशोका विमना विरक्ता चासीत्।।२९।। मतिवैमल्ये फलमाह द्वाभ्यां वा
सुदेवांघ्र्यनुध्यानेन परिबृंहितं रंहो वेगो यस्याः तया भक्त्या निर्मथिता उन्मूलिताः। अशेषाः कषायाः कामादयो यस्याः सा धिषणा बुद्धिर्य
स्य सः। ज्ञानं पुनरध्यगमदित्युत्तरेणान्वयः।।३०।। कालेन कर्मभिश्च। तमसा च भोगाभिनिवेशेन च रुद्धं आवृतं स न।।३१।। ज्ञान
फलमाह। विशोक इति। एतदेव विशोकहेतुत्वभावेनोपपादयति। शोकस्य हि हेतुर्द्वैतभ्रमः तस्य देहः। तस्य लिंगं तस्य गुणाः तेषां

एवं चिंतयतो जिष्णोः कृष्णपादसरोरुहं।। सौहार्देनातिगाढेन शांतासीद्विमला मतिः।।२९।। वासुदेवांघ्र्यनुध्यान
परिबृंहितरंहसा।। भक्त्या निर्मथिताशेषकषायाधिषणोर्जुनः।।३०।। गीतं भगवता ज्ञानं यत्तत्संग्राममूर्द्ध
नि।। कालकर्मतमोरुद्धं पुनरध्यगमद्विभुः।।३१।। विशोको ब्रह्मसंपत्त्या संछिन्नद्वैतसंशयः।। लीनप्रकृतिनैर्गु
ण्यादलिंगत्वादसंभवः।।३२।। निशम्य भगवन्मार्गं संस्थां यदुकुलस्य च।। स्वःपथाय मतिं चक्रे निभृतात्मा युधिष्ठिरः।।३३।।

म विद्या तत्र ब्रह्मसंपत्त्या ब्रह्माहमिति ज्ञानेन लीना प्रकृतिरविद्या यस्मिन् तत्ते नैर्गुण्यं भवति। ननु सुषुप्तिप्रलययोरप्यविद्याशेष :
तस्मान्नैर्गुण्यात् गुणकार्यलिंगनाशः। अलिंगत्वाच्च असंभवः सम्यग्भोगाय भवति पुनः पुनरिति संभवः स्थूलशरीरं तद्रहितः।। त
तश्च त्वरितं द्वैताभावात् संछिन्नो द्वैतलक्षणः संशयो भ्रमो यस्य सः विशोको जात इति।।३२।। भगवतो मार्गं अवलंब्य यदुकुलस्य संस्थां
नाशं श्रुत्वा नारदोक्तं चानुस्मृत्य स्वःपथाय स्वर्गमार्गाय निभृतात्मा निश्चलचित्तः।।३३।। ।।श्री।। ।।श्री।। ।।श्री।। ।।श्री।।

तां भगवद्गतिं दुर्विज्ञेयां च स्वतिरोहितस्य सौदामिन्या यथाकाशे यांत्या हित्वाभ्रमंडलं। गतिर्न लक्ष्यते मर्त्यैस्तथा कृष्णस्य दैवतैरिति श्रितिःसं
स्तेरुपरराम जीवन्मुक्तावस्थवा देहं जहाविति वा॥३३॥ तदेवमुक्तमपि यादवेभ्यो भगवतो वैलक्षण्यमबुध्वा तस्मान्मंदमतो मं
दमतीन्प्रति वैलक्षण्यं स्पष्टयति द्वाभ्यां। यया यादवरूपया तन्वा भुवो भारं कंटकेन कंटकमिवाहरत्। यादवतनुः। स्वभारस्तनु
श्चेति द्वयमपि ईश्वरस्य संहार्यत्वेन सममेव॥३४॥ श्रीकृष्णमूर्तेर्विशेषमाह यथेति। तान्यपि यथा धत्ते जहाति च तद्वदिहा॥य

पृथाऽप्यनुश्रुत्य धनंजयोदितं नाशं यदूनां भगवद्गतिं च तां॥ एकांतभक्त्या भगवत्यधोक्षजे निवेशितात्मोपरराम सं
सृतेः॥३३॥ ययाहरद्भुवो भारं तां तनुं विजहावजः॥ कंटकं कंटकेनैव द्वयं चापीशितुः समं॥३४॥ यथा मत्स्यादिरू
पाणि धत्ते जह्याद्यथा नटः॥ भूभारः क्षपितो येन जहौ तच्च कलेवरं॥३५॥ यदा मुकुंदो भगवानिमां महीं जहौ स्वतन्वा
श्रवणीयसत्कथः॥ तदाहरेवाप्रतिबुद्धचेतसामभद्रहेतुः कलिरन्ववर्त्तत॥३६॥ युधिष्ठिरः तत्परिसर्पणं बुधः॥ पुरे च
राष्ट्रे च गृहे तदात्मनि विभाव्य लोभानृतजिह्महिंसनाद्यधर्मचक्रं गमनाय पर्यधात्॥३७॥

था नटो निजरूपेण स्थितो यथा रूपांतराणि धत्ते अंतर्धत्ते च तथा तदपि कलेवरं जहौ अंतर्धापितवान्॥३५॥ युधिष्ठिरस्य स्वर्गारोहप्रसं
गाय कलिप्रवेशमाह। स्वतन्वा जहौ स्वतन्वा चारेव वैकुंठमारोहत्। श्रवणीया सती कथा यस्य। तदा यदहस्तस्मिन्नेवाहनि इति लुप्तसप्त
म्यंतं पदं। अप्रतिबुद्धचेतसामिति विवेकिनां तु न प्रभुरित्युक्तं। अन्ववर्त्ततेति पूर्वमेवांशेन प्रविष्टस्य तेन रूपेण प्रवृत्तिरुक्ता॥३६॥
बुधो युधिष्ठिरस्तस्य कलेः परिसर्पणं प्रसरणं विलोक्य। कथंभूतं विलोभाद्यधर्मचक्रं यस्मिन्। जिह्मं कौटिल्यं पर्यधात् तदुचितं प
रिधानमकरोत्॥३७॥

व

प
टि
५५

आत्मनःस्वस्यगुणैःसुसमंअतिसदृशं।तोयंसर्वतःस्थितं।समुद्रोदकमेवनीवीपरिधानविशेषोयस्याःतस्याःभूमेःपतित्वेना
भिषिक्तवान्।।३८।।वज्रंतुअनिरुद्धस्यपुत्रंनिरूप्यकृत्वेत्यर्थः।अपिबत्।आत्मन्यारोपयामासईश्वरःसमर्थः।संछिन्नान्यशे
षाणिबंधनानिउपाधयोयेन।।४०।।तदेवदर्शयतिद्वाभ्यां।वाचमित्युपलक्षणं।सर्वेंद्रियाणिमनसिप्रविलापितवानित्यर्थः।तच्च

स्वराट्पुत्रंविनयिनमात्मनःसुसमंगुणैः।।तोयनीव्याःपतिंभूमेरभ्यषिंचद्गजाह्वये।।३८।।
मथुरायांतथावज्रंशूरसेनपतिंततः।।प्राजापत्यांनिरूप्येष्टिमग्निंमपिबदीश्वरः।।३९।।विसृ
ज्यतत्रतत्सर्वंदुकूलवलयादिकं।।निर्ममोनिरहंकारःसंछिन्नाशेषबंधनः।।४०।।वाचंजुहा
वमनसितत्प्राणइतरेचतं।।मृत्यावपानंसोत्सर्गंतंपंचत्वेह्यजोहवीत्।।४१।।त्रित्वेहुत्वाच
पंचत्वंतच्चैकत्वेऽजुहोन्मुनिः।।सर्वमात्मन्यजुहवीद्ब्रह्मण्यात्मानमव्यये।।४२।। ।। ।।

मनःप्राणेप्राणाधीनवृत्तित्वात्।तंप्राणंइतरेअपानेतेनाकर्षणात्।।अपानव्यापारउत्सर्गःतत्सहितमपानंमृत्यौतदधिष्ठातृदेवतायां
अनेनैवचवागादिष्वपितत्तत्कर्मसाहित्यंज्ञेयं।तंमृत्युंपंचत्वेपंचभूतानामैक्येदेहेदेहस्यैवमृत्युर्नात्मनइतिभावितवानित्यर्थः
अजोहवीदितियङ्लुगंतात्लुङिरूपं।।४१।।त्रित्वे[illegible]गुणत्रयेतच्चत्रित्वंएकत्वेअविद्यायां।सर्वंसर्वारोपहेतुमविद्यांआत्मनिजीवे
अजोहवीदितिवक्तव्येअजुहवीदित्यार्षं।एवंशोधितंआत्मानंब्रह्मणिअव्ययेकूटस्थेनतस्यान्यत्रलयइत्यर्थः।।४२।। ।। श्री ।।

भा०प्र० तदेवमात्मप्रतिष्ठितिमुक्त्वावासस्थितिमाह।चीरवासाइतिद्वाभ्यांबद्धवाकमौनी॥४३॥अनवेक्षमाणःअनुजादिप्रतीक्षामकुर्वन्॥
५६ आशांदिशं।गतःपूर्वैर्षांपूर्वैःप्रविष्टां॥४४॥यतःयांदिशंअधर्ममित्रंयस्यतेन॥४५॥साधुकृताःसर्वेर्थाःधर्मादयोयैः।अतएववैकुं
ठस्यचरणांबुजमेवात्यंतिकंशरणंज्ञात्वा॥४६॥कथंभूतेपदेविधूतकल्मषाणांमास्थानंसम्यक्।निवासस्थानंयतीनांतस्मि

चीरवासानिराहारोबद्धवाक्मुक्तमूर्द्धजः॥दर्शयन्नात्मनोरूपंजडोन्मत्तपिशाचवत्॥४३॥अनवेक्षमाणोनिरगादशृण्व
न्बधिरोयथा॥उदीचींप्रविवेशाशांगतपूर्वांमहात्मभिः॥४४॥हृदिब्रह्मपरंध्यायन्नावर्तेतयतोगतः॥सर्वेतमनुनिर्जग्मुर्भ्रा
तरःकृतनिश्चयाः॥कलिनाधर्ममित्रेणदृष्ट्वास्पृष्टांप्रजांभुवि॥४५॥तेसाधुकृतसर्वार्थाज्ञात्वात्यंतिकमात्मनः॥मनसास्मारया
मासुर्वैकुंठचरणांबुजं॥४६॥तद्ध्यानोद्रिक्तयाभक्त्याविशुद्धधिषणाःपरे॥तस्मिन्नारायणपदेएकांतमतयोगतिं॥४७॥
अवापुर्दुरवापांतेअसद्भिर्विषयात्मभिः॥विधूतकल्मषास्थानंविरजेनात्मनैवहि॥४८॥विदुरोपिपरित्यज्यप्रभासेदेहमा त्र
त्मवान्॥कृष्णावेशेनतच्चित्तःपितृभिःस्वक्षयंययौ॥४९॥द्रौपदीचतदाज्ञायपतीनामनपेक्षतां॥वासुदेवेभगवतिह्येकां
तमतिरापतं॥५०॥यःश्रद्धयैतद्भगवत्प्रियाणांपांडोःसुतानामितिसंप्रयाणं॥शृणोत्यलंस्वस्त्ययनंपवित्रंलब्ध्वाहरौभक्ति
मुपैतिसिद्धिं॥५१॥इतिश्रीभागवतेमहापुराणेप्रथमस्कंधेपंचदशोध्यायः॥१५॥

भा नविरजेनात्मनैवगतिंआपुः।नतुयोगशाकलेनलिंगेनगतेवाविशेषणंविरजैनात्मनैवात्मस्थानरूपांगतिंतेविधूतकल्मषाःप्रापुरिति॥
र्थ ४८॥तीर्थाटनप्रभासेश्रीकृष्णावेशेनकृष्णेचितमावेश्यदेहंपरित्यज्यतच्चित्तएवसन्तदानींनिजमागतैःपितृभिःसहस्वक्षयंस्वाधिकार
स्थानंययौ॥४९॥आत्मनंप्रतिअनपेक्षतांतदाज्ञात्वाआप॥५०॥इतिएवंयत्संप्रयाणंअलंअतिशयेनस्वस्त्ययनंमंगलास्पदं।अलंपवित्रंच ५६
॥५१॥इतिपंचदशः॥१५

ततश्चबोदृषोर्भूमिधर्मयोः।कलिखिन्नयोः।संवादेवर्ण्यतेआस्तिःपालकस्यपरीक्षितः॥२॥द्विजवर्याणांशिक्षया।सूत्यांजन्मनिअभिज्ञा
तकोविदाः।र्जितकर्मविदः।हेविप्रामहतांगुणायस्मिन्नसः॥२॥जन्मनमेजयादीनित्यन्तराधिकंचंछांदसं॥२॥आजहारकृतवानित्यर्थः।
शारद्वतंकृपं।यत्रयेषुमेधेषु॥३॥निजग्राहनिगृहीतवान्।कलिमेवनिर्दिशतिनृपेति॥४॥कस्यहेतोरिति।अयमर्थः।कलिंकस्माद्धे

सूतउवाच॥ततःपरीक्षिद्द्विजवर्यशिक्षयामहींमहाभागवतःशशासह।यथाहिसूत्यामभिजातकोविदाःसमादिशन्वि
प्रमहद्गुणस्तथा॥१॥सउत्तरस्यतनयामुपयेमइरावतीं॥जनमेजयादींश्चतुरस्तस्यामुत्पादयन्सुतान्॥२॥आजहाराश्वमेधां
स्त्रीन्गंगायांभूरिदक्षिणान्।शारद्वतंगुरुंकृत्वादेवायत्राक्षिगोचराः॥३॥निजग्राहोजसावीरः।कलिंदिग्विजयेक्वचित्।नृपलिं
गधरंशूद्रंघ्नंतंगोमिथुनंपदा॥४॥श्रीशौनकउवाच॥कस्यहेतोर्निजग्राहकलिंदिग्विजयेनृपः।नृदेवचिह्नधृक्शूद्रकोसौ
गांयःपदाहनत्॥५॥तत्कथ्यतांमहाभागयदिकृष्णकथाश्रयं।अथवाऽस्यपदांभोजमकरंदलिहांसतां।किमन्यैरसदालापैरायु
षोयदसद्व्ययः॥६॥

तो।केवलंनिजग्राहनतुहतवान्॥यत्तोसौशूद्रकः।अतिकुत्सितः।योगांपदाअहन्निति॥५॥अस्यविष्णोःपदांभोजयोर्योमकरंदःतंलिहंति
आस्वादयंतियेतेषांसतांमहतांवाकथाश्रयमितिसमासान्तिःकृष्णस्यानुषंगः।तर्हिकथ्यतां।नोचेत्किमन्यैरसद्भिरालापैः।यतयैः।
आयुषोवृथाव्ययः॥६॥

अस्माकमप्यं सत्रप्रयत्नोऽपि हरिकथामृतपानार्थ एवेत्याह ॥ सार्द्धाभ्यां ॥ ह्रस्वमल्पमायुर्येषां अतो मर्त्यानां मरणधर्म्मवतां तथाऽ
प्यमृतं सत्रं मोक्षमिच्छतां यो मृत्युः स इह सत्रे समित्युरिदं शामित्रं कर्म पशुहिंसनं तदर्थं उपहूतः ॥ ७ ॥ ततः किमत आह ॥ न कश्चिदि
ति ॥ ८ ॥ ततोऽपि किमित आह ॥ अहो नृलोके हरिलीलामृतं वचः पीयेत ते त्वेतदर्थं हरिलीलैवामृतं यस्मिन् ॥ ९ ॥ तदभावे वृथैव जीव

ह्रस्वायुषां नृणां अंग मर्त्यानामृतमिच्छतां ॥ इहोपहूतो भगवान्मृत्युः शामित्रकर्मणि ॥ ७ ॥ न कश्चिन्म्रियते तावद्यावदा
स्त इहांतकः ॥ एतदर्थं हि भगवानाहूतः परमर्षिभिः ॥ ८ ॥ अहो नृलोके पीयेत हरिलीलामृतं वचः ॥ मंदस्य मंदप्रज्ञस्य वयो
मंदायुषश्च वै ह ॥ निद्रया ह्रियते नक्तं दिवा च व्यर्थकर्मभिः ॥ ९ ॥ सूत उवाच ॥ यदा परीक्षित्कुरुजांगले वसन् कलिं प्रविष्टं नि
जचक्रवर्त्तिते ॥ निशम्य वार्त्तामनतिप्रियां ततः शरासनं संयुगशौंडिराददे ॥ ११ ॥ स्वलंकृतं श्यामतुरंगयोजितं रथं मृगेंद्र
ध्वजमाश्रितः पुरात् ॥ वृतो रथाश्वद्विपपत्तियुक्तया स्वसेनया दिग्विजयाय निर्गतः ॥ १२ ॥

यस्मिन्पीते कृतं सर्वमिष्टापूर्त्तादि री३कं नवेत् रा

नमित्याह ॥ मंदस्य अलसस्य नक्तं रात्रौ वयः ॥ आयुः तन्निद्रया ह्रियते ॥ दिवा अक्रिया च यद्वयस्तद्व्यर्थैः कर्मभिरपह्रियते ॥ १० ॥ तत्र तावत्कलि
निग्रहप्रसंगमाह ॥ यदा निजचक्रवर्त्तिते स्वसेनयापालिते देशे कलिं प्रविष्टं शुश्राव तदा तां अनतिप्रियां वार्त्तां किं विप्रियां च युद्धकौतु
कसंपत्तेः निशम्य ततः शरासनं दुष्टनिग्रहार्थमाददे ॥ संयुगशौंडि युद्धप्रगल्भः ॥ पाठांतरे युद्धशौंडितुल्यः ॥ ११ ॥ ततश्च दिग्विजयाय निर्गतः १२ ५७

भद्राश्वादीनि पूर्वपश्चिमादक्षिणोत्तरः समुद्रलग्नानि वर्षाणि मेरोः सर्वतरिलावृतं तत उत्तरतो रम्यं हिरण्मयं चादक्षिणतो हरिव
र्षं किंपुरुषं चा तानि विजित्य ॥१३॥ अगीयमानं च यशः यशआदीनि अत एव न ते न्योरक्षावितितत्तीयेनान्वयः ॥१४॥१५॥१६॥ किंच ॥
स्निग्धेषु पांडवेषु विष्णोर्यानि सारथ्यादीनि कर्माणि तानि अत एव नता तथा विष्णोर्जगत्कर्तृकां प्रणतिं अत एव नृपतिः परीक्षित् विष्णो

भद्राश्वं केतुमालं च भारतं चोत्तरान् कुरून् ॥ किंपुरुषादीनि सर्वाणि विजित्य जगृहे बलिं ॥१३॥ तत्र तत्रोपशृण्वानः स्वपूर्वे
षां महात्मनां ॥ अगीयमानं च यशः कृष्णमाहात्म्यसूचकं ॥१४॥ आत्मानं च परित्रातमश्वत्थाम्नोऽस्त्रतेजसः ॥ स्नेहं च वृ
ष्णिपार्थानां तेषां भक्तिं च केशवे ॥१५॥ तेभ्यः परमसंतुष्टः प्रीत्युज्जृंभितलोचनः ॥ महाधनानि वासांसि ददौ हारान्म
हामनाः ॥१६॥ सारथ्यपारषदसेवनसख्यदौत्यवीरासनाऽनुगमनस्तवनप्रणामं ॥ स्निग्धेषु पांडुषु जगत्प्रणतिं वै
च विष्णोर्भक्तिं करोति नृपतिश्चरणारविंदे ॥१७॥ तस्यैवं वर्तमानस्य पूर्वेषां वृत्तिमन्वहं ॥ नातिदूरे किलाश्चर्यं यदा व
सीत्तन्निबोध मे ॥१८॥ धर्मः पदैकेन चरन्विच्छायामुपलभ्य गां ॥ पृच्छति स्माश्रुवदनां विवत्सामिव मातरं ॥१९॥ ॥

फ
श्चरणारविंदे भक्तिं करोति स्म ॥ पारषदमिति रेफप्रकारयोर्विश्लेषश्छांदसः ॥ तत्र पार्षदं सभापतित्वं सेवनं चित्तानुवृत्तिः वीरासनं रात्रौ ख
हस्त ड्गं हस्त्वा तिष्ठतो जागरणं ॥१७॥ वृत्तिमनुवर्तमानस्य सतः नातिदूरे आश्रमे वा ॥१८॥ धर्मो वृषरूपः विच्छायां हतप्रभां गां गोरूपां पृथ्वीं ॥ विवत्सां ॥
नष्टापत्यां ॥१९॥

ना॰ प्र॰ ५८ ते आत्मनो देहस्य पद्यपि बहिरामयो न लक्ष्यते तथापि अंतर्मध्ये आधिः पीडा यस्याः तां त्वामालक्ष्ये केन यतो विद्धायाऽसि अतएव
त्वम्लायता वैवर्ण्यं न जतासु खेन लिंगेन तत्र कारणानि कल्पयन् पृच्छति दूरे बंधुमित्यादि पंचभिः । दूरे स्थितं बंधुं ॥२०॥ त्रिभिः पादै
न्यूनं अतएव एकपादं मां मां वृषलैः अत ऊर्द्धं भोक्ष्यमाणं पुंस्त्वमात्मना पदं विनाभरणलात् । हृता यज्ञभागा येषां यज्ञापरेणात ॥२१॥ हे ६
त उर्वि पृथ्वि । नतैर्नृभि रक्ष्यमाणाः स्त्रियः पितृभिः रक्ष्यमाणान् बालान् अनुस्तु तेरेव पुरुषादैः खनिर्दयैः । आर्तान् क्लिष्टान् । वाचं देवीं स

कच्चिद् द्रुहेनामयमात्मनस्ते विलायासि म्लायते येन मुखेन ॥ आलक्षये भवतीमंतराधिं दूरे बंधुं शोचसि कंचनांब ॥२०॥ पादैर्न्यू
नं शोचसि मैकपादमात्मानं वा वृषलैर्भोक्ष्यमाणं ॥ अहो सुरादीन् हृतयज्ञभागान् प्रजा उत स्वित्मघवं त्यवर्षति ॥२१॥ अर
क्षमाणाः स्त्रिय उर्वि बालान् शोचस्यथो पुरुषादैरिवार्तान् ॥ वाचं देवीं ब्रह्मकुले कुकर्मण्यब्रह्मण्ये राजकुले कुलाग्र्यान् ॥२२॥ किं
क्षत्रबंधून् कलिनोपसृष्टान् राष्ट्राणि वा तैरवरोपितानि । इतस्ततो वाशनपानवासः स्नानव्यवायोन्मुखजीवलोकं ॥२३॥ यद्वांऽ
ब ते भूरिभरावतारकृतावतारस्य हरेर्धरित्रि ॥ अंतर्हितस्य स्मरंती विसृष्टा कर्माणि निर्वाणविलंबितानि ॥२४॥ इदं ममाच
क्ष्व तवाधिमूलं वसुंधरे येन विकर्षितासि ॥ कालेन वा ते बलिनां बलीयसा सुरार्चितं किं हृतमद्य सौभगं ॥२५॥ ॥श्री॥ श्री॥

रक्षंतीं कुकर्मणि दुराचारे स्थितां कुलाग्र्यान् ब्रह्मण्योत्तमान् सेवकान् ॥२२॥ उपसृष्टान् व्याप्तान् अवरोपित उद्धसितानि । व्यवायो
मैथुनं इतस्ततः निषेधानादरेण सर्वतोऽन्नपानादिषून्मुखं अवर्त्तमानं जीवलोकं वा ॥२३॥ हे अंब मातः धरित्रि ते तव यो भूरिभारस्त
स्यावतारणार्थं कृतावतारस्य कर्माणि स्मरंती ते न विसृष्टा सती शोचसि । निर्वाणं विलंबितं आश्रितं येषु तानि । पागंतरे निर्वाणं वि
द डंबितं उपहसितं । यैः मोक्षोऽप्यधिकसुखानीत्यर्थः ॥२४॥ हे अंब ते सौभाग्यं कालेन वा हृतं ॥२५॥ ॥श्रीकृष्णायनमः॥ ॥ ५८

नवान्ज्ञानात्यपि च तथापि वक्ष्यामीत्याह । येन हेतुना तेन चतुर्भिः पादैर्वर्तसे यत्र च सत्यादयो गुणाः । न विद्यंते तेन श्रीनिवासेन नि
रहितं लोकं शोचामीति षष्ठेनान्वयः ॥२६॥ सत्यं यथार्थभाषणं । शौचं शुद्धत्वं । दया परदुःखासहनं । क्षांतिः क्रोधप्राप्तौ चित्तसंयमनं । त्या
गः अर्थिषु मुक्तहस्तता । संतोषः अलंबुद्धिः । आर्जवं अवक्रता । शमो मनोनैश्चल्यं । दमो बाह्येंद्रियनैश्चल्यं । तपः स्वधर्मः । साम्यं अरिमित्रादि
भावः । तितिक्षा परापराधसहनं । उपरतिर्लाभप्राप्तावौदासीन्यं । श्रुतं [illegible] शास्त्रविचारः ॥२७॥ ज्ञानमात्मविषयं । विरक्तिर्वैतृष्ण्यं । ऐश्वर्यं नि

धरण्युवाच । त्वं वा नु हि वेद तत्सर्वं यन्मां धर्मानुपृच्छति । चतुर्भिर्वर्तसे येन पादैर्लोकसुखावहैः ॥२६॥ सत्यं शौचं दया क्षांतिस्त्यागः
संतोष आर्जवं । शमो दमस्तपः साम्यं तितिक्षोपरतिः श्रुतं ॥२७॥ ज्ञानं विरक्तिरैश्वर्यं शौर्यं तेजो बलं स्मृतिः । स्वातंत्र्यं कौशलं कां
तिर्धैर्यं मार्दवमेव च ॥२८॥ प्रागल्भ्यं प्रश्रयः शीलं सह ओजो बलं भगः । गांभीर्यं स्थैर्यमास्तिक्यं कीर्तिर्मानोनहंकृतिः ॥२९॥ इमे चान्ये
च भगवन्नित्या यत्र महागुणाः । प्रार्थ्या महत्त्वमिच्छद्भिर्न वियंति स्म कर्हिचित् ॥३०॥ तेनाहं गुणपात्रेण श्रीनिवासेन सांप्रतं । शोचा
मि रहितं लोकं पाप्मना कलिनेक्षितं ॥३१॥ आत्मानं चानुशोचामि भवंतं चामरोत्तमं । देवान्पितॄनृषीन्साधून्सर्वान्वर्णांस्तथाश्रमान् ३२

यं । शौर्यं संग्रामोत्साहः । तेजः प्रभावः । बलं सत्त्वं । स्मृतिः कर्तव्यार्थानुसंधानं । स्वातंत्र्यं अपराधीनता । कौशलं क्रियानिपुणता । कांतिः
सौंदर्यं । धैर्यम् अव्याकुलता । मार्दवं चित्ताकाठिन्यं ॥२८॥ प्रागल्भ्यं प्रतिभातिशयः । प्रश्रयो विनयः । शीलं स्वसुभावः । सह ओजो बलानि मनसः । ला
ज्ञानेंद्रियाणां कर्मेंद्रियाणां च पाटवानि । भगः भोगास्पदत्वं । गांभीर्यं अक्षोभित्वं । स्थैर्यं अचंचलता । आस्तिक्यं श्रद्धा । कीर्तिर्यशः । मानः पू
ज्यत्वं । अनहंकृतिः गर्वाभावः ॥२९॥ एते एकोनचत्वारिंशत् अन्ये च ब्रह्मण्यत्वादयो महांतो गुणा यस्मिन्नित्याः सह ज्ञान न वियंति न क्षीयंते स्म
३० तेन गुणपात्रेण गुणालयेन पाप्मना पापहेतुना ॥३१॥

तस्य विरहो दुःसह इत्याह चतुर्भिः ब्रह्मादयो यस्याः श्रियः अपांगमोक्षः स्वस्मिन् दृष्टिपातः। तत्कामाः संतः बहुतिथं बहुकालं तपः स
मचरन् सम्यक् चरंति स्म भगवद्भिरुक्तमैः प्रपन्ना आश्रिता अपि सा श्रीः पद्मवनं अलमनुरक्ता सती सेवते ॥३३॥ तस्य भग
वतः श्रीमद्भिः पादैः केतुर्ध्वजः अब्जादयो केतानि चिह्नानि येषां तैः यद्वा अब्जादीनामाश्रयैः सम्यगलंकृतमंगं यस्याः साऽहं ततो भवतः ॥

वनं
ब्रह्मादयो बहुतिथं यदपांगमोक्षकामास्तपः समचरन् भगवत्प्रपन्नाः ॥ सा श्रीः स्ववासमरविंदं विहाय यत्पादसौभ
गमलं भजतेऽनुरक्ता ॥३३॥ यस्याहमब्जकुलिशांकुशकेतुकेतैः श्रीमत्पदैर्भगवतः समलंकृतांगी ॥ त्रीनत्यरोचउपल
भ्य ततो विभूतिं लोकान् स मां व्यसृजदुत्स्मयंतीं तदंते ॥३४॥ यो वै ममातिभरमासुरवंशराज्ञामक्षौहिणीशतमपानुददा
त्मतंत्रः। त्वां दुःस्थमूनपदमात्मनि पौरुषेण संपादयन् यदुषु रम्यमबि[illegible]भ्रदंगं ॥३५ म १

विभूतिं संपदं उपलभ्य प्राप्य त्रीन् लोकान् अतिक्रम्य अरोचे शोभितवत्यस्मि पश्चात्तस्याः विभूतेः रंतेनाशकाले सति उत्स्मयंतीं ग
र्वं कुर्वाणां मां व्यसृजत् त्यक्तवान् ॥३४॥ किंच यो वै आसुरवंशो येषां तेषां राज्ञां अक्षौहिणीशतरूपं ममातिभरं भारं अपनीतवान्
त्वां च ऊनपदत्वात् दुःस्थं संतं पौरुषेण पुरुषकारेण आत्मनि स्वस्मिन् संपूर्णपदं सुस्थं संपादयन् लक्षणहेत्वोः क्रियाया इति हेतौ ५८
शतृप्रत्ययः संपादयितुमित्यर्थः अबिभ्रत् धृतवानित्यर्थः ॥३५॥

तस्यविरहंकावासहेत।प्रेमावलोकश्चरुचिरंस्मितंवल्गुजल्पश्चतैर्मधुमानिनीनांसत्यभामादीनांसमानंगर्वसहितंतस्थैर्यंस्तब्धलंयः
अहरत्।समानमेकदेववा।यस्यांघ्रिरजस्तुल्यितेनविटंकिताया:।अलंकृताया:सद्रूपादिभिर्गुणैरोमोत्सवोभवति।।३६।।कथयतोः
सतोः।प्राचींपूर्ववाहिनींकुरुक्षेत्रे।।३७।।प्रथमेषोडशः।।ततःसप्तदशेराज्ञाकलेर्निग्रहउच्यते।तस्यैवंवीर्यजातोपिवैराग्यंवकुम

कावासहेतविरहंपुरुषोत्तमस्यप्रेमावलोकरुचिरस्मितवल्गुजल्पैः।।स्थैर्यंसमानमहरन्मधुमानिनीनांरोमोत्सवोममय
दंघ्रिविटंकिताया:।।३६।।तयोरेवंकथयतोःपृथिवीधर्मयोस्तदा।परीक्षिन्नामराजर्षिःप्राप्तःप्राचींसरस्वतीं।।३७।।इतिश्री
भागवतेमहापुराणेप्रथमस्कंधेषोडशोध्यायः।।१६।।सूतउवाच।।तत्रगोमिथुनंराजाहन्यमानमनाथवत्।।दंडहस्तंचवृष
लंददृशेनृपलांछनं।।१।।वृषंमृणालधवलंमेहंतमिवबिभ्यतं।।वेपमानंपदैकेनसीदंतंशूद्रताडितं।।२।।गांचधर्मदुघांदी
नांभृशंशूद्रपदाहतां।।विवत्सामश्रुवदनांक्षामांयवसमीहतीं।।३।।प्रपच्छरथमारूढःकार्तस्वरपरिछदं।।मेघगंभीरयावाचा
समारोपितकार्मुकः।।४।।कस्त्वंमच्छरणेलोकेबलाद्धंस्यबलावली।।नरदेवोसिवेषेणनटवत्कर्मणाद्विजः।।५।। श्री ।।

क्रितं।।१।।हन्यमानंताड्यमानं।।१।।मृणालंपद्मकंदस्तद्वद्धवलं।नयान्मेहंतंमूत्रयंतं।इत्येवंनेनपादावशेषोधर्मोभियान्मूत्रयन्निवप्रति भ
त्तणंत्री यमाणांशः।तस्यापिनिर्वेदाहात्कंपमानइवेतिदर्शितं।।२।।धर्मदुघांहविर्दोग्ध्रीं।क्षामांकृशां।यवसंतृणं।अत्रापिसस्यादिप्र
सवन्तयाद्धिवत्सेव।यज्ञाद्यभावात्।कृशा।अतएवयज्ञनागमिछंतीदृष्टीतिसूचितं।।३।।कार्तस्वरंस्वर्णंपरिच्छदःपरिकरोयस्यास्
तंनिबद्धमित्यर्थः।सज्जीकृतकार्मुकः।।४।।हंसिघातयसि।राजाहमितिचेत्तत्राह।नटवद्वेषमात्रेणनरदेवोऽसिकर्मणातुद्विजःशू
द्रः।।५।।

ना०भा० अशोच्यान्निरपराधान् रहसि स्वयं प्रहरसि। स शोच्यः सापराधोसि अतो वधमर्हसि ॥६॥ वृषं प्रत्याह। त्वं वा कः। स्वयमेव संज्ञापय
६० ति। किं कश्चिद्देवो वृषरूपेण प्राणान् परिखेदयन् परिवर्त्तसे ॥७॥ दोर्दंडैः परिरंभितवत्सु रत्नते भूतले ते शुचः ॥ अश्रूणि वि
ति ना अन्येषाम् अश्रूणि नानुपतंती रिव रहे तु त्वं दर्शितं ॥८॥ एवमुक्ते पुनरपि शोचंतं प्रत्याह। भोः सुरभेः पुत्र मा शुच शोकं मा कुरु ॥

कस्त्वं मच्छरणे लोके बलाद्धंस्यबलान्बली ॥ नरदेवोसि वेषेण नटवत्कर्मणा द्विजः ॥५॥ कस्त्वं कृष्णे गते दूरे सह गांडीव
धन्वना ॥ शोच्योऽस्यशोच्यान्रहसि प्रहरन्वधमर्हसि ॥६॥ त्वं वा मृणालधवलः पादैर्न्यूनः पदा चरन् ॥ वृषरूपेण किं कश्चि
द्देवो नः परिखेदयन् ॥७॥ न जातु कौरवेंद्राणां दोर्दंडपरिरंभिते ॥ भूतलेनुपतंत्यस्मिन्विना ते प्राणिनां शुचः ॥८॥ मा सौ
रभेयानुशुचो व्येतु ते वृषलाद्भयं ॥ मा रोदीरंब भद्रं ते खलानां मयि शास्तरि ॥९॥ यस्य राष्ट्रे प्रजाः सर्वास्त्रस्यंते साध्वसाधु
भिः ॥ तस्य मत्तस्य नश्यंति कीर्त्तिरायुर्भगो गतिः ॥१०॥ एष राज्ञां परो धर्मो ह्यार्त्तानामार्त्तिनिग्रहः ॥ अत एनं वधिष्यामि भूत
द्रुहमसत्तमं ॥११॥ कोऽवृश्चत्तव पादांस्त्रीन्सौरभेय चतुःपद ॥ मा भूवंस्त्वादृशा राष्ट्रे राज्ञां कृष्णानुवर्त्तिनां ॥१२॥ आख्याहि
वृष भद्रं वः साधूनामकृतागसां ॥ आत्मवैरूप्यकर्त्तारं पार्थानां कीर्त्तिदूषणं ॥१३॥

गो तु अपयानु गां प्रत्याह। अंब मातः शास्तरि मयि जीवति सति ते त्वमेव अतो मा रोदीः ॥९॥ मम हितार्थमेवैनं हनिष्यामि न तवोप
काराये त्याह। यस्येति द्वाभ्यां। हे साध्वि। सर्वा याः काश्चिदपीत्यर्थः। असाधुभिः त्रस्यंते पीड्यंत इत्यर्थः। भगो भाग्यं गतिः परलोकः ॥१०॥
११॥ पुनरपि शोचंतं वृषं प्रत्याह। कः अवृश्चत् अच्छिनत्। त्वादृशाः त्वद्विधा दुःखिताः रवोन्नद्ध मस्तु। आत्मनस्तव पादच्छेदेन वैरूप्यं कृतं च ६०
तां। कीर्त्तिं दूषयतीति तथा तं आख्याहि ॥१३॥

ननु तदाख्याने कृते कथं न दुःस्यादित्यत आह। यस्मादनागसि जने यः अयं दुःखं युंजन् कुर्वन् भवति अस्य एवंभूतस्य मतः सकाशा
त्सर्वत्रापि भयं भवति। ततः साधूनां भद्रं न वेदिति। एतस्य दंडे अहं असमर्थ इति मा शंकीत्याह। अनागःस्विति। आगस्कृतस्य परा
धकर्त्तामर्त्यस्य देवस्यापि भुजं आहर्त्तास्मि आहरिष्यामि। सांगदमित्यनेन मूलत उत्पाट्याहरिष्यामीति दर्शितं॥२४॥ नन्वेकस्या
निग्रहेणान्यस्यानुग्रहे तव किं प्रयोजनं तत्राह राज्ञो हीति। अन्यान् अधर्मिष्ठान् शासतः दंडयतः॥२५॥ आर्त्तानामभयं यस्मात्तद्वच

जनेनागस्यऽघं युंजन् सर्वतोस्य च मद्भयं॥ अनागःस्विह भूतेषु य आगस्कृन्निरंकुशः॥२४॥ आहर्त्तास्मि भुजं साक्षादम
र्त्यस्यापि सांगदं॥ राज्ञो हि परमो धर्मः स्वधर्मस्थानुपालनं॥ शासतोन्यान्यथाशास्त्रमनापद्युत्पथानिह॥२५॥ धर्म उवाच॥
एतद्वः पांडवेयानां युक्तमार्त्ताभयं वचः॥ येषां गुणगणैः कृष्णो दौत्यादौ भगवान् कृतः॥२६॥ न वयं क्लेशबीजानि यतः स्युः
पुरुषर्षभ॥ पुरुषं तं विजानीमो वाक्यभेदविमोहिताः॥२७॥ केचिद्विकल्पवसना आहुरात्मानमात्मनः॥ दैवमन्ये परे कर्म
स्वभावमपरे प्रभुं॥२८॥

वो युक्तं उचितमेव॥२६॥ वयं तु यतः पुरुषात् प्राणिनां क्लेशहेतवो भवेयुः। तं पुरुषं न विजानीमः। यतः वादिनां वाक्यभेदैः विमोहिताः॥
२७॥ वाक्यभेदानेवाह। विकल्पभेदं वसते आच्छादयंतीति ये योगिनः ते आत्मानमेवात्मनः। प्रभुं सुखदुःखप्रदमाहुः॥ तदुक्तं। आत्मै
व ह्यात्मनो बंधुरात्मैव रिपुरात्मन इति। यद्वा विकल्पैः कुतर्कैः आवृता नास्तिकाः। एवं हि ते वदंति। न तथा देवतादीनां प्रभुत्वं कर्मा
धीनत्वात्। अतः स्वयमेव प्रभुर्न चान्यः कश्चिदिति। अन्ये दैवज्ञाः दैवं ग्रहादिरूपां देवतां परे तु मीमांसकाः कर्म। अपरे लोकायतिकाः स्व
भावः॥२८॥

ना॰ प्र॰ ६१ केषविसेश्वरेषु मध्ये केषपीति दुर्लभत्वं दर्शितं। निश्चय इति सिद्धांतत्वं प्रतर्क्यात्। मनोगोचरात्। अनिर्देश्यात्। वचनैर्गोचरात्। परमे
श्वरात्संभवतीति। विमृश विचारय स्वबुद्ध्या॥१९॥ विखेदगतमोहः पर्यचष्ट प्रतिभाषत। ज्ञातवानितिवा॥२०॥ अनिर्धारितमिव
ब्रुवन् घातकं ज्ञानन्नपि नवदेदित्येवं रूपं धर्मं अब्रवीत्। किं अतो धर्मोसि। सूचनेको दोष इत्यत आह। स्थानं नरकादि॥२१॥ यद्यज्ञा
नादपि कथनं नभवतीत्याह। अथवेति। देवस्य मायाया गतिर्विध्यघातकलक्षणावृत्तिः। जंतूनां चेतसो वचसश्चागोचरे सुज्ञेयान

अप्रतर्क्यादनिर्देश्यादिति केषपि निश्चयः। अत्रानुरूपं राजर्षे विमृश स्वमनीषया॥१९॥ एवं धर्मे प्रवदति स सम्राड्द्विज
सत्तम॥ समाहितेन मनसा विखेदः पर्यचष्ट तं॥२०॥ धर्मं ब्रवीषि धर्मज्ञ धर्मोसि वृषरूपधृक्॥ यदधर्मकृतः स्थानं सूच
कस्यापि तद्भवेत्॥२१॥ अथवा देवमायाया नूनं गतिरगोचरा। चेतसो वचसश्चापि भूतानामिति निश्चयः॥२२॥ तपः शौ
चं दया सत्यमिति पादाः कृते कृताः॥ अधर्मांशैस्त्रयो भग्नाः स्मयसंगमदैस्तव॥२३॥ इदानीं धर्म पादस्ते सत्यं निर्वर्तयेद्य
तः॥ तं जिघृक्षत्यधर्मोयमनृतेनैधितः कलिः॥२४॥

भवतीति निश्चयः॥२२॥ धर्मोसावितिज्ञात्वा तस्य पादानुवादेन व्यवस्थामाह। तप इति द्वाभ्यां। अधर्मपादैस्त्रिभिरंशैस्तव त्रयः
पादा भग्नाः स्मयो विस्मयः॥२३॥ इदानीं कलौ हे धर्म ते पादः चतुर्थांशः चतुर्थोंशः। तत्रापि सत्यमेवास्ति। यतः सत्याद्भवान्नात्मा
नं निवर्तयेत्। कथंचिद्धारयेत्। यद्वा पुरुषस्त्वां साधयेत्। तमपि यादृशं अनृतेन संवर्द्धितः कलिरूपोऽयमधर्मो ग्रहीतुमिच्छति॥
तत्रेयं स्थितिः। कृतयुगे प्रथमं संपूर्णश्चतुष्पाद्धर्मः। त्रेतायां चतुर्णामपि पादानां मध्ये स्मयेन तपः संगेन शौचं मदेन दया ६१
अनृतेन सत्यमित्येवं चतुर्थांशो हीयते। द्वापरे त्वर्धांशः कलौ च चतुर्थांशो वशिष्यते सोप्यंतेनंक्ष्यतीति॥ ॥२४॥ श्री

न्यासितः अन्योन्यद्वारेणावतारितः । उरुर्गौरो यस्याः कृतं कौतुकं मंगलं यस्याः ॥२५॥ अश्रूणि कलयति मुंचतीत्यश्रुकला तेन
त्यक्ता सती शूद्रा मोक्ष्यंति मामिति शोचति ॥२६॥ निशातं निशितं अधर्मस्य हेतुर्यः कलिस्तं हंतुमित्यर्थः ॥२७॥ अभिप्रेत्य ज्ञा
त्वा ॥२८॥ शरण्यः आश्रयार्हः श्लोक्यः सत्कीर्त्यर्हः ॥२९॥ गुडाकेशोऽर्जुनः तस्य यशोधरा ते वयं तेषां तान् । प्रतिबद्धांजलिर्येन

इयं च भूर्भगवता न्यासितोरुभरा सती ॥ श्रीमद्भिस्तत्पदन्यासैः सर्वतः कृतकौतुका ॥२५॥ शोचत्यश्रुकला साध्वी दु
र्भगेवोज्झिताधुना ॥ अब्रह्मण्या नृपव्याजाः शूद्रा भोक्ष्यंति मामिति ॥२६॥ इति धर्मं महीं चैव सांत्वयित्वा महारथः ॥ निशात
मादद्दे खङ्गं कलयेधर्महेतवे ॥२७॥ तं जिघांसुमभिप्रेत्य विहाय नृपलांछनं ॥ तत्पादमूलं शिरसा समगाद्भयविह्वलः ॥२
त्त ८॥ पतितं पादयोर्वीरः कृपया दीनवत्सलः ॥ शरण्यो नावधीत् श्लोक्य आह चेदं हसन्निव ॥२९॥ राजोवाच ॥ न ते गुडाकेश
यशोधराणां बद्धांजले वै भयमस्ति किंचित् ॥ न वर्त्तितव्यं भवता कथंचित् क्षेत्रे मदीये त्वमधर्मबंधुः ॥३०॥ त्वां वर्त्तमानं न
२ रदेवदेहेष्वनुप्रवृत्तोयमधर्मपूगः ॥ लोभोनृतं चौर्यमनार्यमंहो ज्येष्ठा च माया कलहश्च दंभः ॥ न वर्तितव्यं तदधर्मबंधो
धर्मेण सत्येन च वर्त्तितव्ये ॥ ब्रह्मावर्त्ते यत्र यजंति यज्ञैर्यज्ञेश्वरं यज्ञवितानविज्ञाः ॥३२॥

तस्य ते किंतु । कथंचन केनाप्यंशेन न वर्त्तितव्यं । यस्मात्त्वमधर्मस्य बंधुः ॥३०॥ तदेवाह । राजदेहेषु वर्त्तमानं त्वामनु सर्वतः । अनार्यं
दौर्जन्यं । अंहः स्वधर्मत्यागः । ज्येष्ठा अलक्ष्मीः । माया कपटं ॥३१॥ तत्तस्मात वर्त्तितुमर्हे । ब्रह्मावर्त्तदेशे यज्ञस्य वितानं विस्तारस्तत्र विज्ञाः
निपुणाः ॥३२॥

इज्यायागस्तद्रूपा मूर्तिर्यस्यास्तं तेमं कामांश्चानन्विंदारयोदेवा इज्यंते न तु हरिस्तत्राह ॥ एषस्थावरशीनामात्मेति ॥ तथापि जीववल्लभ
रिति जल इत्याह ॥ अंतर्वहिरिति ॥ यथा वायुः प्राणरूपेणांतस्थोऽपि वहिर[illegible]स्ति त द्वत्सर्वांतर्यामीश्वरोपीति ॥३३॥ उद्यतासिं उ
द्धतखड्गं दंडपाणिं यमं ॥ उद्यतं उद्धतं ॥३४॥ अत्र न वस्तव्यमिति यातवाज्ञातया यत्र क्वापि वत्स्यामि किंतु ॥ तत्रापि आत्तः गृ
हीतः इषुः शरासनं च येन तं त्वामेवलक्षये ॥३५॥ तस्मात् नियतो निश्चलो वत्स्यामि ॥३६॥ पानं मद्यं हिंसा सूना प्राणिवधः ॥

यस्मिन् हरिर्भगवानिज्यमान इज्यात्ममूर्तिर्यजतां शं तनोति ॥ कामानमोघान्स्थिरजंगमानामंतर्वहिर्वायुरिवैष आत्मा
त ॥३३॥ सूत उवाच ॥ परीक्षितैवमादिष्टः कलिः संजातवेपथुः ॥ तमुद्यतासिमाहेदं दंडपाणिमिवोद्यतं ॥३४॥ यत्र क्वचन वत्स्या
मि सार्वभौम तवाज्ञया ॥ लक्षये तत्र तत्रापि [illegible]त्वामात्तेषुशरासनं ॥ तन्मे धर्मभृतां श्रेष्ठ स्थानं निर्देष्टुमर्हसि ॥ तत्रैव नियतो व
त्स्य आतिष्ठंस्तेनुशासनं ॥३६॥ सूत उवाच ॥ अभ्यर्थितस्तदा तस्मै स्थानानि कलये ददौ ॥ द्यूतं पानं स्त्रियः सूना यत्राधर्मश्चतु
र्विधः ॥३७॥

त द्यूते अनृतं ॥ पाने मदः ॥ स्त्रैणे मदो दयानाशकत्वेनोक्तः ॥ अत्र तु गर्व द्वारा तपोनाशकत्वेन ॥ स्त्रीषु संगः ॥ हिंसायां क्रौर्यं मा दयानाशकमिति ज्ञेयं ॥ यद्य
पि सर्वत्र संभवति तथाऽपि प्राधान्येनानृतादीनां द्यूतादिषु यथासंख्यं ज्ञेयं ॥ द्वादशस्कंधे तु सत्यं दया तपो दानमिति पादा विष्णोर्न्वे पेत्यत्र
दानशब्देन शौचमेवोक्तं ॥ मतः स्मृतिरूपलोभानृतान यद्दानस्यात्रेतानां धर्मपादानां तु यो शोहीयते शतैः ॥ अधर्मपादैरनृतहिंसासंतोषवि
ग्रहैरित्यत्र च अत्र संतोषशब्देन तस्य हेतुर्गर्वो लक्ष्यते ॥ विग्रहशब्देन च तद्धेतुः स्त्रीसंगः ॥३७॥

चतुर्विधस्याप्येकत्रैवस्थानंदेहीतिपुनर्याचमानायजातरूपंसुवर्णंदत्तवान् ततःसुवर्णदानात्अनृतंमदंकाममितिस्त्रीषुसंगोरज
इतिरजोमूलांहिंसां।एतानिचत्वारिपंचमंवैरंचाशादिति॥३९॥औत्तरेयेणपरीक्षिता।अमूनिअमूषुस्थानेषुन्यवसत्।इत्यर्थः॥३९॥
अथेतिहेतोः बुभूषुः तन्नवितुमिच्छुः॥स्त्रीसुवर्णयोरसेवनंनामतयोरनासक्तिः॥४०॥एवंकलिनिग्रहलक्षणस्यपाशान्प्रतिसंर

पुनश्चयाचमानायजातरूपमदात्प्रभुः॥ततोऽनृतंमदंकामंरजोवैरंचपंचमं॥३९॥अमूनिपंचस्थानानिह्यधर्मप्रभवः
कलिः।औत्तरेयेणदत्तानिन्यवसत्तन्निदेशकृत्॥३९॥अथैतानिनसेवेतबुभूषुःपुरुषःक्वचित्॥विशेषतोधर्मशीलोराजा
लोकपतिर्गुरुः॥४०॥वृषस्यनष्टांस्त्रीन्पादान्तपःशौचंदयामिति।प्रतिसंदधआश्वास्यमहींसमवर्धयत्॥४१॥सएष
एतर्ह्यध्यास्तआसनंपार्थिवोचितं॥पितामहेनोपन्यस्तंराज्ञारण्यंविविक्षता॥४२॥आस्तेऽधुनासराजर्षिःकौरवेंद्र
श्रियोल्लसन्॥गजाह्वयेमहाभागश्चक्रवर्तीबृहच्छ्रवाः॥४३॥इत्थंभूतानुभावोयमभिमन्युसुतोनृपः॥यस्यपालयतः
क्षोणीं यूयंसत्रायदीक्षिताः॥४४॥इतिश्रीभागवतेमहापुराणेप्रथमस्कंधेसप्तदशोध्यायः॥१७॥ ॥श्री॥ ॥

धते।तपआदीनिप्रवर्तितवानित्यर्थः॥४१॥युष्मदीयसत्रप्रवृत्तिरपितत्प्रभावादेवेत्याह त्रिभिः।एतर्हिइदानींयुधिष्ठिरेणार
ण्यंप्रवेष्टुमिच्छता।उपन्यस्तंसमर्पितंआसनमध्यास्ते॥४२॥४३॥अधुनापालयतइतिचवर्तमानसामीप्येवर्तमानवन्निर्देशः।स्मे
त्यध्याहारोवासत्रायसत्रंकर्तुंदीक्षिताःदीक्षांकृतवंतः॥४४॥ ॥इतिप्रथमेसप्तदशोध्यायः॥१७॥ ॥श्री॥ ॥

राज्ञस्तच्छरीरे तस्य ब्रह्मशापो निरूप्यते॥ स चानुग्रह एवास्य जातो वैराग्यमावहन्॥१॥ परीक्षितो निर्याणमत्याश्चर्यं वक्तुं तत्संभा
वनाय जन्माश्चर्यमनुस्मारयति यो वा इति विप्लुष्टो निर्दग्धः॥१॥ ब्रह्मकोपादुत्थितात्तक्षकात् यः प्राणविप्लवः प्राणनाशः तस्मादुरु
भयं तस्मान्न संमुमोह। अत्र हेतुः। यस्तु भगवत्येवार्पिताशय इति॥२॥ किं च उत्सृज्येति। वैयासकेः शुकस्य शिष्यः सन् विज्ञाताजि
तस्य हरेः संस्थितिस्तत्त्वं येन सः॥३॥ न चैतच्चित्रमित्याह। उत्तमश्लोकस्यैव वार्त्ता येषु अत एव नित्यं तत्कथारूपममृतं जुष

सूत उवाच॥ यो वै द्रौण्यस्त्रविप्लुष्टो न मातुरुदरे मृतः॥ अनुग्रहाद्भगवतः कृष्णस्याद्भुतकर्मणः॥१॥ ब्रह्मकोपोत्थिताद्यस्तु
तक्षकात्प्राणविप्लवात्॥ न संमुमोहोरुभयाद्भगवत्यर्पिताशयः॥२॥ उत्सृज्य सर्वतः संगं विज्ञाताजितसंस्थितिः॥ वैया
सकेर्जहौ शिष्यो गंगायां स्वं कलेवरं॥३॥ नोत्तमश्लोकवार्त्तानां जुषतां तत्कथामृतं॥ स्यात्संभ्रमोंतकालेऽपि स्मरतां तत्प
दांबुजं॥४॥ तावत्कलिर्न प्रभवेत्प्रविष्टोपीह सर्वतः॥ यावदीशो महानुर्व्यामाभिमन्यव एकराट्॥५॥ यस्मिन्नहनि य
र्ह्येव भगवानुत्ससर्ज गां॥ तदैवेहानुवृत्तोऽसावधर्मप्रभवः कलिः॥६॥ नानुद्वेष्टि कलिं सम्राट् सारंग इव सारभुक् कुश
लान्याशु सिध्यंति नेतराणि कृतानि यत्॥७॥

तां संभ्रमो न स्यात्॥४॥ तस्मिन् राज्ञि सति तरां तन्न चित्रमित्याशयेनाह तावदिति। अभिमन्योः पुत्रः एकराट् चक्रवर्ती ईशः पतिः तावत्
॥५॥ ननु तदा कलेरप्रवेश एवास्तु प्रविष्टोपि न प्राभवेदिति कुतः तत्राह॥ यस्मिन्नहनि यर्हि यस्मिन्नेव क्षणे गां पृथ्वीं अनुवृत्तः प्रविष्टः
अधर्मस्य प्रभवो यस्मिन्॥६॥ नन्वधर्महेतुं कलिं सर्वथा किं न हतवान् तत्राह नानुद्वेष्टीति॥ सारंगो भ्रमरः इव सारग्राही सारमाह॥ य
यस्मिन् कुशलानि पुण्यानि आशु संकल्पमात्रेण फलंति इतराणि पापानि आशु न सिध्यंति। यतस्तानि कृतान्येव सिध्यंति न संकल्प
मात्रेणेति॥७॥

ननुसोपाधिकात्।द्वेषएवयुक्तः।नधीरेषुतस्यकिंचित्करत्वादित्याह।किंन्विति।किंतुननवेत्।बालेषुअधीरेषुशूरेण।अप्रम
त्तःअवहितःसन्।योवृकइववर्त्तते॥८॥पारीक्षितमाख्यानं।अपृच्छत।एवं।तोयूयं॥९॥किंबहुनानरैरेतावदेवकर्त्तव्यमितिस
र्वशास्त्रसारंकथयति।यायाइति।कथनीयानिउरूणियस्यतस्य।गुणकर्मविषयाः।बुभूषुभिःसद्भावमिच्छद्भिः॥१०॥पुनर्वि
स्तरेणकथनार्थंस्तौति।किंतत्संगंचाभिनंदति।सूतेतित्रिभिः।शाश्वतीःसमाः।अनंतान्वत्सरान्जीव।अत्यंतसंयोगे।द्वितीयावि

किंनुबालेषुशूरेणकलिनाधीरभीरुणा।अप्रमत्तःप्रमत्तेषुयोवृकोनृषुवर्त्तते॥८॥उपवर्णितमेतद्वःपुण्यंपारी
क्षितंमया।वासुदेवकथोपेतमाख्यानंयदपृच्छत॥९॥यायाःकथाभगवतःकथनीयोरुकर्मणः।गुणकर्माश्रया
पुंभिःसंसेव्यास्ताबुभूषुभिः॥१०॥ऋषयऊचुः।सूतजीवसमाःसौम्यशाश्वतीर्विशदंयशः।यस्त्वंशंससिकृष्णस्यम
र्त्यानाममृतंहिनः॥११॥कर्मण्यस्मिन्ननाश्वासेधूमधूम्रात्मनांभवान्।आपाययतिगोविंदपादपद्मासवंमधु।
॥१२॥तुलयामलवेनापिनस्वर्गंनापुनर्भवं।भगवत्संगिसंगस्यमर्त्यानांकिमुताशिषः॥१३॥ श्री॥ ॥

शुकंपतः।कीर्त्तयसितच्चास्माकंमर्त्यानाममृतंमरणनिवर्तकं॥११॥किंचअस्मिन्कर्मणिसत्रेअनाश्वासेअविश्वसनीयेवैगुण्य
वाकल्येनफलनिश्चयाभावात्।धूमेनधूम्रःविवर्णःआत्माशरीरंयेषांतान्अस्मान्कर्मणिषष्ठी।आसवंमकरंदंमधुमधुरं॥१२
भगवत्संगिनोविष्णुभक्ताःतेषांसंगस्ययोलवःअल्पःतेनापिस्वर्गंनतुलयामःसमंनपश्यामःनचापवर्गंसंभावनायांलोट्॥
मर्त्यानांतुछाःआशिषोराज्याद्याःनतुलयामेतिकिमुतवक्तव्यं॥१३॥

एवं सत्संगमहिमानं दृष्ट्वा श्रवणोत्सुकत्वमाविःकुर्वंति को नामेति रसवित् रसज्ञः महत्तमानामेकांतेन परं श्रयनं आश्रयो यः तस्य
कथायां अगुणस्य प्राकृतगुणरहितस्य कल्याणगुणानामंतं ये योगेश्वराः ते पि न जग्मुः एतावंत इति न परिगणयांचक्रुः॥
भवः शिवः॥ पद्मः ब्रह्मा ते च मुख्या येषां ते॥१४॥ नोस्माकं मध्ये भगवान् प्रधानं सेव्यो यस्य सः भवान्नः शुश्रूषतां हरेश्चरितं वि
स्तारयतु॥१५॥ तत्र शुकपरीक्षित्संवादेन कथयेत्याह स वा इति द्वाभ्यां॥ वैयासकिना शब्दितेन कथितेन येन ज्ञानेन ज्ञानसा

को नाम तृप्येद्रसवित्कथायां महत्तमैकांतपरायणस्य॥ नांतं गुणानामगुणस्य जग्मुर्योगेश्वरा ये भवपद्ममुख्याः॥१४॥
तन्नो भवान्वै भगवत्प्रधानो महत्तमैकांतपरायणस्य॥ हरेरुदारं चरितं विशुद्धं शुश्रूषतां नो वितनोतु विद्वन्॥१५॥
स वै महाभागवतः परीक्षिद्येनाऽपवर्गाख्यमदभ्रबुद्धिः॥ ज्ञानेन वैयासकिशब्दितेन भेजे खगेंद्रध्वजपादमूलं॥१६॥
तन्नः परं पुण्यमसंवृतार्थमाख्यानमत्यद्भुतयोगनिष्ठं॥ आख्याह्यनंताचरितोपपन्नं पारीक्षितं भागवताभिरामं॥१७

धनेन अपवर्ग इत्याख्या यस्य तत् खगेंद्रध्वजस्य हरेः पादमूलं भेजे॥१६॥ ततः असंवृतार्थं यथा तथा आख्याहि इत्यग्रेतनेनैव निर्दिशति॥
परीक्षितेति पारीक्षितं आख्यानं श्रीभागवतं पुराणं परं पुण्यं सत्वशोधकं अत्यद्भुते योगे निष्ठा यस्य अनंतस्याचरितैरुपपन्नं
युक्तं अत एव भागवतानां अभिरामं प्रियं॥ एतैर्विशेषणैः॥ कर्मज्ञानभक्तियोगप्रकाशकत्वं दर्शितं॥१७॥ ॥श्री॥ ॥ ६४

श्रीभागवतव्याख्यानेन लब्धप्रसंगं महत्तमादरपात्रमात्मानं श्लाघते द्वाभ्यां। अहो इत्याश्चर्ये हर्षे वयमिति श्लाघायां प्रतिलोम-
जाता अपि अद्य जन्मभृतः सफलजन्मानः आस्म जाताः स्मः वृद्धानामनुवृत्त्या आदरेण ज्ञानवृद्धः शुकस्तस्य सेवयेति वा यतो दुःकुल
त्वतन्निमित्तं आधिं च मनःपीडां महत्तमानां अभिधानयोगः लौकिकोपि संभाषणलक्षणसंबंधः विधुनोति अपनयति॥१८॥
कुतः पुनः किं पुनर्वक्तव्यं तस्य अनंतस्य नाम गृणतः पुंसो महत्तमानामभिधानयोगाद्दौःकुल्यं विधुनोतीति। यद्वा नाम गृह्णतः

सूत उवाच॥ अहो वयं जन्मभृतोऽद्य हास्म वृद्धानुवृत्त्याऽपि विलोमजाताः॥ दौष्कुल्यमाधिं विधुनोति शीघ्रं महत्तमाना-
मभिधानयोगः॥१८॥ कुतः पुनर्गृणतो नाम तस्य महत्तमैकांतपरायणस्य। योऽनंतशक्तिर्भगवाननंतो महद्गुणत्वाद्य-
मनंतमाहुः॥१९॥ एतावतालं ननु सूचितेन गुणैरसाम्यानतिशायनस्य। हित्वेतरान्प्रार्थयतो विभूतिर्यस्यांघ्रिरेणुं जुष-
तेऽनभीप्सोः॥२०॥

कुतः पुनः दौःकुल्यमिति। यद्वा गृणतः पुंसस्तस्य नाम दौःकुल्यं विधुनोतीति किं वक्तव्यमिति कैमुत्यमेवाह। अनंताः शक्तयो यस्य स्वतोऽ
प्यनंतः किं च। महत्सु गुणा यस्य स महद्गुणस्तस्य भावस्तस्मात्। यं गुणतोऽप्यनंतमाहुः॥१९॥ एतत्प्रपंचयति त्रिभिः एतावतेति। तस्य पर
साम्यं अनतिशायनं च गुणैस्तत्साम्यं तदाधिक्यं चान्यस्य नास्तीत्यस्यार्थस्य ज्ञानं एतावता सूचितेन अलं पर्याप्तं कस्तत्। विस्तरतो वक्तुं शक्नो
ति। तदेवाह। इतरान् ब्रह्मादीन् प्रार्थयमानान् हित्वा विभूतिः श्रीः अनीप्सोरपि यस्यांघ्रिं सेवत इति॥२०॥

भा०प्र
६५

अथेत्यर्थांतरे। यस्य पादनखावसृष्टं निःसृतमपि। विरिंचेन ब्रह्मणा उपहृतं समर्पितं। अर्हणं पूजनं। अघौघरकं ईसहितं जगत्पुनाति वि
रिंचोपहृतं सेशामिति च तयोरेषु पात्राकल्पमुक्तं। तस्मात् मुकुंदव्यतिरिक्तः। को नाम भगवत्त्वस्यार्थः॥२२॥ धीराः संतः कुवंधृतं अत्यं
परमकाष्ठायन्नं तदाहर। यस्मिन्नहिंसा उपशाम स्व स्वाज्ञाविको धर्मः॥२३॥ एवं स्वजनाय मम जिनं यपारीक्षितो पाख्यानं वक्तुमाह अ
हं हीति। अर्यमणः हे सूर्याः त्रयीमूर्तयः अत्र यावानात्मावगमः मम ज्ञानं तावत्। आचक्षे प्रवक्ष्यामि। तथा हि पक्षिणो नभः आत्म

अथापि यत्पादनखावसृष्टं जगद्विरिंचोपहृतार्हणांभः॥ सेशं पुनात्यन्यतमो मुकुंदात्को नाम लोके भगवत्पदार्थः॥
॥२२॥ यत्रानुरक्ताः सहसैव धीरा व्यपोह्य देहादिषु संगमूढं॥ व्रजंति तत्पारमहंस्यमंत्यं यस्मिन्नहिंसोपशमः स्वधर्मः॥
२२॥ अहं हि पृष्टोऽर्यमणो भवद्भिराचक्ष आत्मावगमोऽत्र यावान्॥ नभः पतंत्यात्मसमं पतत्त्रिणस्तथा समं विष्णुगतिं
विपश्चितः॥२३॥ एकदा धनुरुद्यम्य विचरन्मृगयां वने॥ मृगाननुगतः श्रांतः क्षुधितस्तृषितो भृशं॥२४॥ जलाशय
मचक्षाणः प्रविवेश तमाश्रमं। ददर्श मुनिमासीनं शांतं मीलितलोचनं॥२५॥ प्रतिरुद्धेंद्रियप्राणमनोबुद्धिमुपारतं॥
स्थानत्रयात्परं प्राप्तं ब्रह्मभूतमविक्रियं॥२६॥

समं स्वशक्त्यानुरूपमेव पतंति न कृत्स्नं। तथा विपश्चितोऽपि विष्णोर्गतिं लीलां स्वमत्यनुरूपमेव तदंतीत्यर्थः॥२३॥२४॥ अचक्षाणः अ
पश्यन्। तं प्रतिरुद्धमाश्रमं। तस्मिन्मुनिं शमीकं॥२५॥ प्रतिरुद्धैः प्रत्याहृता इंद्रियाद्येन अत एव उपरतस्थानत्रयात्। जाग्रदादित्र
यात्परं तुरीयं पदं प्राप्तं। अत एव ब्रह्मभूतत्वादविक्रियं॥२६॥ ६५

विप्रकीर्णा निर्जटाभिराछिन्नं रुरुमृगविशेषः॥ तस्य चर्मणा चाछन्नं॥ विशेषेण शुष्यत्तालु यस्य सः॥ तथाभूतं मुनिं॥२७॥ न ल
ब्धं तृणं तृणासनं भूमिरुपवेशस्थानं च येन सः॥ न संप्राप्तोऽर्घः सूनृतं प्रियवचनं च येन स॥२८॥ मत्सरः तदुत्कर्षासहत्वं
२९॥ गतासुं मृतं॥ धनुःकोट्या चापाग्रेण॥३०॥ समाधिनिधाने राज्ञो निश्चायमाह॥ एष किं प्रत्याहृतसर्वेंद्रियः सन्नामीलितेक्षणः

विप्रकीर्णजटाछन्नं रौरवेणाजिनेन च॥ विशुष्यत्तालुरुदकं तथाभूतमयाचत॥२७॥ अलब्धतृणभूम्यादिरसंप्राप्तार्घ्यसू
नृतः॥ अवज्ञातमिवात्मानं मन्यमानश्चुकोप ह॥२८॥ अभूतपूर्वः सहसा क्षुत्तृड्भ्यामर्दितात्मनः॥ ब्राह्मणं प्रत्यभूद्ब्रह्मन्म
त्सरो मन्युरेव च॥२९॥ स तु ब्रह्मऋषेरंसे गतासुमुरगं रुषा॥ विनिर्गच्छन्धनुःकोट्या निधाय पुरमागमत्॥३०॥ एष किं नि
भृताशेषकरणो मीलितेक्षणः॥ मृषासमाधिराहोस्वित्किंनु स्यात्क्षत्रबंधुभिः॥३१॥ तस्य पुत्रोऽतितेजस्वी विहरन्बालको
ऽर्भकैः॥ राज्ञाघं प्रापितं तातं श्रुत्वा तत्रेदमब्रवीत्॥३२॥ अहो अधर्मः पालानां पीव्नां बलिभुजामिव॥ स्वामिन्यघं यद्दासानां द्वार
पानां शुनामिव॥३३॥ ब्राह्मणैः क्षत्रबंधुर्हि द्वारपालो निरूपितः॥ स कथं तद्गृहे द्वाःस्थः सभांडं भोक्तुमर्हति॥३४॥ कृष्णे गते भग
वति शास्तर्युत्पथगामिनां॥ तद्भिन्नसेतूनद्याहं शास्मि पश्यत मे बलं॥३५॥

स्थितः यद्वा क्षत्रबंधुभिरागतैर्वा किं न स्यादित्यवज्ञया मृषासमाधिः सन्निति जिज्ञासयेत्यर्थः॥३१॥ तस्य पुत्रः शृंगी नाम॥ अघं दुःखं॥
तत्राश्रमे कमध्ये॥३२॥ पालानां राज्ञां॥ पीव्नां पुष्टानां॥ अघमेव निर्दिशति॥ स्वामिनि दासानां॥ यद्यथा पार्श्वचरणं बलिभुजां काकानामिव द्वा
रपालानां शुनामिव चेति॥३३॥ दासत्वं दर्शयति ब्राह्मणैरिति॥ सभांडं भांडउद्वस्थितं॥३४॥ तत तदंतरमहं शास्मि दंडयामि॥३५॥ ॥

ना०प्र० इतिवयस्यानुक्त्वारोषेणताम्रेक्षणोयस्यकौशिकीनदीतस्याअपःसंधिरार्षः॥वाग्वज्रंशापं॥३६॥इतिएवंसर्पनिःक्षेपेणदंक्ष्यतिन
६६ न्तयिष्यति॥धक्ष्यतीतिपाठांतरेभस्मीकरिष्यति॥स्मेतिपादपूरणे॥तुलंरूपांगारतुल्यं॥मेमया॥ततेतिकृस्वमार्षं॥३७॥गलेसर्प्पक
लेवरंसर्प्पशरीरं॥यस्येत्यलुकसमासः॥मुक्तकंठःउच्चैरित्यर्थः॥३८॥३९॥तंसर्प्पंविसृज्य॥केनापकारःकृतः॥४०॥अनभिनंदन

इत्युक्त्वारोषताम्राक्षोवयस्यानृषिबालकान्॥कौशिक्यांउपस्पृश्यवाग्वज्रंविससर्जह॥३६॥इतिलंघितमर्यादंतत्तकःसप्त
मेऽहनि॥दंक्ष्यतिस्मकुलांगारंचोदितोमेततद्रुहं॥३७॥ततोऽभ्येत्याश्रमंबालोगलेसर्प्पकलेवरं॥पितरंवीक्ष्यदुःखार्त्तोमुक्त
कंठोरुरोदह॥३८॥सवाआंगिरसोब्रह्मन्श्रुत्वासुतविलापनं॥उन्मील्यशनकैर्नेत्रेदृष्ट्वास्वांसेमृतोरगं॥३९॥विसृ
ते ज्यपुत्रंपप्रच्छवत्सकस्माद्धिरोदिषि॥केनवाप्रतिकृतमित्युक्तःसन्यवेदयत॥४०॥निशम्यशप्तमतदर्हंनरेंद्रंसब्राह्मणो
नात्मजमभ्यनंदत॥अहोबताहोमहदद्यतेकृतमल्पीयसिद्रोहउरुर्दमोधृतः॥४१॥नवैनृभिर्नरदेवंपराख्यंसंमातुमर्ह
स्यविपक्वबुद्धे॥यत्तेजसादुर्विषहेणगुप्ताविंदंतिभद्राण्यकुतोभयाःप्रजाः॥४२॥अलक्ष्यमाणेनरदेवनाम्निरथांग
पाणावयमंगलोकः॥तदाहिचौरप्रचुरोविनंक्ष्यत्यरक्ष्यमाणोऽविवरूथवत्क्षणात्॥४३॥ ग

वाक्यंअहोइत्यादिवतकष्टंतेत्वयामहत्पापंकृतंद्रोहेअपराधेदमोदंडः॥४१॥परःविष्णुरित्याख्यातिर्यस्यतंनरदेवंनृभिःसंमातुं
समंद्रष्टुं॥४२॥अलक्ष्यमाणे॥अदृश्यमाने॥अविरूथवत्॥मेषसंघवत्॥४३॥ ६६

नष्टोनाथोयस्यलोकस्यतस्यवसोःवसुनोधनस्यलुंपकात्परहर्तुश्चोरादेःहेतोर्यत्पापंतद्भविष्यतितत्अस्मन्निमित्तत्वादस्मानुपैष्य
ति।अनन्वयंअनन्यमेव।तदेवपापंदर्शयतिपरस्परमिति।शपंतिपरुषंवदंति।पश्वादीन्वृंजतेअपहरंतीति।पुरुदस्यवःपौर्वि
ऊलाः॥४४॥आर्यधर्मःसदाचारःशुनांकपीनामिवचार्थकामयोरेवाभिनिवेशितचित्तानां॥४५॥एवंराजमात्रस्यशापानर्हत्वमुक्त्वाअस्य
तेपरीक्षितितिविशेषमाह।धर्मपालइतिसार्धेन।हयमेधयाट्अश्वमेधयाजी॥४६॥अस्यमहापापस्यान्यत्प्रायश्चित्तमदृष्ट्वाप्राप

तदद्यनःपापमुपैत्यनन्वयंयन्नष्टनाथस्यवसोर्विलुंपकात्।परस्परंघ्नंतिशपंतिवृंजतेपशून्स्त्रियोर्थान्पुरुदस्यवोजनाः॥४४॥
तदार्यधर्मःप्रविलीयतेनृणांवर्णाश्रमाचारयुतस्त्रयीमयः।ततोर्थकामाभिनिवेशितात्मनांशुनांकपीनामिववर्णशंकरः
॥४५॥धर्मपालोनरपतिःसतुसम्राट्बृहच्छ्रवाः।साक्षान्महाभागवतोराजर्षिर्हयमेधयाट्।क्षुत्तृट्श्रमयुतोदीनोनैवास्मच्छा
पमर्हति॥४६॥अपापेषुस्वभृत्येषुबालेनापक्वबुद्धिना।पापंकृतंतद्भगवान्सर्वात्माक्षंतुमर्हति॥४७॥तिरस्कृताविप्रल
ब्धाःशप्ताःक्षिप्ताहताअपि।नास्यतत्प्रतिकुर्वंतितद्भक्ताःप्रभवोपिहि॥४८॥इतिपुत्रकृताघेनसोनुतप्तोमहामुनिःस्वयंविप्र
कृतोराज्ञानैवाघंतदचिंतयत्॥४९॥प्रायशःसाधवोलोकेपरैर्द्वंद्वेषुयोजिताः।नव्यथंतिनहृष्यंतियतआत्मागुणाश्रयः॥५०॥

इतिश्रीभागवतेमहापुराणेप्रथमस्कंधेअष्टादशोध्यायः॥१८॥

मावेदयन्भगवंतंप्रार्थयतेअपापेष्विति॥४७॥राज्ञाचेत्प्रतिशापंदद्यात्।तर्हिनिःकृतिर्भवेत्।अपितत्तुनसंभवतितस्यभागवतत्वादित्याह
तिरस्कृताइति।तिरस्कृताःनिंदिताः।विप्रलब्धाःवंचिताः।क्षिप्ताः।अवज्ञाताः।हताःताडिताः।अस्यतिरस्कारिकर्तुः।नतत्प्रतीकारंकुर्वंतितद्भ रा
क्ताःविभुभक्ताःप्रभवःसमर्थाअपि॥४८॥विप्रकृतःअपकृतः।अघंअपराधं॥४९॥युक्तंचैतदित्याह।प्रायशइति।द्वंद्वेषुखादिषु।आत्मागुणा सु
श्रयःसुखदुःखाद्याश्रयोनभवति॥५०॥इतिप्रथमेअष्टादशः॥१८॥

प्रायोपविष्टो गंगायां राज्ञि योगिजनाहृते। शुकस्यागमनं तत्र प्रोक्तमेकोनविंशके॥१॥ स्वकृतं तत् कर्म मुनिस्कंधे सर्प्पअर्पणं। गर्हितं निंद्यं
चिंतमन् सुदुर्मना जातः चिंतामेवाह। अहो इति साक्षिप्यानीयं(?)चं पापं। अमीवमिति पापवेसए वार्थः। ब्रह्मणि ज्ञास्त्रेणे। गूढं गुप्तं तेजो
यस्य॥२॥ कृतं यद्देवहेलनं [stain] ईश्वरावज्ञापापमित्यर्थः। तस्मान्मे व्यसनं नविष्यति तत्तु नातिदीर्घात् कालात् अचिरादेवास्तु। तत्रा ऽ
पि अद्य साक्षात् न पुनः रिति द्वारेणेति प्रार्थनाकामं असंकोचतः। एवं प्रार्थनायाः प्रयोजनं। अघनिःकृताय प्रायश्चित्ताय यथा पु

सूत उवाच॥ महीपतिस्त्वऽथ तत्कर्म गर्ह्यं विचिंतयन्नात्मकृतं सुदुर्मनाः। अहो मया नीचमनार्यवत् कृतं निरागसि ब्रह्मणि गू
ढतेजसि॥१॥ ध्रुवं ततो मे कृतदेवहेलनाद् दुरत्ययं व्यसनं नातिदीर्घात्। तदस्तु कामं मघनिःकृताय मे यथा न कुर्यां पुनरेवम
द्धा॥२॥ अद्यैव राज्यं बलमृद्धकोशं प्रकोपितब्रह्मकुलानलो मे। दहत्वभद्रस्य पुनर्न मे ऽभूत्पापीयसी धीर्द्विजदेवगोभ्यः॥
३॥ स चिंतयन्नित्थमथाशृणोद्यथा मुनेः सुतोक्तो निर्ऋतिस्तक्षकाख्यः॥ स साधु मेने [stain] न चिरेण तक्षकानलं प्रसक्तस्य विरक्ति
कारणं॥४॥

नरेवं न कुर्यामिति च॥२॥ एवं साक्षात् स्वस्यैव व्यसनं प्रार्थ्य ततः प्रागेव किंचित् प्रार्थयते॥ अद्येति। अद्यैव मे रा[stain]ज्यादि दहतु॥ प्रकोपि
तं ब्रह्मकुलमेवानलः पुनर्द्विजादीन् प्रति उपितुं धीर्मे माभूत् तन्नवेदित्यर्थः॥३॥ इत्थं चिंतयन् राजा मुनेः सुतेनोक्तः सप्तमेहनि निर्ऋति
र्मृत्युर्यथा भविष्यति तथाशृणोत्। शमीकप्रेषितात् शिष्यात्। अकृत्वा च सः। तत्तक्षकस्य विषाग्निं साधु मेने यतो विषयेषु प्रसक्तस्य विर
क्तिकारणं॥४॥ ६७

अथोनंतरमुमौ लोकौ पुरस्तात् राज्य[illegible]मध्य एव हेयतया विचारितौ तौ विहाय। श्रीकृष्णांघ्रिसेवामेव अधिमन्यमानः सर्वपुरुषार्थाधि
कां जानन् प्रा[illegible]यमनशनं तस्मिन्नित्यर्थः। तत्त्वं कल्पेनोपाविशदिति यावत्। यद्वा प्रायं कृच्छ्रमयनं शरणं यथा भवति तथा॥५॥ अमर्त्य
नद्यामिति विशेषणस्य फलमाह। येति। या गंगा लसंती श्रीर्यस्याः तुलस्याः तयात्ममात्म श्रीः ये कृष्णांघ्रिरेणवः तैरभ्यधिकं सर्वोत्
कृष्टं यदंबु तस्य नेत्री तद्वाहिनी। उभयत्र अंतर्बहिः सेशान् लोकपालैः सहितान् लोकान् पुनाति मरिष्यमाणः। आसन्नमरणः मर

अथो विहायेमममुं च लोकं विमर्शितौ हेयतया पुरस्तात्॥ कृष्णांघ्रिसेवामधिमन्यमान उपाविशत्प्रायममर्त्यनद्यां॥५॥ या
वै लसच्छ्रीतुलसीविमिश्रकृष्णांघ्रिरेण्वभ्यधिकांबुनेत्री॥ पुनाति लोकानुभयत्र सेशान् कस्तां न सेवेत मरिष्यमाणः॥६॥ इति
व्यवच्छिद्य स पांडवेयः प्रायोपवेशं प्रति विष्णुपद्यां॥ दध्यौ मुकुंदांघ्रिमनन्यभावो मुनिव्रतो मुक्तसमस्तसंगः॥७॥ तत्रोपज
ग्मुर्भुवनं पुनाना महानुभावा मुनयः सशिष्याः॥ प्रायेण तीर्थाभिगमापदेशैः स्वयं हि तीर्थानि पुनंति संतः॥८॥ ॥श्री॥

णस्यानियतकालत्वात्॥ सर्वोपि तथा। अतस्तां को न सेवेत॥६॥ इति एवं विष्णुपद्यां गंगायां प्रायोपवेशं प्रति व्यवच्छिद्य निश्चित्य पांडवे
य इति। ततः कुलोचितत्वं दर्शयति। नास्य अन्यस्मिन् भावो यस्य सः। कुतः मुनिव्रतः। उपशांतत्वं कुतः मुक्तः समस्तसंगो येन सः॥७॥ त
ना तत्र तदा तद्दर्शनार्थं मुनयः उपागताः न तु तीर्थस्नानार्थं कृतार्थत्वात्। न तु तादृशानामपि तीर्थयात्रा दृश्यते तत्राह प्रायेणेति तीर्थयात्राव्याजैः
॥८॥

ना० प्र० णारणाच्चरुणादयः कांडर्षिविशेषेण ह्यद्विर्दिष्टाः ॥ नानार्षेन्यार्षेयाणि ऋषीणां गोत्राणि तेषु प्रवरान् अशेषान् ॥ शिरसांस्तु वंद
६८ ह्याववंदे ॥ २२ ॥ विज्ञापनार्थं पुनः कृतप्रणामः ॥ विविक्तमुद्वं चेतो यस्य ॥ अनिगृहीतौ संयोजितौ पाणी येन सः स्वचिकीर्षितं ज्ञापयोप

अत्रिर्वसिष्ठश्च्यवनः शरद्वानरिष्टनेमिर्भृगुरंगिराश्च ॥ पराशरो गाधिसुतोऽथ राम उतथ्य इंद्रप्रमदेध्मवाहौ ॥ ४ ॥ मेधाति
थिर्देवल आर्ष्टिषेणो भारद्वाजो गौतमः पिप्पलादः ॥ मैत्रेय और्वः कवषः कुंभयोनिर्द्वैपायनो भगवान्नारदश्च ॥ ५ ॥ अन्ये च
देवर्षिब्रह्मर्षिवर्या राजर्षिवर्या अरुणादयश्च ॥ नानार्षेयप्रवरान् समेतानभ्यर्च्य राजा शिरसा ववंदे सुखोपविष्टेष्वथ ते
षु भूयः कृतप्रणामः स्वचिकीर्षितं यत् ॥ विज्ञापयामास विविक्तचेता उपस्थितोऽप्रगृहीतपाणिः ॥ परीक्षित्तु वाच ॥ अ
हो वयं धन्यतमा नृपाणां महत्तमानुग्रहणीयशीलाः ॥ राज्ञां कुलं ब्राह्मणपादशौचाद्दूराद्विसृष्टं बत गर्ह्यकर्म ॥ २३ ॥

वेशनादि युक्तमयुक्तं वेति विज्ञापयामास ॥ २२ ॥ अनुमोदनेनानुग्रहमालक्ष्य आत्मानं श्लाघते ॥ अहो इति ॥ नृपाणां मध्ये महत्तमैरनु
ग्रहणीयं शीलं वृत्तं येषां ॥ एतच्च राज्ञामतिदुर्लभमित्याह ॥ ब्राह्मणानां पादशौचात् पादक्षालनोदकात् दूरात् उच्छिष्टविण्मूत्रपा
तंजविससमुत्सर्जेदिति स्मृतेः दूरे हितैः ॥ तद्विसृष्टं त्यक्तं ततोऽपि दूरादेव विसृष्टं ते संतत्रास्था तुं अयोग्यमित्यर्थः ॥ गर्ह्यं कर्म यस्य त्वात्मान ६८
मुद्दिश्योक्तं ॥ २३ ॥

आस्तांतावदनुग्रहः।ब्रह्मशापोऽपिभगवत्प्रसादादेवजातइत्याह।।तस्यगर्ह्यकर्मण एवंअघस्यपापात्मनः।।गृहेष्वाशक्तचित्त
स्यमेस्वआस्तयेपराभवाणमीशाएवंद्विजशापतयाभवन्भूवा।यत्रयस्मिन्शापेसतिगृहेषुप्रसक्तोऽभयंधत्तेनिर्विणोभवति।यतो

तस्यैवमेघस्यपरावरेशोव्यासक्तचित्तस्यगृहेष्वभीक्ष्णं।।निर्वेदमूलोद्विजशापरूपोय
त्रप्रसक्तोभयमाशुधत्ते।।१४।।तंमोपयातंप्रतियंतुविप्रागंगाचदेवीधृतचित्तमीशे।द्वि
त जोपसृष्टःकुहकस्तक्षकोवादशत्वलंगायतविष्णुगाथाः।।१५।।पुनश्चभूयाद्भगवत्यनंते
रतिप्रसंगश्चतदाश्रयेषु।।महत्सुयांयामुपयामिसृष्टिंमैत्र्यस्तुसर्वत्रनमोद्विजेभ्यः।।१६।।

निर्वेदमूलःवैराग्यंमूलंआक्षिर्करणं।यस्मिन्स्वस्यवैराग्यप्राप्यत्वात्तस्यचभय मूलत्वात्तदर्थेद्विजशापंकारितवानित्यर्थः।।१४।।
तान्प्रार्थयतेद्वाभ्यां।तंमामां।उपयातंशरणागतंप्रतियंतुजानंतु।।देवीदेवतारूपागंगाचजानंतु।वाशब्दःप्रतिक्रियानादरेगाथाः
कथाः।।१५।।सत्र्रनंतःआश्रयोयेषांतेषुप्रकृष्टःसंगोऽभूयात्।तस्यांतस्यांसृष्टौजन्मनि।।१६।।

भा०प्र० अध्यवसायो निश्चयः॥ प्रागग्रेषु कुशेषु आस्ते स्म। स्वसुते जनमेजये न्यस्तो भारो राज्यं येन सः॥१७॥ प्रसूनैः मुदा व्यकिरन्। देवसंघैर्वा
६८ निनै दितैर्नेदुः॥१८॥ प्रजानुग्रहे शीलं स्वभावः सारो बलं च येषां उत्तमश्लोकगुणैरभिरूपं सुंदरमिव॥१९॥ न वत्सु पांडोर्वंश्येषु येज
हुरिति युधिष्ठिराद्यभिप्रायेण॥२०॥ परस्परं संमंत्र्य ते सर्वे इति। परं श्रेष्ठं लोकमिति। तत्र हेतुः विरजस्कं निर्मोयं विशोकं च यास्यती

इति स्म राजाध्यवशाययुक्तः प्राचीनमूलेषु कुशेषु धीरः॥ उदङ्मुखो दक्षिणकूल आस्ते समुद्रपत्न्याः स्वसुतेन्यस्तभारः॥१७॥
एवं च तस्मिन्नरदेवदेवे प्रायोपविष्टे दिवि देवसंघाः॥ प्रशंस्य भूमौ व्यकिरन्प्रसूनैर्मुदा मुहुर्दुंदुभयश्च नेदुः॥१८॥ महर्ष
यो वै समुपागता ये प्रशंस्य साध्वित्यनुमोदमानाः॥ ऊचुः प्रजानुग्रहशीलसारा यदुत्तमश्लोकगुणाभिरूपं॥१९॥ न वा इदं राज
र्षिवर्य चित्रं भवत्सु कृष्णं समनुव्रतेषु॥ येध्यासनं राजकिरीटजुष्टं सद्यो जहुर्भगवत्पार्श्वकामाः॥२०॥ सर्वे वयं तावदिहा
स्महेथ कलेवरं यावदसौ विहाय॥ लोकं परं विरजस्कं विशोकं यास्यत्ययं भागवतप्रधानः॥२१॥ आश्रुत्य तदृषिगणैः प वच:
रीक्षित्समं मधुच्युद्गुरु चाव्यलीकं॥ आभाषतैनानभिनंद्य युक्तं शुश्रूषमाणश्चरितानि विष्णोः॥२२॥ समागताः सर्वत एव
सर्वे वेदा यथा मूर्त्तिधरास्त्रिपृष्ठे॥ नेहाथवाऽमुत्र च कश्चनार्थ ऋते परानुग्रहमात्मशीलं॥२३॥ ॥श्री॥ ॥श्री॥ ॥श्री॥

ति कुतस्तत्राह। अयमिति॥२१॥ आश्रुत्य आकर्ण्य समं पक्षपातशून्यं मधुच्युत् अमृतस्राविः अव्यलीकं सत्यं॥२२॥ त्रयाणां लोकानां पृ
ष्ठे उपरि सत्यलोके वेदा यथा मूर्त्तिधरा भवंति। तत्तुल्याः ज्ञानातिशययुक्ताः कृपालुतामाह नेहेति। भवतां प्रयोजनं परानुग्रहं विना नाः॥ ६८
स्ति तर्हि स एवार्थः स्यात् आत्मशीलं स्वभावं॥२३॥

एतां दृष्ट्वा विप्रस्य विद्यासंकल्पात्। एवं कर्त्तव्यमित्यस्य भाव इति कल्पता तस्मिन् विषये सर्वात्मना सर्वावस्थासु कृत्वा। विशेषतस्तु म्रिय
माणैः। तत्र प्रसुद्धं पापसंपर्करहितं ग्राममशात विचारयत।।२४।। तत्र तेषु यागयोगतपोदानादिभिर्निर्विवरमानेषु सत्सु यदृच्छया गां पर्यटमानः
व्यासपुत्रः तत्र अनवतग्रामः। नलस्य मा अमा दिलिंगं यस्य अवधूतः अवज्ञाय जनैस्त्यक्तो यः तस्यैव वेषो यस्य।।२५।। तमित्यादीनां प्रत्युत्थि
ता इति तृतीयश्लोकेनान्वयः। द्विगुणान्यष्टौ वर्षाणि यस्य सुकुमारौ पादौ ऊरू बाहू अंसौ कपोलौ गात्रं च यस्य चारु अत्तणीयस्मिन् उन्नता

ततश्च वः पृच्छ्यमिमं विपृच्छे विश्रभ्य विप्रा इति कृत्यतायां।। सर्वात्मना म्रियमाणैश्च कृत्यं शुद्धं च तत्रामृशताभियुक्ताः।२४।। तत्रा
भवद्भगवान्व्यासपुत्रो यदृच्छया गामटमानोनपेक्षः। अलक्ष्यलिंगो निजलाभतुष्टो वृतश्च बालैरवधूतवेषः।।२५।। तं द्व्यष्टवर्षं सु
कुमारपादकरोरुबाह्वंशकपोलगात्रं।। चार्वायताक्षोन्नसतुल्यकर्णसुभ्र्वाननं कंबुसुजातकंठं।।२६।। निगूढजत्रुं पृथुतुंग
वक्षसमावर्त्तनाभिं वलिवल्गुदरं च।। दिगंबरं वक्त्रविकीर्णकेशं प्रलंबबाहुं स्वमरोत्तमाभं।।२७।। श्यामं सदापीव्यवयोंगल
क्ष्म्या स्त्रीणां मनोज्ञं रुचिरस्मितेन।। प्रत्युत्थितास्ते मुनयः स्वासनेभ्यस्तल्लक्षणज्ञा अपि गूढवर्च्चसं।।२८।। श्रीकृष्णायेनमः।

नासा यस्मिन् तां वक्त्रस्यादि वैषम्यं विना तुल्यौ कर्णौ यस्मिन् शोभने भ्रुवौ यस्मिन्। एवंभूतमाननं यस्य। कंबुवद्रेखात्रयांकितः सुष्ठु जातः कंठो
यस्य।।२६।। कंठस्याधोभागयोः अस्थिते अस्थिनी जत्रुणी मांसेन निगूढे जत्रुणी यस्य। आवर्त्तनाभिर्यस्य वलिभिस्तिर्यक् निम्नरेखाभिर्वल्गुर
म्यमुदरं यस्य दिश एव अंबरं यस्य। वक्त्रे विकीर्णाः केशा यस्य। प्रलंबौ बाहू यस्य। स्वमरेषु श्रेष्ठेषु उत्तमो हरिस्तद्वत् आभा यस्य।।२७।। तदा अ
पीच्यं अत्यंतोत्तमं। यद्वयो यौवनं तेन या अंगलक्ष्मीर्देहकांतिः तया रुचिरस्मयेन च। गूढवर्च्चसमपि प्रत्युत्थिताः तं दृष्ट्वा प्रत्युद्गमं कृतवंत इत्यर्थः
२८।

शिरसैवसपर्यामाजहार आत्मनिवेदनंकृतवान्॥ तेनसहागतास्तपल्लादयोनिवृत्ताः॥ सउपविवेशसंधिरार्षः॥२९॥ सभगवान्ब्रह्मसंघा
दिभिःसंवृतःसन्॥ अलंव्यरोचत ग्रहाःशुक्रादयःकृष्णान्यस्यन्यादीनि॥ अन्यास्ताराः॥३०॥ नकुंभसर्वार्थेशुभेधायस्या॥ प्रश्नार्थेपुन

सविद्युरातोतिथयआगतायतस्मैसपर्यांशिरसाजहार॥ ततोनिवृत्ताःसुऽबुधास्त्रियोऽन्येकामहासनेसोपविवेशपूजितः॥२९॥
ससंवृतस्तत्रमहान्महीयसांब्रह्मर्षिराजर्षिदेवर्षिसंघैः॥ व्यरोचतालंभगवान्यथेंदुर्ग्रहैस्तारानिकरैःपरीतः॥३०॥ प्र
शांतमासीनमकुंठमेधसंमुनिंनृपोभागवतोऽभ्युपेत्य॥ [illegible]म्यमूर्ध्नाऽवहितःकृतांजलिर्नत्वागिरासूनृतयान्वपृच्छत॥३१॥
अहोअद्यवयंब्रह्मन्सत्सेव्याःक्षत्रबंधवः॥ कृपयाऽतिथिरूपेणभवद्भिस्तीर्थकाःकृताः॥३२॥ येषांसंस्मरणात्पुंसांसद्यःशु
द्ध्यंतिवैगृहाः॥ किंपुनर्दर्शनस्पर्शपादशौचासनादिभिः॥३३॥ सांनिध्यात्तेमहायोगिन्पातकानिमहांत्यपि॥ सद्योनश्यंति
वैपुंसांविष्णोरिवसुरेतराः॥३४॥ अपिमेभगवान्प्रीतःकृष्णःपांडुसुतप्रियः॥ पैतृष्वसेयप्रीत्यर्थंतद्गोत्रस्यात्तबांधवः॥३५

नत्वा॥३१॥ सूनृतांगिरमाह॥ अहोइतिपंचभिः सतांसेव्याजाताः॥ यतः अतिथिरूपेणहेतुनातीर्थकायोग्याःकृताः॥३२॥ वि
ष्णोःसान्निध्यादसुरागयादयइव॥३४॥ पांडुसुता[illegible]ः श्रीकृष्णः अद्यमेप्रसन्नोजातः अतस्तेषांपैतृष्वस्रेयाणांप्रीत्यर्थंतद्गो
त्रस्यमेआत्तंस्वीकृतंधवंबंधुकृत्यंयेनसः॥३५॥

बां

भा०प्र अन्यथा श्रीकृष्णप्रसादं विना तव दर्शनं कथं अस्मदादीनां तत्रापि नितरां म्रियमाणानां स्यात् ॥ अव्यक्ता गतिर्यस्य सः ॥ विनयिता
७१ याचयिता वनयिता तमो वनीयान् ॥ तस्य अत्युदारतया मां याचस्वेति प्रवर्तकस्येत्यर्थः ॥३६॥ सम्यक्सिद्धिर्यस्मात्तं यत्कार्यं
कर्त्तुं योग्यं कर्त्तव्यत्वावश्यकमिति भेदः ॥३७॥ विपर्यये अश्रोतव्यादि ॥३८॥ तद्दर्शनस्य पुनर्दुर्लभत्वादिदानीमेव कथयनीय

अन्यथा तेव्यक्तगतेर्दर्शनं नः कथं नृणां ॥ नितरां म्रियमाणानां संसिद्धस्य वनीयसः ॥३६॥ अतः पृछामि संसिद्धिं योगिनां
परमं गुरुं ॥ पुरुषस्येह यत्कार्यं म्रियमाणस्य सर्वथा ॥३७॥ यच्छ्रोतव्यमथो जाप्यं यत्कर्त्तव्यं नृभिः प्रभो ॥ स्मर्त्तव्यं भजनी
यं वा ब्रूहि यद्वा विपर्ययं ॥३८॥ नूनं भगवतो ब्रह्मन् गृहेषु गृहमेधिनां ॥ न लक्ष्यते ह्यवस्थानमपि गोदोहनं क्वचित् ॥ सू
तउवाच ॥ एवमाभाषितः पृष्टः स राज्ञा श्लक्ष्णया गिरा ॥ प्रत्यभाषत धर्मज्ञो भगवान्बादरायणिः ॥४०॥ इति श्रीभा
गवते महापुराणे प्रथमस्कंधे शुकागमनो नाम एकोनविंशोध्यायः ॥१९॥

मित्याशयेनाह ॥ नूनमिति ॥ गोदोहनमात्रकालमपि ॥ ब्रह्मास्त्रादभिरक्षितं कलिजयाख्यातं च कृत्वा नृपं ॥ अंते यः शुकरूपतः स्व
परमज्ञानोपदेशेन तं श्रीपादाब्जमनु नमामि परमानंदाकृतिं माधवं ॥४०॥ इति श्रीभागवते महापुराणे प्रथमस्कंधे श्रीधरस्वा
मिविरचितायां एकोनविंशतितमोध्यायः ॥१९॥ संवत् १८२७ कार्त्तिकमासे कृष्णपक्षे तिथौ १५ शुभं भवतु ॥ श्रीकृष्णायनमः ७१